

गन्धर्वराजपुष्पदन्तमुखपङ्कजविनिर्गतं

श्रीशिवमहिम्नः स्तोत्रम्

श्रीजगदीशतर्कपञ्चाननभट्टाचार्यविरचित-
हरि-हर-सूर्येति त्रिपक्षीय-'रहस्यप्रकाश'-समाख्यया
व्याख्यया समलङ्कृतम्



सम्पादकः
डॉ० रामकिशोरः झा

राष्ट्रियसंस्कृतसंस्थानम्



गन्धर्वराजपुष्पदन्तमुखपङ्कजविनिर्गतं

श्रीशिवमहिम्नःस्तोत्रम्

श्रीजगदीशतर्कपञ्चाननभट्टाचार्यविरचित-
हरि-हर-सूर्येति त्रिपक्षीय-'रहस्यप्रकाश'-समाख्यया
व्याख्यया समलङ्कृतम्



सम्पादकः
डॉ० रामकिशोरः झा

राष्ट्रियसंस्कृतसंस्थानम्

Rashtriya Sanskrit Sansthan
(Deemed University)
Under the auspices of the Ministry of Human Resources Development
Govt. of India

Ganganath Jha Campus Text Series No-78

General Editor
Dr. N. R. Kannan
Principal
Ganganath Jha Campus, Allahabad

Gandharvarāja Puṣpadantamukhpaṇkajavinirgatam

Śrī Śivamahimnaḥ-Stotram

with

Jagadīśa Tarkapañcānana Bhattācarya Viracita
Hari-Har-Sūrya-Pakṣiya 'Rahaṣyaprakāśa Commentry

Edited by
Dr. Ram Kishor Jha
Curator (I.C.)

Rashtriya Sanskrit Sansthan
(Deemed University)
Ganganatha Jha Campus
Chandrashekhar Azad Park
Allahabad-211002
2018

Published by : Principal
Rashtriya Sanskrit Sansthan
(Deemed University)
Ganganatha Jha Campus
Chandrashekhar Azad Park
Allahabad - 211 002 (U.P.) India

ISBN 978-93-85791-30-7

First Edition : 2018

Price : ₹ 190/-

Printed At :
Akshayavata Prakashan
26, Balrampur House
Allahabad-211002

राष्ट्रियसंस्कृतसंस्थानम्
मानवसंसाधनविकासमन्त्रालयाधीनः
मानितविश्वविद्यालयः
गङ्गानाथझापरिसरमूलग्रन्थमाला-प्रसूनम् नं०-७८

प्रधानसम्पादकः
डॉ० एन्०आर्० कण्णन्
प्राचार्यः
गङ्गानाथझापरिसरः, प्रयागः

गन्धर्वराजपुष्पदन्तमुखपङ्कजविनिर्गतं

श्रीशिवमहिम्नः स्तोत्रम्

जगदीशतर्कपञ्चाननभट्टाचार्यविरचित-
हरि-हर-सूर्येति त्रिपक्षीय-'रहस्यप्रकाश'-समाख्यया व्याख्यया
समलङ्कृतम्

सम्पादकः
डॉ० रामकिशोरः झा
संग्रहाध्यक्षः (प्रभारी)

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
गङ्गानाथझापरिसरः
आजादोद्यानम्, प्रयागः-२११००२
२०१८

प्रकाशक : प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
गङ्गानाथझापरिसरः
प्रयाग-२११००२ (उ०प्र०) भारत

ISBN 978-93-85791-30-7

प्रथमसंस्करणम् : २०१८

मूल्यम् : ₹ १९०/-

मुद्रक :
अक्षयवट प्रकाशन
२६, बलरामपुर हाउस
इलाहाबाद-२११००२

डॉ० एन्० आर्० कण्णन्
प्राचार्यः
राष्ट्रिय-संस्कृत-संस्थानम्
मानित विश्वविद्यालयः
गङ्गानाथझा-परिसरः
भारतशासनस्य-मानव-संसाधन-विकासमन्त्रालयाधीनः

Dr. N. R. Kannan
Principal
Rashtriya Sanskrit Sansthan
Deemed University
Ganga Nath Jha Campus
Under the Ministry of Human Resource
Development, Govt. of India

प्रधानसम्पादकीयम्

अथेदानीम्, ऐषमः जगदीशतर्कपञ्चाननभट्टाचार्यविरचित-हरि-हर-सूर्येति त्रिपक्षीयरहस्यप्रकाश-समाख्यया व्याख्यया संवलितम्, गन्धर्वराज-पुष्पदन्तमुखपङ्कजविनिर्गतं "श्रीशिवमहिम्नः स्तोत्रम्" इत्याख्यग्रन्थरत्नं तीर्थराजप्रयागक्षेत्रीय-राष्ट्रियसंस्कृतसंस्थानान्तर्गत-गङ्गानाथझा-परिसरद्वारा सम्मुद्राप्य प्रकाशनेन समेषां बिबुधानां नयनसुलमतामाप्नोतीति अस्माकं चेतो मोमुद्यते।

"योऽनूचानः स नो महान्" इति श्रुतिवाक्यं ध्यायत् राष्ट्रियसंस्कृत-संस्थानम् समग्रे भारतदेशे ज्ञानपरम्पराभिवृद्धौ अपूर्वग्रन्थप्रकाशनविधौ च भृशं प्रयतमानं वरीवर्ति। "अनूचानो वेदाध्यापक" इति पूर्वमीमांसाशास्त्रे 'भाट्टदीपिकायाम्' प्रवर्ग्याधिकरणे खण्डदेवभट्टाचार्याः प्राहुः। वेदश्च वेदपादपस्तवे "अर्थज्ञानैकमूलः, क्रमपदपुलिनो, मन्त्रविस्तीर्णशाखः" इत्येवमर्थज्ञानात्मकमूलविशिष्टवृक्षरूपेण स्तुतः। अतो यथा वृक्षस्य रक्षा अभिवृद्धिश्च मूलरक्षणेन भवति तथा वेदस्यापि रक्षाभिवृद्धी अर्थज्ञान-रक्षणद्वारा भवति। वेदार्थज्ञानार्थमेव साहित्य-न्याय-मीमांसादि-शास्त्राणि, अपूर्वग्रन्थरत्नानि च अध्याप्यन्ते प्रकाश्यन्ते च। 'लेखनान्तं पाण्डित्यमि'ति खलु अभियुक्तवचनम्। तदिह-

शैवाः कति सौराः वैष्णवाः विलसन्ति कियन्तः।
व्याख्या-त्रयेण तेषां वयमिह मुदमाचरिष्यामः।।

इति श्लोकेन तार्किकशिरोमणिभिः जगदीशतर्कालङ्कारैः श्रीशिवमहिम्नः

स्तोत्रस्य अगाधतात्पर्यम्, त्रिपक्षीयवैशिष्ट्यञ्च 'रहस्यप्रकाशाख्य'-व्याख्यानेन निरटङ्कि।

तत्र **श्रीशिवमहिम्नः स्तोत्रे**ऽस्मिन् ग्रन्थे श्रुत्यादिप्रमाणप्रदर्शनपुरस्सरं भगवतः शिवस्य स्वरूपं सर्वतो श्रेष्ठत्वं पारम्यं, विशेषतः तदीयविशेषगुण-निर्देशपुरस्सरं महत्त्वमित्यादयो गुणाः चतुस्त्रिंशत्संख्याकश्लोकैः अपूर्व-प्रणाल्या प्रतिपादितास्सन्ति। यस्य ग्रन्थविशेषस्य पठनेन भगवत्स्वरूपात्मके शिवे नैसर्गिकी भक्तिः स्यान्मनुष्याणाम्, तादृशोत्तमग्रन्थस्य जगदीश-तर्कालङ्कारैः **शिव-विष्णु-सूर्य**भेदेन त्रिषु पक्षेषु **श्रीशिवमहिम्नः स्तोत्रस्थ**-पद्यानां सुविशदं सम्यक् तात्पर्यमुपावर्णि। अतः इयं टीका विद्वन्मनोहारिणी, सर्वेषां विदुषां परमोपकारिणी च भूयादित्यत्र नास्ति संशयलेशावसरः।

श्रीशिवमहिम्नः स्तोत्ररूपग्रन्थे एतादृश-'रहस्यप्रकाश'टीकायाञ्च ये ये विशेषाः निर्दिष्टाः सन्ति, ते सर्वेऽपि स्वकीयोपोद्घाते एतद्ग्रन्थ-सम्पादकेन **डॉ० रामकिशोरझा**-महोदयेन सुविशदं सुष्ठु च उपपादिताः सन्ति। अत्र प्रथमं **देव**शब्दव्युत्पत्तिः विविधोपनिषत्प्रमाणैः सम्यक् प्रादर्शि। तदनु **शर्व**शब्देन **क्षितिमूर्त्ति**शब्देन च किमभिधानं विवक्षितमितिविषये **काञ्ची**नगरादिविविधक्षेत्रीयमन्दिरस्थ-भगवन्मूर्त्तिप्रदर्शनेन सुविशदं **क्षिति-मूर्त्तिशब्दार्थः** प्रत्यपादि, इति विदुषां सन्तोषस्य विषयः। तथा **शिवमहिम्नः-स्तोत्रकर्तुः** ग्रन्थकारस्य, व्याख्याकारस्य च परिचयोऽपि प्रादर्शि। सर्वथा एतेषां परिश्रमः श्लाघनीयः। अतस्तेभ्यः धन्यवादज्ञापनपुरस्सरं तीर्थराज-प्रयागक्षेत्राधिपतिः **भगवान् वेणीमाधवः** मङ्गलान्यनुगृह्णातु इति सम्प्रार्थ्य विरमामि।

विद्वज्जनविधेयः
प्राचार्यः

२२.०८.२०१८ **डॉ० एन्० आर्० कण्णन्**

□□

Prof. Ramkaran Sharma
(President Awardee Govt. of India)
Visiting Professor of Sanskrit
University of Pennsylvanja
Email : ramkaransharma@yahoo.com
63, Vigyan Vihar
Delhi-110 092
India : 011-43043476
USA : 0012015658438

ॐ

Joint Educational Advisor
(Min. of HRD Govt. of India)
Ex. Director, Rashtriya Sanskrit Sansthan
Ex. Vice Chancellor
K.S.D. Sanskrit University, Darbhanga and
Sampurnanand Sanskrit University, Varanasi
Ex. President I.A.S.S.
Visting Professor
Columbia University, University of Chicago,
University of California Berkeley

नैवेद्यम्

जयति **गङ्गानाथझा-परिसरो**, राष्ट्रियसंस्कृतसंस्थानस्य। जयति च विद्वन्मण्डल-मण्डनः **जगदीशतर्कपञ्चाननभट्टाचार्यो**, येन शिव-विष्णु-सूर्यसम्बोध्यपरका व्याख्या विहिता, या च पण्डितप्रवरेण **डॉ० रामकिशोरझा-**शर्म्मणा सम्पादिता, **राष्ट्रियसंस्कृत-संस्थानस्य गङ्गानाथझा-परिसरेण** प्राकाश्यमानीता।

वन्दामहे सर्वेऽपि **जगदीशतर्कपञ्चाननभट्टाचार्य**प्रवरम्, येनेयमपूर्वा व्याख्या व्यधायि, **राष्ट्रियसंस्कृतसंस्थान**-परिवारञ्चापूर्वप्रकाशनायास्य व्याख्यात्रयसंवलितस्य **श्रीशिवमहिम्नः स्तोत्र**रत्नस्य।

जयति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयो, येन **शिव-विष्णु**परकं पण्डित-प्रकाण्ड**मधुसूदनसरस्वती**रचितं व्याख्यानं समूलस्तोत्रं प्राकाश्यं नीतम्।

अस्माभिरालोकितं चतुर्मुखं लिङ्गं वैशाल्यां **जैनदर्शनप्राकृताध्ययनकेन्द्रे**। एतद् व्याख्यानत्रयं सार्वजनीनायां वैदिकपरम्परायां साधकं भविष्यतीति निश्चप्रचम्। कोटिशो वर्द्धापनाः **राष्ट्रियसंस्कृतसंस्थानाय** पण्डितप्रवराय **डॉ० रामकिशोरझा-**शर्म्मणे चेति।

निवेदकः

मकरसंक्रान्तिः
विक्रमसम्वत् 2074

रामकरणशर्मा
(प्रो० रामकरणशर्मा)

□□

श्रीसाम्बसदाशिवध्यानम्



मूले कल्पद्रुमस्य द्रुतकनकनिभं चारुपद्मासनस्थं
वामाङ्कारूढगौरीकुचनिविडभराभोगगाढोपगूढम्।
नानालङ्कारकं तं वरपरशुमृगाभीतिहस्तं त्रिनेत्रं
वन्दे बालेन्दुमौलिं गजवदनगुहाश्लिष्टपार्श्वं महेशम्॥1॥

साम्बो नः कुलदैवतं पशुपते! साम्ब! त्वदीया वयं
साम्बं स्तौमि सुरासुरोरगगणाः साम्बेन सन्तारिताः।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि॥2॥

मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय॥3॥

□□

महामहोपाध्याय
प्रो० अभिराज राजेन्द्रमिश्र
पूर्व-कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी (उ०प्र०)

"सनराइज विला"
लोअर समरहिल, शिमला-171005
मो : 09418041537
ई-मेल : abhirajr96@gmail.com

नान्दीवाक्

यथा हि हिमनदप्रवाहोऽनवरतगत्या प्रवहति, क्वचिन्मन्दवेगः क्वचिच्च तीव्रवेगो विविधर्तुप्रभावं सहमानस्तथैव शारदासूनुः कविरपि, तदभिप्रायवेदी समीक्षकश्चापि न जातु परमार्थतो विश्राम्यति। कार्यमेकं परिसमाप्याऽसावपरं प्रारभते। तदेव तस्य नियतिः। तदेव तस्य स्वरूपलक्षणम्। निदर्शनमिदं चरितार्थं परिलक्ष्यते मदात्मीयप्रवरस्य झोपाह्वस्य **डॉ० रामकिशोरस्य** व्यक्तित्वे। स हि निरन्तरमेवात्मानं कस्मिंश्चित् सारस्वतसमारम्भे नियोजयन्नेव परिलक्ष्यते। इदानीमेवासौ **श्रीगीतगोविन्दमहाकाव्यं** प्रकाशितवान्, मैथिलमहाकविकृष्णदत्तविरचितहरिहरोभयनिष्ठ 'गङ्गा'-'शशिलेखा'-व्याख्याद्वयसमलङ्कृतं स्वसम्पादनकौशल-समन्वितम्। क्षणमात्रमप्यविश्रम्य भूयोऽप्यसौ प्रकाशयति **श्रीशिवमहिम्नःस्तोत्रं** गन्धर्वराज-**पुष्पदन्त**पल्लवितं **जगदीशतर्कपञ्चानन-भट्टाचार्य**प्रणीत-'हरि'-'हर'-'सूर्येति' त्रिपक्षीयया **'रहस्यप्रकाश'**-नाम्न्या व्याख्ययोपवृंहितम्।

श्रीशङ्कराचार्य-पुष्पदन्त-जगद्धरभट्टप्रभृतयः स्तोत्रकाराः धर्मप्राणहिन्दुजनतायाः प्राणाधारकल्पाः प्रतीयन्ते। तत्र तावत् शैवमतावलम्बिनां कृते श्रीशिवमहिम्नः स्तोत्रं पीयूषचुलुकमिव प्रतिभाति। स्तोत्रेऽस्मिन् प्रतिबिम्बितं साहित्यालङ्कारसौन्दर्यं, शिवतत्त्वमाहात्म्यं भगवतो भूतभावनस्येशानस्य सर्वदेवमयत्वं तत्सगुणव्यक्तित्वविभूतिमत्त्वं तदर्द्धनारीश्वरत्वं तत्साङ्गोपाङ्गकुटुम्बित्वं किञ्च तस्य निरतिशयपरदुःखकातरत्वं कं न विलोभयति?

परन्तु तदेव शम्भुमात्रपरं स्तोत्रं विलक्षणप्रज्ञो विद्वत्कुलालङ्कारो जगदीशतर्क**पञ्चाननभट्टाचार्यः हरिपरं सूर्य**परञ्चापि व्याख्यातीत्यहो महदाश्चर्यम्। एकमेव स्तोत्रपद्यं त्रिधा व्याख्यातं कथं न विस्मापयेत् पाठकान्? सारस्वतं तत्त्वं तु

श्रीसाम्बसदाशिवध्यानम्



मूले कल्पद्रुमस्य द्रुतकनकनिभं चारुपद्मासनस्थं
वामाङ्कारूढगौरीकुचनिविडभराभोगगाढोपगूढम्।
नानालङ्कारकं तं वरपरशुमृगाभीतिहस्तं त्रिनेत्रं
वन्दे बालेन्दुमौलिं गजवदनगुहाश्लिष्टपार्श्वं महेशम्॥1॥

साम्बो नः कुलदैवतं पशुपते! साम्ब! त्वदीया वयं
साम्बं स्तौमि सुरासुरोरगगणाः साम्बेन सन्तारिताः।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि॥2॥

मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय॥3॥

□□

महामहोपाध्याय
प्रो० अभिराज राजेन्द्रमिश्र
पूर्व-कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी (उ०प्र०)

"सनराइज विला"
लोअर समरहिल, शिमला-171005
मो : 09418041537
ई-मेल : abhirajr96@gmail.com

नान्दीवाक्

यथा हि हिमनदप्रवाहोऽनवरतगत्या प्रवहति, क्वचिन्मन्दवेगः क्वचिच्च तीव्रवेगो विविधर्तुप्रभावं सहमानस्तथैव शारदासूनुः कविरपि, तदभिप्रायवेदी समीक्षकश्चापि न जातु परमार्थतो विश्राम्यति। कार्यमेकं परिसमाप्याऽसावपरं प्रारभते। तदेव तस्य नियतिः। तदेव तस्य स्वरूपलक्षणम्। निदर्शनमिदं चरितार्थं परिलक्ष्यते मदात्मीयप्रवरस्य झोपाह्वस्य **डॉ0 रामकिशोरस्य** व्यक्तित्वे। स हि निरन्तरमेवात्मानं कस्मिंश्चित् सारस्वतसमारम्भे नियोजयन्नेव परिलक्ष्यते। इदानीमेवासौ **श्रीगीतगोविन्दमहाकाव्यं** प्रकाशितवान्, मैथिलमहाकविकृष्णदत्तविरचितहरिहरोभयनिष्ठ 'गङ्गा'-'शशिलेखा'-व्याख्याद्वयसमलङ्कृतं स्वसम्पादनकौशल-समन्वितम्। क्षणमात्रमप्यविश्रम्य भूयोऽप्यसौ प्रकाशयति **श्रीशिवमहिम्नःस्तोत्रं** गन्धर्वराज-**पुष्पदन्त**पल्लवितं **जगदीशतर्कपञ्चानन-भट्टाचार्य**प्रणीत-'हरि'-'हर'-'सूर्येति' त्रिपक्षीयया **'रहस्यप्रकाश'**-नाम्न्या व्याख्ययोपवृंहितम्।

श्रीशङ्कराचार्य-पुष्पदन्त-जगद्धरभट्टप्रभृतयः स्तोत्रकाराः धर्मप्राणहिन्दुजनतायाः प्राणाधारकल्पाः प्रतीयन्ते। तत्र तावत् शैवमतावलम्बिनां कृते श्रीशिवमहिम्नः स्तोत्रं पीयूषचुलुकमिव प्रतिभाति। स्तोत्रेऽस्मिन् प्रतिबिम्बितं साहित्यालङ्कारसौन्दर्यं, शिवतत्त्वमाहात्म्यं भगवतो भूतभावनस्येशानस्य सर्वदेवमयत्वं तत्सगुणव्यक्तित्वविभूतिमत्त्वं तदर्द्धनारीश्वरत्वं तत्साङ्गोपाङ्गकुटिम्बित्वं किञ्च तस्य निरतिशयपरदुःखकातरत्वं कं न विलोभयति?

परन्तु तदेव शम्भुमात्रपरं स्तोत्रं विलक्षणप्रज्ञो विद्वत्कुलालङ्कारो जगदीशतर्क**पञ्चाननभट्टाचार्यः हरि**परं **सूर्य**परञ्चापि व्याख्यातीत्यहो महदाश्चर्यम्। एकमेव स्तोत्रपद्यं त्रिधा व्याख्यातं कथं न विस्मापयेत् पाठकान्? सारस्वतं तत्त्वं तु

प्रख्योपाख्याप्रसरसुभगं भवत्येव **महामाहेश्वराभिनवगुप्तदृष्ट्या**। तथापि **जगदीशतर्कपञ्चाननस्य** व्युत्पत्तिगाम्भीर्यं सर्वथाऽनितरसाधारणं प्रतिभाति।

संस्कृतवाङ्मये द्विसन्धानात् प्रारभ्य सप्तसन्धानं यावत् काव्यपरम्परा परिलक्ष्यते। परन्तु तेषु महाकाव्येषु प्रारम्भत एव द्वौ त्रयश्चत्वारः पञ्च षट् सप्तमिता वा नायकास्तिष्ठन्ति। परन्तु **श्रीशिवमहिम्नःस्तोत्रे** मूलकविना तु केवलं भूतभावनशिव एव सङ्कल्पितः प्रतिष्ठापितः गीतश्च। न तत्र कविना **पुष्पदन्तेन** विष्णोः सूर्यस्य वा सन्निवेशः कृतः। वस्तुतः कौशलमिदं केवलं टीकाकारस्य **जगदीशभट्टाचार्यस्य**। अतएवात्र तन्महीयसी काव्यप्रतिभैव वन्दनीयतामुपैति।

अस्मत्कनिष्ठसुहृद्वर्यैः विविधविद्यानदीष्णैः नित्योत्साहैः सारस्वत-स्वात्यम्भोदचातकैः **डॉ0 रामकिशोरझा**-वर्यैर्महता परिश्रमेण सम्पठ्य सत्रुटिमार्जनं व्याख्यात्रयसंवलितं स्तोत्ररत्नमिदं प्रकाश्यते, तदर्थं तेभ्यो जयजीववाचिकं वितरामि। मन्ये, ग्रन्थरत्नेनानेन साहितीजगतो महानुपकारो भविष्यति।

सप्रश्रयम्

मकरसंक्रान्तिः

मिश्रोऽभिराजराजेन्द्रः

विक्रमसम्वत् 2074

(मिश्रोऽभिराजराजेन्द्रः)

□□

राष्ट्रपति-सम्मानित, शास्त्र-विद्वन्मणि
प्रो. (डॉ.) वाचस्पतिशर्मा त्रिपाठी
पूर्व-आचार्य, डीन एवं अध्यक्ष
धर्मशास्त्र विभाग, का.सिं.द.सं. विश्वविद्यालय, दरभंगा (बिहार)
एमेरिटस प्रोफेसर (यू.जी.सी.)
सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी (उ.प्र.)
पूर्व-विजिटिंग प्रोफेसर, (यू.जी.सी.)

ॐ

निवास-सङ्केत -
1. (वाराणसी) - **उर्मिला-निकेतनम्**
शिव-16/114-25-यू, अन्नपूर्णा कॉलोनी
कादीपुर, शिवपुर, वाराणसी 221003
2. (सिवान) - **राज-गङ्गाधर-सदनम्**
शिवाजीनगर, फतेपुर, बाईपासरोड,
सिवान (बिहार), पिन - 841226
मो. - 09431253819, 08604465574
ई-मेल : himanshu247788@gmail.com

प्रशस्तिवाक्

राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीस्थस्य प्रयागपरिसरे विराजमानेन निरन्तरं सुरभारतीसमुपासनतत्परेण मदत्यन्तमात्मीयेन परमस्नेहभाजनेन बुधवरेण **डॉ0 रामकिशोरझा**शर्म्मणा बङ्गलिपिनिबद्धाः मैथिलीलिपिनिबद्धाश्च मातृकाः महताऽऽयासेनान्विष्य गन्धर्वराजपुष्पदन्तविरचितं 'श्रीशिवमहिम्नः स्तोत्रं' पण्डित**जगदीशतर्कपञ्चाननभट्टाचार्य**प्रणीतया हरि-हर-सूर्यस्तुतिपरकया 'रहस्यप्रकाशा'ख्यया विलक्षणव्याख्यया संवलितं पाठभेदादिप्रदर्शनपुरस्सरं सर्वतोभावेन समीक्ष्य, सम्यक् सम्पाद्य च प्राकाश्यं नीयत इति निश्चप्रचं प्रमोदस्यैषः विषयः समेषामपि सुरभारतीसमाराधकानां कृते।

मूलतः शिवस्तुतिमात्रपरं **श्रीपुष्पदन्त**गीतं 'श्रीशिवमहिम्नः स्तोत्रं' महामनीषिणा श्रीमता **जगदीशभट्टाचार्येण** निजविलक्षणवैदुष्येन, प्रकृष्टपाण्डित्येन, अप्रतिहतप्रतिभया, महता कौशलेन च शम्भुपरं विष्णुपरं सूर्यस्तुतिपरञ्च त्रिधा व्याख्यातमिति विज्ञाय विशद्विस्मयाविष्टचित्ताः भवन्ति समेऽपि सुधियः। तदस्य विश्वविश्रुतग्रन्थरत्नस्य बङ्ग-मिथिलाक्षरोपनिबद्धाः विविधाः मातृकाः महताश्रमेण यतस्ततः संगृह्य, सम्पठ्य त्रुटिपरिमार्जनपुरस्सरं पाठभेदादिप्रदर्शनपूर्वकञ्च सम्यक् सम्पाद्य प्राकाश्यत एष ग्रन्थ इति नूनमेव सर्वथा अभिनन्दनीयः वन्दनीयश्चाभिनवस्यास्य ग्रन्थरत्नस्य सम्पादक आयुष्मान् **डॉ0 रामकिशोरझा**-महोदयः।

ग्रन्थप्रसूनमेतन्निश्चयमेव भगवदनुकम्पया संवर्द्धयिष्यति संस्कृतवाङ्मयस्य

सुषमाम्, सुगन्धम्, कल्पयिष्यते च समेषामपि पाठकानां सद्भक्तानां सरस्वती-समुपयासकानाञ्च महते क्षेमायेति दृढं विश्वसन्नभिनन्दयामि सभाजयामि च निजाशीर्वचोभिर्बुधवरं सम्पादकमहोदयमधोविन्यस्तार्यया—

जयति स 'रामकिशोरः शर्म्मा' सुहृद्वरो यो ह्यस्माकम्।
सम्पादिता अनेके सद्ग्रन्थाः नित्यशो येन॥

इति सहर्षं निवेदयति–

निवेदकः

(आचार्यवाचस्पतिशर्म्मात्रिपाठी)
काशीस्थ-शिवपुरनिवासः

मकरसंक्रान्तिः
विक्रमसम्वत् 2074

□□

उपोद्घातः

(एको देवः सर्वभूतेषु गूढः)

'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृदि'ति श्रीमद्भगवद्गीतायामुल्लिखितं **श्रीकृष्णवचनमनुस्मरता** मया **गन्धर्वराज**पुष्पदन्तप्रणीतस्य **श्रीशिवमहिम्नः स्तोत्रस्य जगदीशतर्कपञ्चाननभट्टाचार्य**विरचिता **'रहस्यप्रकाशाभि'**धाना अप्रकाशिता टीका विद्वन्मनोविनोदाय सम्पादिता। इयं हि टीका प्रतिपदव्याख्यात्मिका नितान्तपाण्डित्यपूर्णाऽथ च सर्वथा विलक्षणैव वरीवर्ति। यतो ह्यस्यां टीकायां **श्रीशिवमहिम्नः स्तोत्रस्य** प्रायशः सर्वाण्यपि पद्यानि **शिव-विष्णु-सूर्ये**ति त्रिपक्षेष्वाटीकितानि सन्ति। उक्तग्रन्थरत्नस्य भूमिकामारचयता मया प्रथमन्तावद् **'देव'**-शब्दस्य व्युत्पत्तिर्निरूप्यते–

'वाचस्पत्यमि'ति बृहत्संस्कृताभिधानकोशग्रन्थस्य पञ्चमे भागे देवशब्दस्य निर्वचनमित्थमासाद्यते–'दिव + अच् = देवता, अमरे, सुरे, पूज्ये, परमात्मनि इति। देव एव देवता, देवशब्दस्य स्वार्थे तल्-प्रत्ययः, तलन्तत्वात् स्त्रीत्वम्।

दिव्यते क्रीडते यस्माद् रोचते द्योतते दिवि।
तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैरि'ति॥

'यतः क्रीडति सर्गादिति विजिगीषते शत्रून्, व्यवहरति सर्वभूतेषु आत्मतया द्योतते, स्तूयते स्तुत्यैः, सर्वत्र गच्छतीति देवः[1]'।

एवमेव शब्दकल्पद्रुमस्य द्वितीयकाण्डे देवशब्दोऽयं दानदीपनद्योतनानामन्यतममर्थमाचष्टे–

यज्ञस्य दाता दीपयिता द्योतयिता यमग्निरि-
त्युक्तं भवतीति' तद्भाष्ये सायणः।

---

1. वाचस्पत्यम्, पञ्चमो भागः, पृष्ठसंख्या 3675

देवं द्युतिं क्रीडां वा तनोति या, सा देवता। 'क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इतिभाष्योक्तेः[1]**।**

पुंस्त्वातिक्रमेण स्त्रीत्वमिति हिन्दीविश्वकोशः[2] स्पष्टयति।

वाचस्पत्यमितिनामधेये कोशग्रन्थे **याज्ञवल्क्यस्मृतेः** पद्यमिदमुद्धृतं विद्यते।

तद्यथा–

यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या।
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते।।

-इतियोगियाज्ञवल्क्यः[3]

मानवधर्मशास्त्रस्य व्याख्यानावसरे सुप्रसिद्धटीकाकारः **कुल्लूकभट्टो**ऽपि लिलेख–'**द्योतनाद्देव**'[4] इति। महर्षिणा **यास्काचार्ये**णापि स्वनिर्मितस्य **निरुक्ताख्यग्रन्थस्य दैवकाण्डे** देवतास्वरूपविवेचनावसरे सुविचार्य निर्णीतं यत् जगतो मूले एकैव महाशक्तिशालिनी काऽपि महाशक्तिर्विलसति। सा हि निरतिशयैश्वर्यशालिनीत्वात् 'ईश्वर' इत्युपगीयते। सैव शक्तिर्बहुभिः प्रकारैः निगमागमेषु स्तुता दरीदृश्यते। तद्यथा–

'महाभाग्यत्वाद् देवताया एक एव आत्मा बहुधा स्तूयते। एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति'[5], इति।

---

1. शब्दकल्पद्रुमः, द्वितीयकाण्डः, पृष्ठसंख्या 741
2. हिन्दीविश्वकोशः, नागेन्द्रनाथ वसु, वाल्यूम 10, पृष्ठसंख्या 609
3. वाचस्पत्यम्, पञ्चमो भागः, पृष्ठसंख्या 3682
4. कुल्लूकभट्टीयटीकोपेता मनुस्मृतिः 12/117
5. यास्कप्रणीतं निरुक्तम् 7/4/8-9

महर्षिणा **यास्काचार्येण** भूयोऽपि सुविचार्य लिखितं यत् 'एक एव रुद्रोऽवतस्थे न द्वितीयः'[1]।

प्रसङ्गेऽस्मिन् **अथर्वशिरोपनिषदि** सुस्पष्टं प्रतिपादितं विद्यते–'यत्पपरं ब्रह्म स एकः, य एकः स रुद्रः, यो रुद्रः, स ईशानः, य ईशानः स भगवान् महेश्वरः[2]। **अथर्वशिरसि** सुस्पष्टनिर्देशोऽवाप्यते यद् रुद्र एव आदिदेव इति। तद्यथा–

'रुद्रमेकत्वमाहुः शाश्वतं वै पुराणमि'ति[3]। **श्वेताश्वतरोपनिषद्**ग्रन्थेऽपि विलिखितं विद्यते यत् 'एको हि रुद्रो न द्वितीयाय तस्थुरि'ति'[4]।

विश्वस्य प्राचीनतमे ग्रन्थे **ऋग्वेदे**ऽप्युल्लिखितं विद्यते यज्जगतः मूले एक एव देवः विराजते। विप्रास्तमेकमेव देवं विविधैरभिधानैर्व्यपदिशन्ति। तद्यथा–

इन्द्रं मित्रं वरुणमग्निमथाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्राः बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः[5]।। इति।

अपि च–

विश्वतश्चक्षुरुत विश्वतो मुखो
विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं प्रपत्रै-
र्द्यावाभूमी जनयन्देव एकः[6]।। इति।

---

1. यास्कप्रणीतं निरुक्तम् 1/15/7
2. अथर्वशिरोपनिषद् 2/4
3. अथर्वशिरस् 5
4. श्वेताश्वतरोपनिषद् 3/2
5. ऋग्वेदसंहिता 1/164/46
6. तदेव 10/81/3

प्रसङ्गेऽस्मिन् **यजुर्वेदे**ऽप्युल्लिखितं विद्यते यत् परब्रह्माभिधः स एव रुद्रः यथावसरमात्मानमत्संख्यरूपेषु विभज्य प्रायशः सर्वेषु स्थावर-जङ्गमात्मकजागतिक-पदार्थेषु विराजमानो बभूव। तद्यथा–'असंख्याताः सहस्राणि ये रुद्रा अधिभूम्याम्'[1]। **यजुर्वेदसंहिता**यामेव प्रामुख्येन रुद्रभेदा अपि परिगणितास्सन्ति। तद्यथा–

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः[2]॥ इति।

किं बहुना 'एकोऽहं बहुस्याम प्रजायेति' श्रुतिवचनमपि विदुषां विदितचरम्। एतावता स रुद्र एकोऽपि सन् अनन्तमूर्त्तिषु विराजमानो बभूवेति **तत्त्वनिर्णयाख्यः** वेदान्तग्रन्थोऽपि स्पष्टयति। तत्पद्यं यथा–

अनन्तमूर्त्तिर्ब्रह्म ह्यविविक्त-विभक्तिवत्।
बहुस्याम प्रजायेति लीला तस्य ह्यभूत् सती[3]॥ इति।

किमधिकेन **अगस्त्यसंहिता**याः पद्यमिदं विषयेऽस्मिन्नुपोद्वलकं प्रमाणं प्रस्तौति। तत्पद्यं यथा–

सर्वेश्वरः सर्वमयः सर्वभूतहिते रतः।
सर्वेषामुपकाराय साकारोऽभून्निराकृतिः[4]॥ इति।

यतो हि 'स एकाकी न रमते' इत्यपि श्रुतिरभिलपति। अत एव निर्गुणे निराकारे सच्चिदानन्दरूपे परब्रह्मणि यदा सिसृक्षा जागर्ति, तदा तदेव निर्गुणं ब्रह्म कौतुकावलोकनहेतवे सगुणरूपं गृह्णाति। परब्रह्मणस्तदेव सगुणरूपं **शिवतत्त्वमिति शिवपुराणं** स्पष्टयति। तद्यथा–

---

1. यजुर्वेदसंहिता 16/34
2. तदेव 32/1
3. तत्त्वदीपनिर्णयः, पृष्ठसं० 87
4. अगस्त्यसंहिता, तृतीयोऽध्यायः

निर्विकल्पं निरारम्भं निर्मायं निरुपद्रवम्।
अद्वितीयमनाद्यन्तमविकारं चिदात्मकम्।।
कियता चैव कालेन द्वितीयेच्छाऽभवत्किल।
अमूर्त्तेन स्वमूर्त्तिश्च तेनाकल्पि स्वलीलया।।
अमूर्त्ते यत्पराख्यं वै तस्य मूर्त्तिः सदाशिवः।
अर्वाचीनाः पराचीना ईश्वरं तं जगुर्बुधाः[1]।। इति।

तदयमाशयः—स्वशक्तिसम्पन्नः शक्तिमान् शिवोऽत्र पाञ्चभौतिके जगत्यात्मनः प्रसाररूपं कौतुकमातन्वन्नाब्रह्मतृणपर्यन्तं सर्वजीवेषु प्रसृतोऽभवदित्यपि शिवपुराणं स्पष्टयति। तद्यथा—

सिसृक्षया पुराऽव्यक्ताच्छिवः स्थाणुर्महेश्वरः।
सत्कार्यकरणोपेतः स्वयमाविरभूत्प्रभुः[2]।।

अथ च—

आब्रह्मतृणपर्यन्तं यत्किञ्चिद् दृयते जगत्।
तत्सर्वं शिव एवास्ति स देवः शिव उच्यते[3]।।

एवञ्च—

यतो वाचो निर्वर्त्तन्ते अप्राप्य मनसा सह।
तदेव परमं प्रोक्तं ब्रह्मैव शिवसंज्ञकम्[4]।। इति च।

एतावता समेषां वैदिक-लौकिकवाङ्मयानामनुशीलनेन तथ्यमिदं सुस्पष्टं

---

1. शिवपुराणम् 2/1/6/15-17
2. तदेव 3/1/8
3. तदेव 4/43/4
4. तदेव 4/41/14

भवति यत् सृष्टिसञ्चालनाय लोककल्याणाय च एकस्यौवार्द्धनारीश्वररूपधारिणः साम्बशिवस्याष्टौ संख्याकाः मूर्त्तयस्त**दिच्छाशक्ति**[1]**-ज्ञानशक्ति**[2]**-क्रियाशक्ति**[3]-वशाच्चाविरभूवुरिति पारदृश्वनां विपश्चिदपश्चिमानामनुमतं मतम्। **शिवपुराणस्य** पद्यान्यत्र निदर्शनभूतानि सन्ति। तद्यथा–

तस्यादिदेवदेवस्य मूर्त्यष्टकमिदं जगत्।
तस्मिन् व्याप्य स्थितं विश्वं सूत्रे मणिगणा इव॥

शर्वोभवस्तथा रुद्र उग्रो भीमः पशोः पतिः।
ईशानश्च महादेवः मूर्त्तयश्चाष्टविश्रुताः॥

भूम्यम्भोग्निमरुद्व्योम-क्षेत्रज्ञार्कनिशाकराः।
अधिष्ठिता महेशस्य शर्वाद्यैरष्टमूर्त्तिभिः॥

चराचरात्मकं विश्वं धत्ते विश्वम्भरात्मिका।
शार्वी शर्वाह्वया मूर्त्तिरिति शास्त्रस्य निश्चयः॥

अष्टमूर्त्यामूर्त्यात्मना विश्वमधिष्ठाय स्थितं शिवम्।
भजस्व सर्वभावेन रुद्रं परमकारणम्[4]॥ इति च।

नैतावन्त्येवापि तु **महानिर्वाणतन्त्रे**ऽपि पूर्वपल्लवितानां भगवतः शिवस्याष्टमूर्त्तिनां पौर्वापर्यक्रमनिर्धारणपुरस्सरं वर्णनमासाद्यते। तद्यथा–

---

1. इदमित्थमिदं नेत्थं भवेदित्येवमात्मिका।
   इच्छाशक्तिर्महेशस्य नित्या कार्यनियामिका।।-शिवपुराणम् 7/2/4/32
2. ज्ञानशक्तिस्तु तत्कार्यं करणं कारणं तथा।
   प्रयोजनञ्च तत्त्वेन बुद्धिरूपाध्यवस्यति।।-शिवपुराणम् 7/2/4/33
3. यथेप्सितं क्रियाशक्तिर्यथाध्यवसितं जगत्।
   कल्पयत्यखिलं कार्यं क्षणात् सङ्कल्परूपिणी।।-शिवपुराणम् 7/2/4/34
4. शिवपुराणम् (वायवीयसंहितायाः उत्तरभागः) 3/2/18-22

शर्वाः क्षिति समुद्दिष्टा भवो जलमुदाहृतः।
रुद्रोऽग्निरुग्रो वायुः स्यात् भीमः आकाशशब्दतः॥
पशुपतिर्यजमानः महादेवः सुधाकरः।
ईशानः सूर्य इत्येते मूर्त्तयोऽष्टौ प्रकीर्तिताः[1]॥

भारतदेशस्य विविधभूभागेष्ववस्थितशिवमन्दिरेष्वेताः भगवतः शिवस्याष्टौ मूर्त्तयः स्वस्वप्रभावं प्रकटयन्त्यः विराजन्ते इति **शिवाङ्क**नाम्नि **कल्याण**पत्रिकायां मुद्रिते स्वनिबन्धे **श्रीपन्नालालसिंहः** स्पष्टयति[2]।

1. शर्वः[3]–क्षितिमूर्त्तिः।

दक्षिणेभारतेऽवस्थिते **तमिलनाडु**प्रान्ते **काञ्ची**नगरे भगवतः शिवस्य **क्षितिमूर्त्ति**र्विराजते। मूर्त्तिरियं **एकाम्रेश्वरज्योतिर्लिङ्ग**नाम्ना च ख्यातिं भजते। **क्षितिमूर्ति**रियं पराम्बया **पार्वत्यैव** स्थापितेति पुराणप्रसिद्धिः। ख्रिष्टाब्दस्यैकादश-शताब्द्याः पूर्वार्द्धभागे **कश्मीर**देशे लब्धजन्मा **महामाहेश्वरः श्रीमदभिनवगुप्त-पादाचार्यो**ऽपि **भरतमुनि**प्रणीतस्य नाट्यशास्त्रस्य स्वविरचितायां **'अभिनव-भारती'**-नाम्न्यां टीकायां भगवतः शिवस्याष्टमूर्त्तिनां क्रमशस्तत्तदभिधानोल्लेखपुरस्सरं मङ्गलमाचरति। तत्र प्रथमाध्याये **शर्व**रूपधारिणः भगवतः शिवस्य **क्षितिमूर्तिः** स्तुता विद्यते। तद्यथा–

विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम्।
धर्तृशक्तिमयं वन्दे धरणीरूपमीश्वरम्[4]॥ इति।

---

1. महानिर्वाणतन्त्रम् 14/7/79-80
2. श्रीशिवस्याष्टमूर्त्तयः, निबन्धलेखकः-श्रीपन्नालालसिंहः। कल्याणपत्रिकाया-शिवाङ्के निबन्धोऽयं प्रकाशितोऽस्ति। पृष्ठसंख्या 563-66
3. (क) शर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु।-तैत्तरीयारण्यकम् 16/16
   (ख) रोदसी रुद्रपत्नी, ऋग्वेदसंहिता 10/92/11
4. अभिनवभारतीटीकोपेतं भरतमुनेर्नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालय-प्रकाशनम्) प्रथमोऽध्यायः, पृष्ठसंख्या 6

शिवपुराणे भार्गवकृते अष्टमूर्त्तिस्तोत्रेऽपि शर्वरूपधारिणः भगवतः शिवस्य **क्षितिमूर्त्ति**रभिवन्दिता विद्यते। तद्यथा–

विश्वम्भरात्मक! बिभर्षि विभोऽत्र विश्वं
को विश्वनाथ! भवतोऽन्यतमस्तमोऽरिः।
स त्वं विनाशय तमो मम चाहिभूष!
स्तव्यात्परः परतरं प्रणतस्ततस्त्वाम्[1]॥ इति।

2. भवः[2]—जलमूर्त्तिः।

तमिलनाडुप्रान्ते **त्रिचना**-(तिरुचिन्ना) **पल्ली**मण्डले भवरूपधारिणः भगवतः शिवस्य जलमूर्त्तिः **अप्लिङ्गत्वे**न सुप्रतिष्ठिता विद्यते। **जलमूर्त्ति**रियं **जम्बुकेश्वर-शिवलिङ्ग**नाम्ना प्रसिद्धिं लभते। अत्र अर्घाया अधोभागज्जलनिर्झरः शिवलिङ्गोपरि निरन्तरं प्रपतति।

अभिनवभारतीटीकाया **द्वितीयेऽध्याये भव**रूपधारिणः भगवतः शिवस्य जलमूर्त्तिरूपश्लोकिता विद्यते। तद्यथा–

संसारनाट्यजनन-धातृबीजलताजुषीम्।
जलमूर्त्तिं शिवां पत्युः सरसां पर्युपास्महे[3]॥

भगदत्तजल्हणकृतायां **'सूक्तिमुक्तावल्यां' आशीर्वादपद्धता**वपि **भव**रूपधारिणः भगवतः शिवस्या**म्भोमयं** वपुरतीव हृदयहारिण्या रीत्या संस्तुतमस्ति। तद्यथा–

---

1. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/30
2. (क) भव-शर्वाविमौ ब्रूमो रुद्रः पशुपतिश्च यः।-ऋग्वेदसंहिता, 11/3/6/9
   (ख) भवाय शर्वाय च नमः।-यजुर्वेदसंहिता 16/28
3. अभिनवभातीटीकोपेतं नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालयप्रकाशनम्) द्वितीयोऽध्यायः, पृष्ठसंख्या 158

जगज्जीवनमव्याद्वः शम्भोरम्भोमयं वपुः।
ब्रह्माण्डमपि यस्यान्तस्तरत्तुम्बीफलायते[1]।।

शिवपुराणे भार्गवविहिते **शिवाष्टमूर्त्तिस्तोत्रे**ऽपि **भवरूप**धारिणः भगवतः शिवस्य **जलमूर्त्तिः** सङ्कीर्त्तिता विद्यते। तद्यथा–

पानीयरूप! परमेश! जगत्पवित्रं
चित्रं विचित्र-सुचरित्रकरोऽसि नूनम्।
विश्वं पवित्रममलं किल विश्वनाथ!
पानीयगाहनत एतदतो नतोऽस्मि[2]।। इति।

3. रुद्रः[3]–अग्निमूर्त्तिः।

तमिलनाडुप्रान्ते 'तिरुवण्णमल्लई'-क्षेत्रे भगवत्याः पार्वत्याः तपश्चर्यया

---

1. भगदत्तजल्हणप्रणीता सूक्तिमुक्तावली 2/1
2. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/28
3. (क) त्वमग्ने! रुद्रो असुरो महो दिवः।-ऋग्वेदसंहिता 2/1/6
   (ख) तस्मै रुद्राय नमोऽस्त्वग्नये।-अथर्ववेदसंहिता 7/83
   (ग) एक एव रुद्रोऽवतस्थे, न द्वितीयः, निरुक्तम् 1/15/7
   (घ) असंख्याताः सहस्राणि ये रुद्रा अधिभूम्याम्।-यजुर्वेदसंहिता 16/34
   (ङ) रुद्रमेकत्वमाहुः शाश्वतं वै पुराणम्।-अथर्वशिरस्, 5
   (च) एको हि रुद्रो न द्वितीयाय तस्थुः।-श्वेताश्वतरोपनिषत् 3/2
   (छ) अग्नि वैं रुद्रः, शतपथब्राह्मणम्, 5/3/1/10
   (ज) सर्व एतान्यष्टौ अग्निरूपाणि, तदेव 16/1/3/18
   (झ) रुद्रो वै क्रूरो देवानाम्।-बोधायनगृह्यसूत्रम्, पुटकसं0 103
   (ञ) रुद्रो वै सर्वा देवताः।-अथर्वशिरोपनिषत् 2/4
   (ट) सर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु।-तैत्तरीयारण्यकम् 10/16
   (ठ) यो देवानां प्रथमं पुरस्तात् विश्वाधिपो रुद्रो महर्षिः।
   -महानारायणोपनिषत् 12/12

भगवतः **शिवस्याग्निमूर्त्तिः तेजोलिङ्गत्वेन** स्वयमेव प्रकटो जात इति पुराणप्रसिद्धिः। अग्निमूर्त्तिरियं **'चिदम्बरम्'**-मन्दिरादुत्तरपश्चिमे दिग्भागे विल्लुपुरान्नातिदूरं **'काठपाडीं'** प्रति गम्यमाने मार्गे सुप्रतिष्ठिता विद्यते। नाट्यशास्त्रस्याभिनवभारत्याष्टीकायास्तृतीयेऽध्याये **रुद्ररूपधारिणः** भगवतः शिवस्याग्निमूर्त्तिरित्थमभिवन्दिता विद्यते–

यदाप्यायपरा लोकाः स्वे स्वे कर्मणि सङ्गताः।
प्राप्नुवन्ति फलं वन्दे तत्तेजोवपुरैश्वरम्[1]॥

शिवपुराणे रुद्रसंहितायां युद्धखण्डे **भार्गवकृते अष्टमूर्त्तिस्तोत्रे**ऽपि रुद्ररूपधारिणः भगवतः **शिवस्याग्निमूर्त्तिः** एवम्प्रकारेण स्तुताऽस्ति–

विश्वैकपावक! नतावक! पावकैक-
शक्ते ऋते मृतवतामृतदिव्यकार्यम्।
प्राणिष्यदो जगदहो जगदन्तरात्मं-
स्त्वं पावकः प्रतिपदं शमदो नमस्ते[2]॥

4. उग्रः[3]–वायुमूर्त्तिः।

आन्ध्रप्रदेशे तिरुपतौ **'बालाजीवेङ्कटेश'**-मन्दिरादुत्तरस्यां दिशि **'आर्कट'**-

---

(ड) सर्वतः शर्व-सर्वेभ्यः नमस्तेऽस्तु रुद्ररूपेभ्यः।
रुद्राय नमः कालाय नमः कालविकरणाय नम इति।
सर्वो वै रुद्रस्तस्मै रुद्राय नमोनमः।
पुरुषो वै रुद्रः सन्महो नमो नमः।।
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् सर्वो ह्येष रुद्रः तस्मै रुद्राय नमोऽस्तु।।-महानारायणोपनिषत् 8/1

1. अभिनवभातीटीकोपेतं नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालयप्रकाशनम्) तृतीयोऽध्यायः, पृष्ठसंख्या 203
2. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/27
3. वात आवात बेषजं शम्भु मयोभु नो हृदे।
प्रण आयूँषि तारिषत्।-ऋग्वेदः10/1/87

मण्डले **स्वर्णमुखी**तिनाम्न्याः नद्यास्तटे उग्ररूपधारिणः भगवतः शिवस्य **वायुमूर्त्ति**त्वेन **श्रीकालहस्तीश्वराख्यः** वायुलिङ्गः सुप्रतिष्ठितो विद्यते।

अभिनवभारत्याष्टीकायाश्चतुर्थेऽध्याये उग्ररूपधारिणः भगवतः शिवस्य **वायुमूर्त्ति**रभिवन्दिता वरीवर्ति। तद्यथा–

स्वविलासैरिदं विश्वं यो दर्शयति सन्ततम्।
वायुमूर्त्तिं शिवं वन्दे गिरिराजसुताप्रियाम्[1]॥ इति।

एवमेव **शिवपुराणे भार्गवकृतेऽष्टमूर्त्तिस्तोत्रे**ऽप्युग्ररूपधारिणः भगवतः शिवस्य **वायुमूर्त्ति**रुपश्लोकिताऽस्ति। तद्यथा–

त्वं पावने पथि सदा गतिरप्युपास्यः
कस्त्वां विना भुवनजीवन! जीवतीह।
स्तब्धप्रभञ्जनविवर्द्धित-सर्वजन्तो
सन्तोषिताहिकुल! सर्वगः! वै नमस्ते[2]॥ इति।

5. भीमः—व्योममूर्त्तिः, आकाशमूर्त्तिर्वा।

तमिलनाडुप्रान्ते कावेरीनद्यास्तटेऽवस्थिते **'चिदम्बरम्'**–मन्दिरे **भीम**रूप-धारिणः भगवतः शिवस्य **व्योममूर्त्तिः आकाशमूर्त्ति**र्वा **व्योमलिङ्ग**त्वेन सुप्रतिष्ठिता विद्यते। नाट्यशास्त्रस्याभिनवभारतीटीकायाः पञ्चमेऽध्याये **भीमरूप**धारिणः भगवतःशिवस्य **व्योममूर्त्तिः आकाशमूर्त्ति**र्वा सङ्कीर्तिता विद्यते। तद्यथा–

संसारनाट्यनिर्माणे याऽवकाशविधानतः।
पूर्वरङ्गायते व्योममूर्त्तिं तां शाङ्करीं नुमः[3]॥ इति।

---

1. अभिनवभारतीटीकोपेतं नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालयप्रकाशनम्) चतुर्थोऽध्यायः, पृष्ठसंख्या 222
2. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/26
3. अभिनवभारतीटीकोपेतं नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालयप्रकाशनम्) पञ्चमोऽध्यायः, पृष्ठसंख्या 497

शिवपुराणे **भार्गवविहितेऽष्टमूर्त्तिस्तोत्रे**ऽपि **भीम**रूपधारिणः भगवतः शिवस्य **व्योममूर्त्तिः आकाशमूर्त्ति**र्वा स्तुता विद्यते। तद्यथा–

आकाशरूप! बहिरन्तरुतावकाश-
दानाद्विकस्वरमिहेश्वर! विश्वमेतत्।
त्वत्तः सदा सदय! संश्वसिति-स्वभावा-
त्सङ्कोचमेति भवतोऽस्मि नतस्ततस्त्वाम्[1]।। इति।

किं बहुना **महाकविना कालिदासेनापि कुमारसंभवमहाकाव्ये भीम**रूप-धारिणः भगवतः शिवस्य **व्योममूर्त्तिः आकाशमूर्त्ति** र्वा निम्नरूपेण वर्णिताऽस्ति–

अकिञ्चनः सन् प्रभवः स सम्पदां
त्रिलोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव इत्युदीर्यते।
न सन्ति याथार्थ्यविदः पिनाकिनः[2]।। इति।

6. पशुपतिः[3]–क्षेत्रज्ञमूर्त्तिः/आत्ममूर्त्तिः/यजमानमूर्त्ति र्वा।

---

1. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/29
2. कुमारसंभवमहाकाव्यम् 5/77
3. (क) सर्वथा यत्पशून् पाति तैश्च यद् रमते सह।
   तेषामधिपतिर्यश्च तस्मात् पशुपतिः स्मृतः।।-महाभारतम् 7/173/82
   (ख) ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः।
   पशवः परिकीर्त्यन्ते संसारवशवर्तिनः।।
   तेषां पतित्वाद् भगवान् रुद्रः पशुपतिः स्मृतः।।
   -लिङ्गपुरारणम् (उत्तरखण्डः) 9/12
   (ग) अहञ्च सर्वविद्यानां पतिराद्यः सनातनः।
   अहं वै पतिभावेन पशुमध्ये व्यवस्थितः।।
   अतः पशुपतिर्नाम त्वं लोके ख्यातिमेष्यसि।।-वायुपुराणम्

पशूनां स्थावरजङ्गमानां पतिः शिवः, इत्यमरः 1/1/22

नेपालदेशे **पशुपतिनाथा**भिधाना भगवतः शिवस्य **क्षेत्रज्ञमूर्त्ति/ यजमानमूर्त्तिः/आत्ममूर्त्ति** र्वा सुप्रतिष्ठिताऽस्तीति **शिवपुराणं** स्पष्टयति। तद्यथा–

नयपालपुर्यां तु प्रसिद्धायां महीतले।
लिङ्गं पशुपतीशाख्यं सर्वकामफलप्रदम्[1]।। इति।

शिवपुराणस्यान्यान्यपि पद्यजातानि पूर्वोक्तं तथ्यं परिपोषयन्ति। तद्यथा–

स नीलकण्ठो ह्यद्यापि वर्त्तते मुनिपुङ्गव!
पृथिव्यां भारते वर्षे नेपालं क्षेत्रमास्थितम्।।
क्षेत्रं नेपालसंज्ञञ्च महासिद्धिप्रदायकम्।
सिद्ध्यर्थं सर्वसिद्धीनां स्वयं रुद्रेण निर्मितम्।।

अपि च–

क्षेत्रश्रेष्ठे च नेपाले यः पश्येन्नीलकन्दरम्।
तस्य पापानि नश्यन्ति ब्रह्महत्यादिकानि च[2]।।

भार्गवविहिते**ऽष्टमूर्त्तिस्तोत्रे** भगवतः शिवस्य **पशुपतिनाथाख्या यजमानमूर्त्तिः/क्षेत्रज्ञमूर्त्ति/आत्मूर्त्ति** र्वा निम्नतयाऽभिवन्दिता विद्यते–

आत्मस्वरूप! तव रूपपरम्पराभि-
राभिस्ततं हर! चराचररूपमेतत्।

(घ) देवादयः पिशाचान्ताः पशवः परिकीर्त्तिताः।
तेषां पतित्वात् सर्वेशो भवः पशुपतिः स्मृतः।।
-लिङ्गपुराणम् (पूर्वार्द्धः) 7/54

1. शिवपुराणम् 4/11/18
2. तदेव (उत्तरखण्डः) 32/50-52

सर्वान्तरात्मनिलय! प्रतिरूपरूप!
नित्यं नतोऽस्मि परमात्मजनोऽष्टमूर्त्तेः[1]**॥**

श्रीमद्भगवद्गीतायां पार्थं प्रति भगवान् **श्रीकृष्णोऽपि** कथयति–

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ इति।

तमेव शरणं गच्छ सर्वभावेन भारत!।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्[2]**॥** इति च।

तदयमभिप्रायः–समेषां प्राणिनामात्मतत्त्वान्यन्ततोगत्वा परमार्थतः भगवतःपशुपतिनाथस्यात्मनि तथैवान्तर्भवन्ति यथा हि सुविस्तीर्णे समुद्रे जलविन्दवः संविशन्तीति। **अनुभूतिप्रकाशा**भिधःवेदान्तग्रन्थोऽप्यत्र निम्नपद्येन प्रमाणं प्रस्तौति। तत्पद्यं यथा–

आत्मानन्दसमुद्रस्य विप्रुषो विषयाः स्थिताः।
आत्मन्यन्तर्भवन्त्येते समुद्रे विन्दवो यथा[3]**॥** इति।

महाभारते शान्तिपर्वणि भीष्मपितामहविहिते **स्तवराजे**ऽपि जगन्निर्मिति-विषये पद्यमिदमासाद्यते–

यस्मिन् विश्वानि भूतानि तिष्ठन्ति च विशन्ति च।
गुणभूतानि भूतेशे सूत्रे मणिगणा इव[4]**॥** इति।

---

1. शिवपुराणम्, रुद्रसंहितायां युद्धखण्डः 50/31
2. भगवद्गीता 18/61-62
3. नाट्यशास्त्रस्याभिनवभारत्यां टीकायां द्वितीये भागे उद्धृतं पद्यम्, काशीहिन्दू-विश्वविद्यालयप्रकाशनम्, पृष्ठसंख्या 1020
4. महाभारतम् (शान्तिपर्वणि) 47/11

एवञ्च–

यस्मिन् सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः।
यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः[1]॥ इति च।

एवमेव **भागवते गजेन्द्र**कृते स्तोत्रेऽपि–

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम्[2]॥ इति।

शिवपुराणेऽवस्थितमुमावचनमपि पूर्वपल्लवितं तथ्यं परिपोषयति। तत्पद्यं यथा–

आब्रह्मस्तम्भपर्यन्तं भस्मीकृत्य चराचरम्।
महाप्रलयकाले च श्मशाने चरते हरः[3]॥ इति।

7. ईशानः–सूर्यमूर्त्तिः[4]।

काश्यां केदारखण्डे अस्सीघट्टसमीपे **भद्रवनी** (भदैनी) स्थले

---

1. महाभारतम् (शान्तिपर्वणि) 47/54
2. भागवतम् 8/3/3
3. शिवपुराणम् 14/71
4. (क) 'सत्यं तदिन्द्रो दशाभिर्दशग्वैः सूर्यं विवेद, तमसि क्षियन्तं सरति गच्छति वा सुरयति प्रेरयति वा तत्तद् व्यापारेषु कृत्स्नं जगदिति सूर्यः।
-ऋग्वेद 1/105/12
(ख) सविता हरः।-ऋग्वेदसंहिता 10/158/2
(ग) ज्योतिर्हरः।-निरुक्तम् 4/191
(घ) सूर्याद् वै खल्विमानि भूतानि जायन्ते। सूर्याद्यज्ञात्पर्जन्योऽन्नमात्मा। नमस्ते आदित्याय। त्वमेव केवलं कर्त्ताऽसि। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं रुद्रोऽसि। त्वमेव प्रत्यक्षमृगसि।

लोलार्ककुण्डः विराजते। तत्रैव **ईशानरू**पधारिणः भगवतः शिवस्य **सूर्यमूर्त्तिः लोलार्केश्वर**नाम्ना ख्यातिं भजते[1]।

उत्कलप्रान्तेऽवस्थितं **कोणार्क**मन्दिरमपि **सूर्यमन्दिर**त्वेन प्रसिद्धिं लभते। **पूर्वगङ्गवंशीयः नरसिंहदेवः** (प्रथमः) 1255 ख्रिष्टाब्द्यां मन्दिरमिदं निर्मापयामास। मन्दिरेऽस्मिन् भगवतः शिवस्य **सूर्यमूर्त्ति**र्नैव प्रतिष्ठापिता विद्यते। किन्तु श्रूयते यत् प्रायश; प्रतिद्विशतवर्षानन्तरमेकस्मिन् दिने उदीयमानसूर्यस्य मनोरमं प्रखरबिम्बं **कोणार्क**मन्दिरस्य गर्भगृहे समवलोक्यते। तस्मादेव कारणान्मन्दिरमिदं **सूर्यमन्दिर**मित्य-भिधीयते। एवमेव **कम्बोडियादेशे**ऽपि **अङ्कोरवाट**नगरे भगवतः सूर्यस्य विश्व-प्रसिद्धमतीव भव्यं मन्दिरं निर्मापितं विद्यते। ख्रिष्टाब्दस्य 1112 तः 1153 मध्ये **अङ्कोरवाट**नगरस्य शासकः **सूर्यवर्मनाख्यः** (द्वितीयः नृपः) मन्दिरमिदं निर्मापितवान्। **अङ्कोरवाट**नगरस्य प्राचीनमभिधानं **'यशोधरपुरम्'** आसीत्। नगरेऽस्मिन् प्रवहमानायाः **'मीनाङ्ग'**नाम्न्याः नद्यास्तटे **'सिमरिय'** नामके क्षेत्रे मन्दिरमिदमवस्थितं वरीवर्ति। मन्दिरेऽस्मिन् भगवतः विष्णोः मूर्त्तिः प्रतिष्ठापिता विद्यते, न तु भगवतःशिवस्य, तथ्यमिदमन्तर्जालमाध्यमेन परिज्ञायते।

त्वमेव प्रत्यक्षं यजुरसि। त्वमेव प्रत्यक्षं सामासि। त्वमेव प्रत्यक्षमथर्वासि। त्वमेव सर्वं छन्दोऽसि।

आदित्याद् वायुर्जायते। आदित्याद् भूमिर्जायते। अदित्यादापो जायते। आदित्याज्ज्योतिर्जायते। आदित्याद् व्योम-दिशो जायन्ते। आदित्याद्देवाः जायन्ते। आदित्याद्वेदाः जायन्ते। आदित्यो वा एष एतन्मण्डलं जनयति। असावादित्यो ब्रह्मा। आदित्योऽन्तःकरणमनोबुद्धिश्चित्ताहङ्काराः। आदित्यो वै व्यानः समानोदानापानः प्राणाः। आदित्यो वै श्रोत्र-त्वक्-चक्षु-रसानसः। आदित्यो वै शब्द-स्पर्श-रूपरसगन्धाः। आदित्यो वै वचनादान-गमनानन्दविसर्गाः। आनन्दमयो, ज्ञानमयो, विज्ञानमय आदित्यः। सूर्याथर्वशिरस, पृष्ठसं0 3

1. पौराणिककोशः–राणाप्रसादशर्मा, पृष्ठसंख्या 536

शिवपुराणस्याधस्तनं पद्यमत्रावलोकनीयम्–

आदित्यञ्च शिवं विद्याच्छिवमादित्यरूपिणम्।
उभयोरन्तरं नास्ति ह्यादित्यस्य शिवस्य चेति[1]॥

अस्य जगतः सृष्टिमूले भगवतः सूर्यस्योपादेयत्वं भविष्यपुराणे विस्तरेण समुपवर्णितं विद्यते।

भूतग्रामस्य सर्वस्य सर्वहेतुर्दिवाकरः।
अस्येच्छया जगत्सर्वमुत्पन्नं सचराचरम्॥
आदित्यमूलमखिलं त्रैलोक्यं सचराचरम्।
भवत्यस्माज्जगत्सर्वं सदेवासुरमानुषम्॥
सर्वात्मा सर्वलोकेशो देवदेवः प्रजापतिः।
सूर्य एव त्रिलोकस्य मूलं परमदैवतम्॥
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः॥
सूर्यात् प्रसूयते सर्वं तस्मिन्नेव प्रलीयते।
भावाभावौ तु लोकानामादित्यान्निसृतौ पुरा[2]॥

अपि च–

एष वेदाश्च यज्ञाश्च सर्वश्चैव न संशयः।
सूर्यव्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम्॥
इत्येते द्वादशादित्या जगत्पालात्मको रविः।
सर्वत्र सवितादेवस्तनुभिर्नामभिश्च सः॥

---

1. शिवपुराणस्य पद्यमिदं कल्याणपत्रिकायां शिवपुराणाङ्के 633 पृष्ठे उद्धृतं विद्यते।
2. भविष्यपुराणम् 78/41-45

वसत्यग्नौ तथा वाते व्योम्नि तोये तथा विभो।
एवं विधो ह्ययं सूर्य; सदा पूज्यो विजानता[1]॥

एवञ्च–

आदित्यस्यादिदेवत्वादजातत्वादजः स्मृतः।
देवेषु स महान्देवो महादेवस्ततः स्मृतः॥
सर्वेशत्वाच्च लोकस्य अधीशत्वाच्च ईश्वरः।
बृहत्वाच्च स्मृतो ब्रह्मा भवत्वाद्भव उच्यते॥
पाति यस्मात् प्रजाः सर्वाः प्रजापतिरतः स्मृतः।
पुरे शेते च वै यस्मात्तस्मात् पुरुष उच्यते॥
नोत्पाद्यत्वादपूर्वत्वात् स्वयम्भूरिति विश्रुतः[2]॥ इति च।

भविष्यपुराणे एव भगवन्तमादित्यमभिलक्ष्य **शतानीक**प्रभृतीन् ऋषीन् सम्बोधयन् **ब्रह्मदेवः** कथयति–

आदिदेवोऽसि देवानामीश्वराणां त्वमीश्वरः।
आदिकर्त्ताऽसि भूतानां देवदेव! सनातन!॥
जीवनं सर्वसत्त्वानां देवगन्धर्वराक्षसाम्।
मुनिकिन्नरसिद्धानां तथैवोरगपक्षिणाम्॥
त्वं ब्रह्मा त्वं महादेवस्त्वं विष्णुस्त्वं प्रजापतिः।
वायुरिन्द्रश्च सोमश्च विवस्वान् वरुणस्तथा॥
त्वं कालः सृष्टिकर्त्ता च हर्त्ता त्राता प्रभुस्तथा।
सरितः सागराः शैला विद्युदिन्द्रधनूँषि च॥
ईश्वरात् परतो विद्या विद्यायाः परतः शिवः।
शिवात्परतरो देवस्त्वमेव परमेश्वरः[3]॥

---

1. भविष्यपुराणम् 78/76-78
2. तदेव 77/12-15
3. तदेव 123/11-15

तदनन्तरं सर्वे देवाः सम्भूय निम्नपद्येषु सूर्यस्य स्तोत्रं चक्रुः-

नमस्ते रविरूपाय सोमरूपाय ते नमः।
नमो यजुःस्वरूपायाथार्वाङ्गिरसे नमः॥
ज्ञानैकधामभूताय निर्धूततमसे नमः।
शुद्धज्योतिःस्वरूपाय निस्तत्त्वायामलात्मने॥
संसारहेतवे चैव संध्याज्योत्स्नाकृते नमः।
त्वं सर्वमेतद्भवान् जगद् वै भ्रमति त्वया॥
भ्रमत्वाद् विद्धमखिलं ब्रह्माण्डं सचराचरम्।
त्वदंशुभिरिदं सर्वं संसृष्टं जायते शुचिः॥
क्रियते त्वत्करस्पर्शाज्जलादीनां पवित्रता।
होमदानादिको धर्मो नोपकाराय जायते॥
तावद्यावन्न संयोगी जगत्यत्र भवाञ्छुचिः[1]॥

शिवपुराणे वायवीयसंहितायामपि सर्वे देवाः **ईशानरूपं** भगवन्तं **शिवमभिलक्ष्य** ऊचुः-

भगवन्! केन मार्गेण पूजनीयोऽसि भूतले।
कस्याधिकारः पूजायां वक्तुमर्हसि तत्त्वतः॥
ततः सस्मितमालोक्य देवीं देववरो हरः।
स्वरूपं दर्शयामास घोरं सूर्यात्मकं परम्॥
सर्वैश्वर्यगुणोपेतं सर्वतेजोमयं परम्।
शक्तिभिर्मूर्त्तिभिश्चाङ्गैर्ग्रहैर्देवैश्च संवृतम्॥
अष्टबाहुं चतुर्वक्त्रमर्द्धनारीकमद्भुतम्।
दृष्ट्वैवमद्भुताकारं देवा विष्णुपुरोगमाः॥

1. भविष्यपुराणम् 123/64-65, 68-70

बुद्ध्वा दिवाकरं देवं देवीञ्चैव निशाकरम्।
पञ्चभूतानि शेषाणि तन्मयञ्च चराचरम्[1]।। इति।

नाट्यशास्त्रस्याभिनवभारत्याष्टीकाया अष्टादशाध्याये ईशानरूपधारिणः भगवतः शिवस्य सूर्यमूर्त्तिरभिवन्दिता विद्यते। तद्यथा–

रूपं यदेतद् बहुधा चकास्ति तद्येन भावी भविता न जातु।
तच्चक्षुरर्कात्मकमीश्वरस्य वन्दे वपुस्तैजससारधाम्नः[2]।। इति।

बृहज्जातकनाम्नि ज्योतिषग्रन्थरत्ने दैवज्ञशिरोमणि**र्वराहमिहिरो**ऽपि भगवतःशिवस्य **सूर्यमूर्त्तिं** निम्नपद्येन स्तौति–

मूर्त्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुश्च जगतां भर्त्ताऽमरज्योतिषाम्।
लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः[3]।।

किमधिकेन **महाभारते**ऽवस्थिते **आदित्यहृदयस्तोत्रे**ऽपि **श्रीकृष्णः पाण्डवान्** सम्बोध्य भगवतः शिवस्य **सूर्यमूर्त्ति**मनया रीत्या स्तौति–

नमो वै कल्पनाशाय नमस्ते दिव्यचक्षुषे।
त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः।।
त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च।
त्वमेव प्रकृतेः परः पुरुषोऽव्यक्तसनातनः[4]।।

---

1. शिवपुराणम् (वायवीयसंहिता) 8/26-30
2. अभिनवभारतीटीकोपेतं नाट्यशास्त्रम्, (काशीहिन्दूविश्वविद्यालयप्रकाशनम्) अष्टादशोऽध्यायः, पृष्ठसं0 1463
3. बृहज्जातकस्य मङ्गलाचरणम्।
4. आदित्यहृदयस्तोत्रम्, पद्यसंख्या 63, 64

शिवपुराणीयेऽष्टमूर्त्तिस्तोत्रेऽपि **ईशान**रूपधारिणः भगवतः शिवस्य **सूर्यमूर्त्तिः** स्तुताऽस्ति। तद्यथा–

त्वं भाभिराभिरभिभूय तमः समस्त-
मस्तं नयस्यभिमतानि निशाचराणाम्।
देदीप्यसे दिवमणे! गगने हिताय
लोकत्रयस्य जगदीश्वर! तन्नमस्ते[1]॥ इति।

8. महादेवः[2]—सोममूर्त्तिः, चन्द्रमूर्त्ति र्वा।

महांश्चासौ देवश्चेति यद्वा महतां देवादीनां देवः, शिवः इत्यमरः, 1/1/34

महादेवरूपधारिणः भगवतः शिवस्य **सोममूर्त्ति**रिवामृतबिन्दुभिः पितेव सखेव च समग्रं विश्वं परिपोषयतीति **ऋग्वेदो**ऽप्यभिधत्ते। तद्यथा–

शम्भो भव हृद आपीत इन्द्रो
पितेव सोम-सूनवे सुशेवः।
सखेव सख्य उरुशंस धीरः
प्राण आयुर्जीवसे सोम तारीः[3]॥

---

1. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/24
2. (क) सर्वान् देवान् ऋषींश्चैव समेतानसुरैस्सह।
   अत्येति तेजसा देवो महादेवस्ततः स्मृतः।।
   -वायुपुराणम्, पूर्वार्द्धभागः 10/16

   (ख) देवानां सुमहान् यच्च यच्चास्य विषयो महान्।
   यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः।।
   -महाभारतम्, अनुशासनपर्वः 161/8

   (ग) ब्रह्मादीनां सुराणाञ्च मुनीनां वेदवादिनाम्।
   महती पूजिता विश्वे मूलप्रकृतिरीश्वरी।
   तस्याः देवः पूजितश्च महादेवः स च स्मृतः।।
   -ब्रह्मवैवर्त्तपुराणम्, प्रकृतिखण्डः 56/68
3. ऋग्वेदसंहिता 8/48/4

सौराष्ट्रे प्रभासक्षेत्रे (आधुनिके गुजरातप्रान्ते काठिवावाड़मण्डले) **महादेव**रूपधारिणः भगवतःशिवस्य **सोममूर्त्तिः**, **चन्द्रमूर्त्ति** र्वा विराजमानाऽस्ति, भगवतः शिवस्य द्वादशसंख्याकेषु ज्योतिर्लिङ्गेषु **सोमनाथो**ऽप्यन्यतमःवरीवर्ति। एवमेव पूर्वबङ्गप्रान्ते (आधुनिके बङ्गलादेशे) **चन्द्रनाथक्षेत्रे**ऽपि भगवतः शिवस्य **चन्द्रमूर्त्ति** सुशोभते। अत्रत्या **चन्द्रमूर्त्तिरियं चंन्द्रनाथा**भिधानेन ख्यातिं लभते। भगवतः**चन्द्रनाथ**स्य मन्दिरमिदं **चटगाँव** (Chittagon)–नगरादुत्तरपूर्वदिग्भागे एकस्मिन् पर्वतेऽवस्थितं विद्यते। अपि च **तीर्थराजे प्रयागे अलर्कक्षेत्रे** आधुनिके **अरैल**ग्रामेऽपि **महादेव**रूपधारिणः भगवतः शिवस्य **सोममूर्त्तिः सोमेश्वरनाथ**-शिवलिङ्गनाम्ना प्रसिद्धिं लभते। श्रूयते यद् बहुपत्नीकश्चन्द्रदेवः रोहिणीनामधेयां स्वपत्नीं समधिकं स्निह्यतिस्म। तस्मादेव कारणात् **प्रजापतिर्दक्ष**स्तं शशाप। तच्छापवशादसौ क्षयरोगग्रस्तो जातस्तदनु **ब्रह्मदेव**स्य परामर्शानुसारं **चन्द्रदेवो**ऽयं **तीर्थराजं प्रयाग**मागत्य त्रिवेणीसङ्गमक्षेत्रस्य दक्षिणे दिग्भागे **अलर्क** (अरैल) सम्भागे भगवतः शिवस्य **सोममूर्त्तिं** स्वयमेव संस्थाप्य तत्र मृत्युञ्जयमन्त्रस्य जप-होम-तर्पण-मार्जनादिकञ्चकार। तत्पूजार्चनप्रभावादसौ **चन्द्रदेवः** रोगमुक्तो जातः। अत एवात्रत्यं शिवलिङ्गमपि **सोमेश्वरनाथमहादेव**–नाम्ना ख्यातिं भजते।

अभिनवभारत्याष्टीकायाः **षष्ठाध्याये**, **महादेव**रूपधारिणः भगवतः शिवस्य **चन्द्रमूर्त्तिः** स्तुता विद्यते। तद्यथा–

आप्यायन्तीं जगत्कृत्स्नं प्रक्षरन्तीं रसामृतम्।
चन्द्रमूर्तिं प्रभोर्वन्दे सरसां सुमनोहराम्[1]॥ इति।

शिवपुराणे भार्गव-(शुक्राचार्य) **कृते ऽष्टमूर्त्तिस्तोत्रे**ऽपि **महादेव**रूप-धारिणः भगवतःशिवस्य **सोममूर्त्तिः चन्द्रमूर्त्ति**र्वाऽभिवन्दिता विद्यते। तद्यथा–

लोकेऽतिवेलमतिवेलमहामहोभि-
र्निर्मासि कौ च गगनेऽखिललोकनेत्रः।

---

1. अभिनवभारतीटीकोपेतं नाट्यशास्त्रम् (दिल्लीप्रकाशनम्), पृष्ठसं0397

विद्राविताखिलतमाःसुतमो हिमांशो!
पीयूषपूरपरिपूरित! तन्नमस्ते[1]।। इति।

खगोलविज्ञानं स्पष्टयति यत् चन्द्रमण्डले स्वप्रकाशःनैव भवति। चन्द्रमण्डलन्तु सूर्यमण्डलेन प्रकाशमवाप्नोतीति विपश्चिदपश्चिमानामनुमतं मतम्। एतावता **महाकविः कालिदासोऽपि** सूर्यमण्डल एव चन्द्रमण्डलस्यापि निवासस्थानं स्वीकुर्वन् स्वप्रणीते **विक्रमोर्वशीये नाटके** निम्नपद्येन भगवतःशिवस्य **चन्द्रमूर्त्तिं** स्तौति–

रविमावसते सतां क्रियायै
सुधया तर्पयते सुरान् पितॄंश्च।
तमसां निशि मूर्च्छतां निहन्त्रे
हरचूडानिहितात्मने नमस्ते[2]।।

गोवनतृतीयस्याभिलेखे (शिलालेखे) मङ्गलपद्यमेकमुत्कीर्णमास्ते, यत्र भगवतः**शिवस्याष्टावेव मूर्त्त**यश्चित्रिताः वर्त्तन्ते। तत्पद्यं यथा–

आधारो धरणी सुधांशुतरणी ह्लादप्रकाशप्रदा-
वाकाशस्त्ववकाशदोऽथ जगतःपाकप्रदःपावकः।
प्राणो वायुरथायुरम्बुहविषामाप्यायको दायको
यन्मूर्त्यष्टकभावितं जगदिदं पायात्स वः शङ्करः[3]।। इति।

महाकविः कालिदासोऽपि स्वप्रणीते **'मालविकाग्निमित्रम्'**, नामधेये नाटके **'अभिज्ञानशाकुन्तलम्'** नाटके च नान्दीपद्यरूपेण **अष्टमूर्त्तिधारिणं** भगवन्तं शिवं स्तौति। **मालविकाग्निमित्रनाटके** तत्पद्यं यथा–

---

1. शिवपुराणम् (रुद्रसंहितायां युद्धखण्डः) 50/25
2. विक्रमोर्वशीयं नाटकम् 3/7
3. मङ्गलमणिमाला (प्रथमभागः), पद्यसंख्या 1014, पृष्ठसं0 180, संपादिका- डॉ0 बीना मिश्रा, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझा-परिसरः, प्रयागः।

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासम्मिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः[1]॥ इति।

अभिज्ञानशाकुन्तलनाटकेऽपि–

या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः[2]॥ इति।

पौराणिककाले भगवतः शिवस्य शापवशान्मर्त्यवपुर्धारिणा शिवानुचरेण **गन्धर्वराजपुष्पदन्तेना**पि स्वप्रणीते **श्रीशिवमहिम्नः स्तोत्रे शिवस्याष्टौ मूर्त्तय**स्तत्तदभिधानोल्लेखपुरस्सरं सङ्कीर्त्तितास्सन्ति। तत्पद्यं यथा–

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः
त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि[3]॥

अपि च–

भवः शर्वो रुद्रः पशुपतिरथोग्रःसह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।

---

1. मालविकाग्निमित्रम् (नान्दीपाठः)
2. अभिज्ञानशाकुन्तलम् (नान्दीपाठः)
3. श्रीशिवमहिम्नः स्तोत्रम्, पद्यसंख्या 26

अमुष्मिन्प्रत्येकं प्रविचरति देव! श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते[1]॥ इति।

अन्यच्च–

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव[2]॥ इति।

कृष्णयजुर्वेदीय-**रुद्रहृदयोपनिषदि** भगवतः रुद्रस्य त्रिमूर्त्तित्वमुपमानोपमेय-भावेन निपुणं निरूपितमस्ति। तद्यथा–

अस्य त्रैलोक्यवृक्षस्य भूमौ विटपशाखिनः।
अग्रं मध्यं तथा मूलं विष्णु-ब्रह्म-महेश्वराः॥
कार्यं विष्णुः क्रिया ब्रह्मा कारणं तु महेश्वरः।
प्रयोजनार्थं रुद्रेण मूर्त्तिरेका त्रिधा कृता॥
धर्मो रुद्रो जगद्विष्णुः सर्वज्ञानं पितामहः[3]॥

किं बहुना, तत्रैवाजन्मनः रुद्रस्य सर्वदेवात्मकत्वमपि निरूपितमस्ति। तद्यथा–

सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः॥ इति।
वामपार्श्वे उमादेवी विष्णुःसोमोऽपि ते त्रयः।
या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः[4]॥ इति च।

---

1. श्रीशिवमहिम्नः स्तोत्रम् 28
2. तदेव, 7
3. रुद्रहृदयोपनिषद् 13-15
4. तदेव, 3-4

एतावता भगवान् सदाशिवः उमारूपं भगवन्तं विष्णुं स्वहृदये धारयति, विष्णुस्थानीयं चन्द्रञ्च भक्तिभावेन स्वोत्तमाङ्गे स्थापयति। अत एव तत्रैवोल्लिखितं विद्यते यत्–

ब्रह्मविष्णुमयो रुद्रः अग्नीषोमात्मकं जगत्।
पुल्लिङ्गं सर्वमीशानं स्त्रीलिङ्गं भवत्युमा॥
उमारुद्रात्मिकास्सर्वाः प्रजाः स्थावरजङ्गमाः।
व्यक्तं सर्वमुमारूपमव्यक्तं तु महेश्वरः॥
उमा-शङ्करयोर्योगः स योगी विष्णुरुच्यते।
यस्तु तस्मै नमस्कारं कुर्याच्छक्तिसमन्वितः॥
आत्मनं परमात्मानमन्तरात्मानमेव च।
ज्ञात्वा त्रिविधमात्मानं परमात्मानमाश्रयेत्[1]॥ इति च।

अपि च–

ये नमस्यन्ति गोविन्दं ते नमस्यन्ति शङ्करम्।
येऽर्चयन्ति हरिं भक्त्या तेऽर्चयन्ति वृषध्वजम्॥
ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम्।
ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम्॥
रुद्रात् प्रवर्त्तते बीजं बीजयोनिर्जनार्दनः।
यो रुद्रः स स्वयं ब्रह्मा यो ब्रह्मा स हुताशनः[2]॥ इति च।

शिवपुराणे कुवेरः भगवन्तं **साम्बशिवमनेन** प्रकारेण स्तौति–

यतः सर्वाणि भूतानि स्थावराणि चराणि च।
सम्भवन्ति प्रलीयन्ते यस्मिन्नेतं नमाम्यहम्॥

---

1. रुद्रहृदयोपनिषद् 5-8
2. तदेव, 9-11

योऽसृजद् दक्षिणाङ्गाद् ब्रह्माणं सृष्टिकारणम्।
वामपार्श्वात्तथा विष्णुं तमहं शरणं व्रजे॥
यं न जानन्ति तत्त्वज्ञा वेदा तद्विद ईश्वरम्।
तमहं शरणं याचे पूर्णब्रह्मसनातनम्॥
ओतप्रोतं च येनेदं व्याप्तं वै सचराचरम्।
तमहं शरणं याचे सर्वविद्यामयं परम्[1]॥ इति च।

शिवपुराणे भगवान् **शिवः** हरिं सम्बोध्य स्वयं कथयति–

सहोवाचाहमत्राङ्ग-जगत्सर्वं चराचरम्।
करिष्यामि स्वयं भूत्वा अष्टमूर्त्तिधरो हरे![2]॥

कालिकापुराणे एकादशाध्याये हरिं प्रति हरस्य वचनं त्रिदेवानामैक्यभावं प्रकटयति। तद्यथा–

न ब्रह्मा भवतो भिन्नो न शम्भुर्ब्रह्मणस्तथा।
न चाहं युवयोर्भिन्नो ह्यभिन्नत्वं सनातनम्[3]॥ इति।

अपि च–

सृष्टिस्थित्यन्तकरणादेक एव महेश्वरः।
ब्रह्मा विष्णुः शिवश्चेति संज्ञामाप पृथक् पृथक्[4]॥ इति च।

एतावता सम्पूर्णं जगदिदं कौतुकावलोकनतत्परस्याष्टमूर्त्तिधारिणः स्वशक्तिसम्पन्नस्य भगवतः सदाशिवस्य **इच्छाशक्तेः ज्ञानशक्तेः क्रियाशक्तेश्च**

---

1. शिवपुराणम् 39/5-8
2. तदेव 64/13
3. कालिकापुराणम् (एकादशोऽध्यायः)
4. तदेव (द्वादशाध्यायः)

प्रसारूपमिति पर्यवसितार्थः। प्रसङ्गेऽस्मिन् महामाहेश्वरः **सोमानन्दो**ऽपि स्वग्रन्थरत्ने '**शिवदृष्टा**'वभिधत्ते–

इत्थं शिवो बोधमयः स एव परनिर्वृतिः।
सैव चोन्मुखतां याति सेच्छा-ज्ञान-क्रियात्मताम्[1]॥ इति।

अयं हि **सोमानन्दः** पूर्वोक्तपद्यस्य व्याख्याक्रमे जगन्निर्माणस्य गूढतमं रहस्यमुपमानोपमेयभावमवलम्ब्य समधिकं स्पष्टति। तद्यथा–

यथा हि कश्चिन्नृपः आनन्दोपलब्धिहेतवे। पदातिसम्बन्धीनि चेष्टितान्याचरति, तथैव बोधमात्रस्वरूपः महानाट्यरसिकः परमशिवोऽपि जगन्निर्माणौपयिकं त्रैलोक्यनाटकं कुरुते। एवमेव सृष्टि-स्थिति-प्रलयाख्यकार्यत्रयविभागयोगात्स एव लीलानटः सशक्तिकः सदाशिव आत्मानं त्रिधा विभज्य 'ब्रह्मेति', 'विष्णुरि'ति, 'रुद्र' इति च तत्तदभिधानान्तरेण व्यपदिश्यते[2]।

प्रसङ्गेऽस्मिन् **शिवपुराणस्या**धस्तनं पद्यजातमुपोद्बलकं प्रमाणं प्रस्तौति। तद्यथा–

उत्पद्यते यतः सर्वं येनैतत्पाल्यते जगत्।
यस्मिंश्च लीयते तद्धि येन सर्वमिदं ततम्॥
तदेव शिवरूपं हि पठ्यते च मुनीश्वराः[3]॥ इति।

एतावता सृष्टिस्थितिप्रलयाख्यकार्यत्रयसम्पदकानां **ब्रह्म-विष्णु-महेशानां** त्रिदेवानामभेदभावमङ्गीकुर्वता कविकुलगुरुणा **महाकविना कालिदासेन** स्वप्रणीतस्य **कुमारसंभवमहाकाव्यस्य** सप्तमे सर्गे पद्यमिदं व्यलेखि–

एकैव मूर्त्तिर्विभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम्।

---

1. शिवदृष्टिः 1/39
2. तदेव, 1/20-22, 37-38
3. शिवपुराणम् 4/41/8-9

विष्णोर्हरस्तस्य हरिः कदाचिद्
वेधास्तयोस्तावपि धातुराद्यो[1]।। इति।

विषयेऽस्मिन् **महाकविर्विद्यापतिरपि** स्वप्रणीते **'पुरुषपरीक्षा'**-नामके ग्रन्थरत्ने लिलेख–

विष्णुं केऽपि निवेदयन्ति गिरिजानाथञ्च केचित्तथा।
ब्रह्माणं प्रभुमालपन्ति भुवने नाम्नैव भेदो ह्ययम्[2]।। इति।

पूर्वोक्तपर्यालोचनेनैतत्सुस्पष्टं भवति यद् भवगतो भूतभावनस्य सदाशिवस्य सृष्टिस्थितिसंहृति-निग्रहानुग्रहाख्यपञ्चविधकृत्यकारित्वपरिणामरूपं जगदिदमिति विदितचरम्। तथ्यमिदं शिवपुराणे भगवता सदाशिवेन स्वयमेवाङ्गीकृतम्। तद्यथा–

सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्युनुग्रहः।
पञ्चैव मे जगत्कृत्यं नित्यसिद्धावजाच्युतौ[3]।। इति।

'अज'-पदेनात्र अजन्मनः हरापरपर्यायस्य भगवतः शिवस्य ग्रहणम्, **'अच्युत'**-पदेन च हरिपदवाच्यस्य भगवतः विष्णोर्ग्रहणं बोभवीति। उभेऽपि **हरिहरपदे** एकेनैव हृ-धातुना निष्पद्येते। तद्यथा–**हृ + पचाद्यच्**, 3/1/134 = **हरः**, हरति पापानीति। **शिवः** इत्यमरः। **शिवः**, पुंल्लिङ्गान्तं संज्ञापदम्। **शी-सर्वनिवृष्वेति, उणादि**, 1/153 इति **'वन्'**-प्रत्ययः। शिवस्य व्युत्पत्तिर्यथा–

'शिवं कल्याणं विद्यतेऽस्येति शिवः।
श्यति अशुभानीति वा।
शेरते अवतिष्ठन्ते अणिमादयो अष्टौ गुणा
अस्मिन्निति वा'।

---

1. कुमारसम्भवमहाकाव्यम् 7/44
2. पुरुषपरीक्षा (द्वाविंशतिसात्त्विककथासु धर्मकथा, पद्यसंख्या 7
3. शिवपुराणम् 1/10/2

'श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं
शुभम्', इत्यमरकोशः।
'शिवो मोक्षे च क्षेमे च महादेवे सुखेति' विश्वकोशः।

हरिरपि पुंल्लिङ्गान्तं संज्ञापदम्। 'हृ-धातुना हृ-पिषि रुहीति, उणादि 4/139 इति इन्-प्रत्यये कृते सति **हरिः** पदं निष्पद्यते। हरति पापानीति **हरिः**, विष्णुरित्यपरपर्यायः। तद्व्युत्पत्तिर्यथा–

सर्वव्यापकत्वाद् वेवेष्टि अर्थाद् व्याप्नोति विश्वं योऽसौ विष्णुः।
विष्णाति अर्थाद् वियुनक्ति भक्तान्, मायामलापसारेणेन
संसारादिति वा।
विशन्ति सर्वभूतानि अत्रेति वा।
यस्माद् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः।
तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्[1]॥
इत्यमरकोशटीकायां भरतः स्पष्टयति।

शिवपुराणे रुद्रसंहितायामुपन्यस्तं निम्नपद्यमपि हरि-हरयोरुभयोः प्रकृतिसाम्यमुद्घोषयति। तत्पद्यं यथा–

हरिहरयोः प्रकृतिरेका प्रत्ययभेदेन रूपभेदोऽयम्।
एकस्यैव नटस्यानेकविधा भूमिकाभेदात्[2]॥ इति।

विषयेऽस्मिन् कस्यचिद् वैयाकरणस्याभ्युक्तिरपि युक्तिसिद्धतया मान्यतां भजते। तत्पद्यं यथा–

उभयोरेका प्रकृतिः प्रत्ययतो भिन्नवद्भाति।
कलयतु कश्चिन्मूढो हरिहरभेदं विना शास्त्रम्॥ इति।

---

1. शब्दकल्पद्रुमे चतुर्थकाण्डे उद्धृतं पद्यम्, पृष्ठसं0 452
2. शिवपुराणम् (रुद्रसंहिता) 9/56

भागवते चतुर्थस्कन्धे ब्रह्माणं प्रति भगवतः **विष्णोर्वचनमपि ब्रह्म-विष्णु-महेशानां** प्रकृति-साम्यादभेदभावं प्रकटयति। तद्यथा–

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्।
आत्मेश्वर उपद्रष्टा स्वयं दृग्विशेषणः।।
आत्ममायां समावेश्य सोऽहं गुणमयीं द्विज!।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्।।
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि।
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति।।
यथा पुमान्न स्वाङ्गेषु शिरः पाण्यादिषु क्वचित्।
पारक्यबुद्धिं कुरुते एवम्भूतेषु मत्परः।।
त्रयाणामेकभावनां यो न पश्यति वै भिदाम्।
सर्वभूतात्मनां ब्रह्मन्! स शान्तिमधिगच्छति[1]।। इति च।

विष्णुपुराणे भगवन्तं सदाशिवं प्रति भगवतः **श्रीकृष्णस्य** वचनान्यपि **हरिहरयोरभेदभावं** प्रकटन्ति। तद्यथा–

योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम्।
मत्तो नान्यदशेषं यत् तत्त्वं ज्ञातुमर्हसि।।
स एवाहं महादेवः स एवाहं जनार्दनः।
उभयोरन्तरं नास्ति घटस्थजलयोरिव।।
अविद्यामोहितात्मानः पुरुषाः भिन्नदर्शिनः।
वदन्ति भेदं पश्यन्ति चावयोरन्तरं हर![2]।। इति।

किमधिकेन **शिवपुराणे रुद्रसंहितायां श्रीशिवमुखान्निसृतानि** पद्यान्यपि

---

1. भागवतम् 4/71/50-54
2. विष्णुपुराणम् 5/53/48-50

दृष्टान्त-दार्ष्टान्तिकभावेन विष्णु-शिवयोरैक्यभावं स्थिरीकुर्वन्ति। तद्यथा–

सुवर्णस्य यथैकस्य वस्तुत्वं नैव गच्छति।
अलङ्कृतिकृते देव! नामभेदो न वस्तुनः॥ इति।

यथैकस्या मृदो भेदे नानापात्रे न वस्तुनः।
कारणस्यैव कार्यस्य सन्निधानं निदर्शनम्[1]॥ इति।

एवञ्च–

ममैव हृदये विष्णुर्विष्णोश्च हृदये ह्यहम्।
उभयोरन्तरं यो वै न जानाति मनो मम[2]॥ इति च।

किं बहुना **नारदीयपुराणमपि** पूर्वोक्तानां त्रिदेवानां सहास्तित्वं ख्यापयत् देवत्रयेषु भेदबुद्धिधारिणं जनं नरकगामीत्युद्घोषयति। तद्यथा–

हरिशङ्करयोर्मध्ये ब्रह्मणश्चापि यो नरः।
भेदं करोति सोऽभ्येति नरकं भृशदारुणम्॥ इति।

हरिं हरं विधातारं यः पश्येदेकरूपिणम्।
स याति परमानन्दं शास्त्राणामेष निश्चयः[3]॥ इति च।

अपि च–

हरिरूपो महादेवः शिवरूपी जनार्दनः।
सर्वलोकस्य नेता यस्तं नमामि जगद्गुरुम्[4]॥ इति।

---

1. शिवपुराणम् (रुद्रसंहिता) 9/35-36
2. तदेव, (रुद्रसंहिता) 9/55
3. नारदीयपुराणम् 6/48-49
4. तदेव, 11/30

एवञ्च–

हरिरूपधरं लिङ्गं लिङ्गरूपधरो हरिः।
ईषदप्यन्तरं नास्ति भेदकृच्चानयोर्बुधः।। इति।

अनादिनिधने देवे हरिशङ्करसंज्ञिते।
अज्ञानसागरे मग्नाः भेदं कुर्वन्ति पापिनः[1]।। इति च।

प्रसिद्धपाण्डित्येन विश्वविश्रुतकीर्त्तिमूर्त्तिना पं0 ज्वालाप्रसादमहोदयेन स्वप्रणीते 'अष्टादशपुराणदर्पण'नाम्नि ग्रन्थरत्ने शिव-केशवयोर्ब्रह्मणश्चैक्यं निम्नपद्येन प्रत्यपादि। तत्पद्यं यथा–

ब्रह्माणं केशवं रुद्रं भेदभावेन मोहिताः।
पश्यन्त्येकं न जानन्ति पाखण्डोपहताः जनाः[2]।। इति।

भागवतमहापुराणस्य भावार्थदीपिकाख्यायाः टीकायाः प्रस्तावनाभागे सुप्रसिद्धटीकाकारः **श्रीधरस्वामिमहोदयोऽपि** पद्यमिदं लिलेख–

शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः[3]।। इति।

पराशरोपपुराणे एकादशाध्याये भगवतीं लक्ष्मीं प्रति भगवतः विष्णोर्वचनमप्यत्रावधेयम्। तद्यथा–

शतवर्षं तपस्तप्तं तदाहं प्राणवल्लभे!।
तत्प्रसादादिदं ज्ञानं प्राप्तं वै परमं महत्।। इति।

अहं शिवः शिवश्चायं त्वञ्चापि शिव एव च।
सर्वं शिवमयं भद्रे! शिवाद्भिन्नं न किञ्चन[4]।। इति च।

---

1. नारदपुराणम् 6/44-45
2. अष्टदशपुराणदर्पणः, पृष्ठसं0 50, लेखकः-पं0 ज्वालाप्रसादः
3. 'भावार्थदीपिका'-टीकोपेतं भागवतम्
4. सिद्धान्तरत्नाकरस्य उपासनाखण्डे पद्यद्वयमुद्ध्रितम्, पद्यसं0 3-4

स्कन्दपुराणे तु विष्णु-शिवयोरुभयोर्देवयोरर्द्धार्द्धवपुर्धारित्वं समुपवर्णितं विद्यते। तद्यथा–

शिवस्यार्द्धं स्मृता गौरी तदर्द्धो हरिरीष्यते।
तदर्द्धार्द्धेण संयुक्तो हरिरर्द्धशरीरभाक्[1]॥ इति।

योगशास्त्रस्य 'सिद्धसिद्धान्तपद्धति'नाम्नि ग्रन्थरत्ने **गोरक्षनाथ**सिद्धोऽपि लिखति–

शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः।
अन्तरं नैव पश्यामि चन्द्रचन्द्रिकयोरिव[2]॥ इति।

तस्मादेव कारणात् **नित्यार्णवतन्त्रे**ऽपि समुपवर्णिते अपराधभञ्जनाख्ये **कालिकास्तोत्रे** पूर्वोक्तासु भूम्यम्भोऽग्निमरुद्व्योमादिष्वष्टमूर्त्तिषु स्वयं विराजमानः श्रीसदाशिवः जगदम्बां पार्वतीमनेन प्रकारेण स्तौति–

त्वं भूमिस्त्वं जलौघस्त्वमसि हुतहवस्त्वं जगद्वातरूपा
त्वञ्चाकाशो मनश्च प्रकृतिरपि महत्पूर्विकाऽहङ्कृतिश्च।
आत्मा चैवासि मातः! परमिह भवती त्वत्परं नैव किञ्चित्
क्षन्तव्यो मेऽपराधः प्रकटितवदने! कामरूपे! कराले![3]॥

शिवपुराणस्याधोल्लिखितानि पद्यजातान्यपि तथ्यममुं परिपोषयन्ति। तद्यथा–

शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः।
शक्तिस्तु शक्तिमद्रूपाद् व्यतिरेकं न गच्छति॥
तादात्म्यमनयोर्नित्यं बह्निदाहकयोरिव।
शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः॥

---

1. सिद्धान्तरत्नाकरस्य उपासनाखण्डे, तृतीयतरङ्गे पद्यमिदमुद्धृतम्, पद्यसं० ४०
2. सिद्धसिद्धान्तपद्धतिः, 4/37
3. नित्यार्णवतन्त्रोक्तम् 'अपराधभञ्जनकालिकास्तोत्रम्, पद्यसं० 14

अतस्तद्धर्मधर्मित्वात्परा शक्तिः परात्मनः।
न बह्नेर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते॥
शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा॥
तथाऽस्य विविधा शक्तिःप्रबोधानन्दरूपिणी।
एकानेकस्वरूपेण भाति भानोरिव प्रभा[1]॥ इति च।

इत्थम्भूते व्यतिकरे **रुद्रहृदयोपनिषदि** शिवशक्त्योः सहास्तित्वं स्तोत्रपद्धत्या सुनिपुणं समुपवर्णितं विद्यते। तद्यथा–

रुद्रो नर उमा नारी तस्मै तस्यै नमो नमो नमः।
रुद्रो ब्रह्मा उमा वाणी तस्मै तस्यै नमो नमो नमः॥
रुद्रो विष्णुरुमा लक्ष्मी तस्मै तस्यै नमो नमो नमः।
रुद्रः सूर्य उमा छाया तस्मै तस्यै नमो नमो नमः॥
रुद्रः सोम उमा तारा तस्मै तस्यै नमो नमः।
रुद्रो दिवा उमारात्रिस्तस्मै तस्यै नमो नमो नमः॥
रुद्रो यज्ञ उमा स्वाहा तस्मै तस्यै नमो नमो नमः।
रुद्रो वह्निरुमा स्वाहा तस्मै तस्यै नमो नमो नमः॥
रुद्रो वेद उमा शास्त्रं तस्मै तस्यै नमो नमो नमः।
रुद्रो वृक्ष उमा वल्ली तस्मै तस्यै नमो नमो नमः॥
रुद्रो गन्ध उमा पुष्पं तस्मै तस्यै नमो नमो नमः।
रुद्रोऽर्थ अक्षराः सोमा तस्मै तस्यै नमो नमः॥
रुद्रो लिङ्गमुमा पीठं तस्मै तस्यै नमो नमो नमः[2]॥ इति।

---

1. शिवपुराणस्योक्तपद्यानि कल्याण-पत्रिकायाः शिवाङ्के 254 पृष्ठे उद्धृतानि सन्ति।
2. रुद्रहृदयोपनिषद्, पद्यसं0 13-23

पूर्वोक्तपर्यालोचनेनैतत् सुस्पष्टं भवति यत् सम्पूर्णं भौतिकं जगदिदं शक्तिसंपृक्तस्य भगवतःपरमशिवस्य स्फूर्जितमेवेति न प्रयत्नप्रतिपादनीयतां याति। एवमेव शक्तिमतःभगवतःशिवस्याष्टमूर्त्तित्वात् शिवमहिम्नः स्तोत्रस्याष्टौ पक्षेऽपि व्याख्यानं भवितुमर्हति। खिष्टाब्दस्य सप्तदशशताब्द्याःपूर्वार्द्धभागे बङ्गप्रान्तोद्भवेन प्रसिद्धपाण्डित्येन श्रीमता **मधुसूदनसरस्वती**महाशयेन **श्रीशिवमहिम्नः स्तोत्रस्य** प्रतिपद्यमाश्रित्य 'शिव' 'विष्ण्विति' पक्षद्वयात्मिका पाण्डित्यपूर्णा टीका व्यधायि। 'मधुसूदनी'ति व्यपदिश्या टीकेयं प्रथमतः **हरिदाससंस्कृतग्रन्थमाला**-68 मध्ये **चौखम्भा-संस्कृत-सिरीज**-वाराणसीतः प्रकाशिता जाता। अनयैव टीकया प्रभावितःसन् खिष्टाब्दस्याष्टादशशताब्द्यां लब्धजन्मा मैथिलकविः**श्रीकृष्णदत्तः** पुरहरपुर्य्यामुषित्वैव **श्रीगीतगोविन्दमहाकाव्यस्य** शिवपक्षीयां **शशिलेखा**ऽभिख्यां मनोहरां टीकामारचयामास। उक्तटीकायाः प्रारम्भे **महाकविः कृष्णदत्तो**ऽयं सुस्पष्टं लिखति–

शैवं नाद्रियते सुधीपि मतं प्रायोऽधुना वैष्णवः
शैवो नैव च वैष्णवं निजनिजासद्वासनावासितः।
मत्वेत्थं मधुसूदनोऽपि मुरजित्पक्षे महिम्नःस्तुतिं
व्याचख्यौ जयदेवसूक्तिमपि तां शैवे नयाम्यध्वनि[1]॥

अपि च–

आस्योत्था जयदेवपण्डितकवेर्वाणी पवित्रा स्वतः
प्रव्यक्तं परिशीलिताऽच्युतपदा श्लाघ्या बुधैस्सर्वदा।
सम्प्रत्यद्भुतयोजनाभिवलना-भङ्ग्या शिवे सङ्गतिं
नीता पद्मभुवः कमण्डलुपयोधारेव किं कथ्यताम्[2]?॥

1-2. श्रीगीतगोविन्दमहाकाव्यम्, हरि-हरोभयनिष्ठ'गङ्गा'-'शशिलेखा'-टीकोपेतम्, सम्पादकः-डॉ0 रामकिशोरझा, प्रकाशकः-राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझा-परिसरः, प्रयागः, खिष्टसम्वत्सरः 2015

अन्यच्च–

> **स्फुटतरविवृतां श्रीकृष्णपक्षप्रकाशां**
> **विशदितशिवपक्षां सर्वलोकोपकृत्यै।**
> **रचयति 'शशिलेखां' गीतगोविन्दटीकां**
> **त्रिपुरहरनगर्य्यां मैथिलः कृष्णदत्तः[1]॥**

ख्रिष्टाब्दस्य सप्तदशशताब्द्या उत्तरार्द्धभागे बङ्गाभिजनेन श्रीमता **जगदीश-तर्कपञ्चाननभट्टाचार्य**महाशयेनापि **गन्धर्वराज-पुष्पदन्त**-प्रणीतशिवमहिम्नः स्तोत्रस्य प्रतिपद्यमाश्रित्य हरि-हर-सूर्येति त्रिपक्षीया टीकाऽऽटीकिता। सर्वथाऽप्रकाशिता **'रहस्यप्रकाश'**-नाम्नी टीकेयं मयैव सम्पादिता सती राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथझा-परिसरेण प्राकाश्यमानीयत इति महतो हर्षप्रकर्षस्य विषयः।

इतः पूर्वं **आचार्यश्रीकरुणापतित्रिपाठि**-महोदयानां पितृचरणैः पञ्चदेवोपासकैः **श्रीमद्भिर्नारायणपतित्रिपाठि**महोदयैरपि श्रुतिरिव समादृतस्य श्रीशिवमहिम्नः स्तोत्रस्य पञ्चदेवेष्पर्थप्रतीतिक्षमा 'पञ्चमुखी' नाम्नी टीका विरचिता। पूर्वोक्त 'मधुसूदनी'टीकासहिता 'पञ्चमुखी'टीकेयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयाद् वाराणसीतःश्रीमता **करुणापतित्रिपाठि**महोदयस्य सम्पादकत्वे 1996 तमे ख्रिष्टसम्वत्सरे प्राकाश्यमानीता। कतिपयैरन्यैरपि कोमराम-प्रभृतिभिः पूर्वसूरिभिः स्तोत्ररत्नमिदमभिलक्ष्य बह्व्यस्टीकाऽऽटीकिताः ग्रन्थविस्तरमयात्तन्नेह प्रतन्यते।

गन्धर्वराज-पुष्पदन्तस्य परिचयः

प्रायेणैतदवलोक्यते यद् भारतीयसंस्कृतसंरक्षणतत्पराः ऋषिकल्पा अत्रत्याः ग्रन्थकाराः लोकोपकारेषु व्यापृतास्समवर्त्तन्त। फलत आत्मश्लाघाविमुखाः सन्तस्ते

---

1. गीतगोविन्दमहाकाव्यम्, हरि-हरोभयनिष्ठ'गङ्गा'-शिलेखा-टीकोपेतम्, सम्पादकः- डॉ0 रामकिशोरझा, प्रकाशकः-राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझा-परिसरः, प्रयागः, ख्रिष्टसम्वत्सरः 2015

सौशील्येन प्रश्रयाधिक्येन वा स्वरचनासु स्वकीयं परिचयादिकमपि नोल्लिखन्तिस्म। तस्मात्कारणाद् विमर्शका अन्तःसाक्ष्याभावे कतिपयैर्ब्राह्यसाक्ष्यैरेव तत्परिचयादिकं कार्यं निभालयन्ति। कार्येऽस्मिन् ते महत्काठिन्यमप्यनुभवन्ति च। प्राचीनग्रन्थेषु तत्कर्तृणां परिचयाभावस्यैका सुदीर्घपरम्परा वर्त्तते संस्कृतवाङ्मये। **गन्धर्वराज-पुष्पदन्तो**ऽपि तस्यामेव परम्परायामापतति। कुतस्त्योऽयं **पुष्पदन्त**? कस्मिन् कालखण्डे चासौ जनिर्लेभे? कविनाऽनेन प्रणीतानां ग्रन्थानां संख्या कियतीति-विषये इदमित्थं प्रमाणं कुत्रचिन्नोपलभ्यते। किन्तु कवेरस्याभिधानस्य पूर्वं 'गन्धर्वराजे'ति विशेषणं वीक्ष्य सुस्पष्टं भवति यन्नासौ कविर्मानवकोटिकः। गन्धर्वलोके जनुर्गृहीतवतां गन्धर्वाणां मध्ये श्रेष्ठतावशादसौ **गन्धर्वराजे**ति विशेषणमाससाद। कुसुममिव धवलदशनत्वादसौ **पुष्पदन्ते**ति नाम्ना ख्यातिङ्गत इति प्रतीयते। अन्तःसाक्ष्येन तथ्यमिदं स्फारीभवति यद् **गन्धर्वराज-पुष्पदन्तो**ऽयं बालचन्द्रधारिणः देवाधिदेवस्य भगवतः शिवस्यानुचरोऽवर्त्तत[1]। कालान्तरे भगवतः शिवस्य रोषवशादसौ निजमहिम्नि किञ्चिन्न्यूनत्वमवाप्य मर्त्यलोके जनिर्लेभे। निजमहिम्नि भूयोऽपि पूर्ववद् गुणाधानहेतवे कविरयं भगवतःशिवस्य दिव्यदिव्यमर्थाद् दिव्येभ्योऽपि दिव्यं तन्महिम्नः स्तवनमकार्षीदिति तदीयं निम्नपद्यं स्पष्टति–

कुसुमदशननामा सर्वगन्धर्वराजः,
शिशुशशिधरमौलेर्देवदेवस्य दासः।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषा-
त्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः[2]॥

स्वस्यानन्यसेवकस्य **पुष्पदन्त**स्योपरि भगवतः शिवस्य रोषकारणं किमिति जातायां जिज्ञासायामेका किम्वदन्ती सुप्रथिता विद्यते, तद्यथा–

खेचरीविद्यायां नैपुण्यमधिगतोऽयं **पुष्पदन्तः** बाहुनाम्नःगन्धर्वनृपतेःपुष्प-

---

1. दि इन्साइक्लोपेडिया इण्डिका, वाल्यूम 14, पृष्ठसं0 226, सम्पादकः- नागेन्द्रनाथ वसु
2. श्रीशिवमहिम्नःस्तोत्रम्, पद्यसं0 32

वाटिकायामाकाशमार्गेणावतीर्य शिवपूजनार्थं प्रभूतमात्रायां पुष्पाण्यवचित्य भूयोऽप्याकाशमार्गेण स्वस्थानमवाप्नोतिस्म। यतो हि मनुवचनानुसारं देवपूजननिमित्तं गुप्तरूपेण पुष्पावचयनं चौर्यकर्मणि नैव परिगण्यते।

यदाऽयं **बाहु**नामा गन्धर्वनृपति स्वस्याभीष्टदेवस्य पूजनावसरे प्रफुल्लितानां सुवासितानाञ्च पुष्पाणामभावं वीक्ष्य पुष्पवाटिकायाः सेवकान् प्रति भृशं कोपं प्रादर्शयत्। तदा पुष्पवाटिकायास्सेवकास्तदन्वेषणरताः बभूवुः। किन्तु कृतेऽपि प्रयासबाहुल्ये पुष्पापहारकस्य सम्यक् परिज्ञानं नैव लेभिरे। तदनु केनापि विज्ञजनेनोक्तं यद् युस्माभिस्सम्पूर्णायां पुष्पवाटिकायां शिवनिर्माल्यं सर्वत्र प्रक्षेपनीयम्। तदाकर्ण्य तत्रत्यैस्सेवकैरित्थमाचरितम्। उद्यानसेवकानां तदाचरितेनानभिज्ञोऽसौ **पुष्पदन्तः** शिवनिर्माल्यलङ्घनदोषेण स्वकीयां खेचरीविद्यां सर्वतोभावेन विनष्टीचकार। परिणामतस्तदुड्डयनसामर्थ्यं विनष्टं जातम्। एतावता तत्रत्यैस्सेवकैः परिगृहीतोऽसौ **पुष्पदन्तः** राजाज्ञानुसारं कारागारे निक्षिप्तः। तत्र प्रणिधानपूर्वकं विचारिते हि पुष्पदन्ते पुष्पोपहारकाले शिवनिर्माल्यलङ्घनमेव स्वखेचरीविद्यायाः विनाशकारणमित्य-वलोकितवान्। तदपराधपरिहारार्थमेव **पुष्पदन्तो**ऽयं कारागारे उषित्वा **वाक्यपुष्पोपहार**रूपं द्वात्रिंशतिपद्यात्मकं **श्रीशिवमहिम्नः स्तोत्रं** प्रणिनाय। स्तोत्रेनानेन तदपराधक्षमापनं कृतं भगवता शिवेनेति किम्वदन्ती प्रथिता वरीवर्ति।

गन्धर्वराज-पुष्पदन्तविषयिनी एका अन्या कथा **गुणाढ्यस्य बृहत्कथा**या-मुल्लिखिता विद्यते। सप्तलक्षपद्यात्मिकेयं बृहत्कथा मूलतः **पैशाची**-प्राकृत-भाषायामारचिता आसीत्। तेषु सप्तलक्षपरिमितेषु पद्येषु प्रायश; षट्लक्षसंख्याकानि पद्यानि तदानीन्तन-'**शालिवाहन**'-(सातवाहन) नृपतितिरस्कारवशात्कोपाविष्टेन **गुणाढ्य**कविना तत्रत्य-प्रतिपद्यपाठपुरस्सरं स्वयमेवाग्निसाच्चकार। तेषां पद्यानां पाठकाले निराहाराः पशुपक्षिणोऽपि तां दिव्यकथां श्रोतुं सज्जीकर्णाः बभूवुः। अस्मिन् '**बृहत्कथा**'नाम्नि ऐतिह्यग्रन्थे केवलमेकलक्षपरिमितान्येव पद्यानि पूर्वोक्त**शालिवाहन**नृपतेर्विशेषानुरोधादिदानीं संस्कृतवाङ्मये सुरक्षितानि तन्तीति

'दि इन्साइक्लोपेडिया-इण्डिका' नामधेयः कोशग्रन्थः विवृणोति[1]। **'दि इण्डियन-हिस्टोरिकल क्वार्टरली'** नामधेये जर्नलमध्ये **ए0 वेंकटसुब्बैया**महोदयैर्विलिखिते **'दि आदिपुराण एण्ड बृहत्कथा'** नाम्नि शोधनिबन्धे एतद्विलिखितं विद्यते यद् **बृहत्कथा**यामवशिष्टान्येकलक्षसंख्याकानि पद्यान्याधारीकृत्य कश्मीरोद्भवेन **क्षेमेन्द्रेण 'बृहत्कथामञ्जरी'** नाम्नी ऐतिह्यग्रन्थरचना कृता। अथ च तत्रत्येन **सोमदेवभट्टे**नापि **'कथासरित्सागराख्य'**मैतिह्यपुस्तकमारचितम्।

पूर्वोक्ते ऐतिह्यपुस्तकद्वये **पुष्पदन्तोदन्तः** विस्तरेण पल्लवितो विद्यते। तत्रत्यमतिसंक्षिप्तं **पुष्पदन्त**कथानकमत्र मया प्रस्तूयते–

एकदा सुरम्ये कैलासशिखरे सुखासीनःलोकशङ्करःश्रीशङ्करः स्वशक्ति-स्वरूपायाः भगवत्याः पार्वत्याः विशेषाग्रहं स्वीकृत्य सप्तसंख्याकानां विद्याधराणामतिविचित्रां दिव्यकथां गुप्तरूपेणश्रावयितुं प्रारेभे। तदानीं कस्यचिदन्यस्य प्रवेशस्तत्र न भवेदितिहेतोः **नन्दी**नामा शिवगणः द्वाररक्षकत्वेन नियुक्तो जातः। स च भगवता शिवेन समादिष्टः; यत्कथावाचनकाले कोऽप्यत्र नागच्छेदिति। **कथासरित्सागरस्य कथापीठ**नामके प्रथमलम्बके एतद्विषयकं पद्यं यथा–

प्रसादवित्तकः शम्भोः पुष्पदन्तो गुणोत्तमः।
न्यषेधि च प्रवेशोऽद्य नन्दिना द्वारि तिष्ठता[3]॥

भगवतः शिवस्यानन्यसेवकः **पुष्पदन्तः** शिवसामीप्यमधिगन्तुकामः यदा द्वारदेशं सम्प्राप्तस्तदा कारणं विनैव तत्र प्रवेशनिषेधं वीक्ष्य स्वकीयेन योगबलेन वायुभूतस्सन् तत्र प्रविश्य शिवभाषितां तां दिव्यकथामशृणोत्। कथासामाप्तिकाले पुनश्चासौ तद्वदेव निःसृत्य **जया**नामधेयां स्वकीयां भार्यां प्रति रहःक्रीडावेलायां सप्तविद्याधराणां तामतिविचित्रां दिव्यकथामश्रावयत्। अपरेद्युर्**जया**ऽपि सुप्रसन्ना

---

1. दि इन्साइक्लोपेडिया इण्डिका, वाल्यूम 6, पृष्ठसं0 392-93
2. दि इण्डियन-हिस्टोरिकल-क्वार्टरली, वाल्यूम 5, पृष्ठसं0 31-35
3. कथासरित्सागरः 1/49

सती स्वसखीं **पार्वतीं** प्रति तामखिलां दिव्यकथामश्रावयत्। **जयामुखात्** तत्कथाश्रवणमात्रेणैव समधिकं कुपिता सती भगवती **पार्वती** भगवन्तं **शिवमधिक्षिपन्ती** बभाषे यद् भवान् यां सप्तविद्याधराणां गुप्तकथां मां रहसि अश्रावयत्, तां कथां तु **पुष्पदन्त**भार्या **जया**ऽपि विजानाति। एतदाकर्ण्य भगवान् भूतनाथस्समधिकं चकितस्सन् योगबलेन प्रणिधानं कृत्वा विचारयामास। तदनन्तरमसौ स्वगणस्य **पुष्पदन्तस्य** निखिलं गर्हितकृत्यं विज्ञातवान्, एवञ्च **पुष्पदन्तस्य** छद्मचरितं **पार्वतीं** प्रति निम्नपद्येन विज्ञापितवान्–

पुष्पदन्तः प्रविश्यान्तर्वायुभूतः कथामिमाम्।
सुश्राव नापराधो मे प्रियामित्याह धूर्जटिः[1]॥

तदनन्तरं क्रोधाभिभूता भगवती पार्वती **पुष्पदन्त**माहूय शशाप यत् हे **कथाचोर!** क्षिप्रमेव पवनवेगेन मर्त्यलोके तव पतनं भवत्विति। **माल्यवानाभिख्येन** केनचिदपरेण शिवगणेन **पुष्पदन्तस्य** चानन्यमित्रेण तच्छापनिर्वापणार्थं भूयो भूयः **पार्वतीदेवी** संप्रार्थिता किन्तु कोपाविष्टा **पार्वती** तमपि शापेनाभिशप्तं कृतवती। **पार्वती**प्रदत्तशापवशादसौ **माल्यवान्** नामा शिवगणोऽपि मर्त्यलोके दक्षिणापथेऽवस्थिते **प्रतिष्ठानपुरे** जनिमवाप्य गुणसम्पन्नतावशाद् **गुणाढ्य**नाम्ना प्रथितो बभूव। **बृहत्कथामञ्जर्यां**मवस्थितं पद्यमिदं प्रमाणम्–

प्रतिष्ठानपुरे जातो माल्यवान् दक्षिणापथे।
गुणाढ्य इति यो लोके विश्रुतो गुणगौरवात्[2]॥

तदन्तरं **जयया** सह पूर्वोक्तावुभावपि शिवगणौ **पार्वत्याश्च**रणयोर्निपत्य शापान्तनिमित्तं निवेदनञ्चक्रतुः। एतावता दयाभावमापन्ना जगदम्बा **पार्वतीदेवी** उभयोश्शिवगणयोश्शापान्तहेतवेऽतिरोचकं विधानं प्रकटितवती। साऽब्रवीद्यद् **सुप्रतीक**नामा कश्चिद् यक्षः **कुवेरस्य** शापवशात् पिशाचतामवाप्य मर्त्यलोकेऽवस्थिते

1. क्षेमेन्द्रप्रणीता बृहत्कथामञ्जरी (कथापीठे कथावतारे प्रथमस्तरङ्गः), पद्यसं० 1/59
2. तदेव, 1/79

विन्ध्यक्षेत्रे **काणभूति**नाम्ना प्रथितस्सन् निवसति। यदा त्वं सप्तविद्याधराणामिमां गुप्तकथां **काणभूतिं** प्रति श्रावयिष्यसि तदा तव शापविमुक्तिर्भविष्यति। अथ च **काणभूति**रपि तां दिव्यां गुप्तकथां **गुणाढ्यं** श्रावयिष्यति तदाऽसौ **गुणाढ्यो**ऽपि अस्मच्छापाद्विमुक्तो भविष्यतीति। शापान्तोपायकथनसमनन्तरमेव विद्युत्पुञ्जाविव **पुष्पदन्त-माल्यवाना**वुभावपि शिवगणौ शिवलोकाद् विलुप्तौ बभूवतुः[1]।

तदनु गच्छता कालेन दयार्द्रभूता पार्वती भगवन्तं शिवं पप्रच्छ- देव! मयाभिशप्तावुभावपि सेवकगणौ मर्त्यलोके कुत्र समुत्पन्नौ? एतदाकर्ण्य **चन्द्रमौलि**रुवाच–हे प्रिये! **तीर्थराजप्रयाग**निकषा 'कौशाम्बी'नामधेया एका महानगरी विद्यते। तस्यामेव नगर्यां मत्कथाचौरः **पुष्पदन्तः** द्विजश्रेष्ठस्य **सोमदत्तस्य** पुत्रत्वेन जनिर्लेभे। असावेव **पुष्पदन्तः** मर्त्यलोके **'कात्यायना'**भिधानेन **श्रुतिधरेति**-विरुद्विभूषितेन **'वररुचि'**नाम्नाऽपि प्रथितो जातः। **बृहत्कथामञ्जर्यां** यथा–

तयोश्चिरस्य शापेन वसुधामवतीर्णयोः।
तद्वृत्तान्तं गिरिजया पृष्टः प्राह त्रिलोचनः॥
कौशाम्बीवासिनः सुभ्रु! पुत्रतामग्रजन्मनः।
प्रयातः सोमदत्तस्य पुष्पदन्तो महीतले॥
कात्यायनः श्रुतिधरस्तथा वररुचिश्च सः।
गुणीनामग्रणीर्लोके नामभिस्त्रिभिरुच्यते[2]॥

कथासरित्सागरेऽपि यथा–

---

1. महाकविसोमदेवभट्टविरचितः कथासरित्सागरः, 1/58-62
2. महाकविक्षेमेन्द्रप्रणीता बृहत्कथामञ्जरी, (कथापीठे कथावतारे प्रथमस्तरङ्गः), पद्यसं0 68-70

अथ जातु याति काले गौरी पप्रच्छ शङ्करं सदया।
देव! मया तौ शप्तौ प्रमथवरौ कुत्र भुवि जातौ?॥
अवदच्च चन्द्रमौलिः 'कौशाम्बी'त्यस्ति या नगरी।
तस्यां स 'पुष्पदन्तो' 'वररुचि'नामा प्रिये! जातः॥
अन्यच्च माल्यवानपि नगरवरे सुप्रतिष्ठाख्ये सः।
जातो गुणाढ्यनामा देवि! तयोरेष वृत्तान्तः[1]॥

पुष्पदन्तस्यावनितलेऽस्मिन् जन्मसमकालमेव नभोमण्डलाद्दिव्या मनोहरा च वाणी प्रस्फुटिता जाता यत् 'असौ बालकः' श्रुतिधरत्वमवाप्य **वररुचि-कात्यायना**भिधानाभ्यामपि जगन्मण्डले सुविख्यतो भूत्वा स्वकीययौवनावस्थायां **वर्ष**नाम्नः विदुषः सकाशान्निखिलां विद्यामधिगत्य सुमहान् वैय्याकरणो भविष्यति, अथ च व्याकरणशास्त्रं सुव्यवस्थितं सुप्रतिष्ठितञ्च विधास्यतीति **सोमदेवभट्टस्य कथासरितत्सागरो**ऽभिलपति। तद्यथा **कथासरित्सागरे**-

एकः श्रुतिधरो जातो विद्यां वर्षादवाप्स्यति।
किञ्च व्याकरणं लोके प्रतिष्ठां प्रापयिष्यति॥
नाम्ना वररुचिर्लोके यत्तदस्मै हि रोचते।
यद्यद् वरं भवेत् किञ्चिदित्युक्त्वा वागुपारमत्[2]॥

वरा रुचिर्यस्य, अर्थात् श्रेष्ठवस्तुनि श्रेष्ठविषये वा रुचिवशादस्य बालकस्यापराभिधानं **वररुचि**रभूदिति पूर्वोक्तद्वितीयपद्यस्याभिसन्धिः। विविधेषु कोशग्रन्थेष्वपि सुस्पष्टं निर्दिष्टं विद्यते यत् **पाणिनि**प्रणीतायामष्टाध्याय्यां वार्तिककारः

---

1. (क) महाकविसोमदेवभट्टविरचितः कथासरित्सागरः 1/63-65
   (ख) ततः स मर्त्यवपुषा पुष्पदन्तः परिभ्रमन्।
   नाम्ना वररुचिः किञ्च कात्यायन इति श्रुतः॥-तदेव 2/1
2. सोमदेवभट्टप्रणीतः कथासरित्सागरः, प्रथमलम्बके, द्वितीयस्तरङ्गः, पद्यसं0 69-70

कात्यायन एव **वररुचिव्य**पदेशेनापि ख्यातिङ्गत इत्यत्र न काचिद्विप्रतिपत्तिः[1]। अनेनैव **वररुचिना प्राकृतप्रकाशाख्यः** प्राकृतव्याकरणात्मकः ग्रन्थः प्रणीतः। **पातञ्जलमहाभाष्ये** 4/3/110 तमे सूत्रे भाष्यरचनाक्रमेण महर्षिः **पतञ्जलि**रप्यभिधत्ते यद् **वररुचि**प्रणीतं **'स्वर्गारोहणकाव्यम्' वाररुचं** काव्यमिति निगद्यते[2]। **श्रीकृष्णचरितकाव्ये**ऽपि पद्यमिदमासाद्यते–

यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविरिति[3]॥ इति।

वररुचिप्रणीतानि नैकानि पद्यानि 'शार्ङ्गधरपद्धतौ', 'सदुक्तिकर्णामृते' 'सूक्तिमुक्तावल्याञ्चो'पलभ्यन्ते। इमानि पद्यान्यस्मद् गुरोः **पं० रामचन्द्रमिश्रस्य संस्कृतसाहित्येतिहास**-नाम्नि ग्रन्थरत्ने संगृहीतानि सन्ति[4]। **वररुचिना** प्रणीताः कश्चन् साहित्यशास्त्रीयग्रन्थोऽपि पुरा विलसतिस्म, एतादृशी सूचना **श्रीमदभिनव-गुप्तस्याभिनवभारत्यां भोजराजस्य** 'शृङ्गारप्रकाशे' चोपलभ्यते किन्तु साम्प्रतं तद् ग्रन्थरत्नं संस्कृतवाङ्मये कुत्रचिदपि नोपलभ्यत इति **डॉ० श्रीधरभाष्करवर्णेकर**महोदयः स्वनिर्मिते **संस्कृतवाङ्मयकोशे** स्पष्टयति[5]।

वररुचीत्यपराभिधानस्य **पुष्पदन्तस्य** सुविस्तृतमितिवृत्तं **कथासरित्सागरस्य** प्रथमलम्बके द्वितीयतरङ्गे निम्नरूपेण पल्लवितं विद्यते। तद्यथा–

यदा ह्ययं **पुष्पदन्तः** बाल्यावस्थायामासीत्तदैवास्य पितुस्सोमदत्तस्य निधनं

---

1. (क) हेमचन्द्रविरचितः अनेकार्थसंग्रहः 3/116
   (ख) मेदिनीकोशः (नान्तप्रकरणम्) 175
   (ग) त्रिकाण्डशेषः 2/6/25
2. पातञ्जलमहाभाष्यम्, द्वितीयो भागः, पृष्ठसं० 315
3. श्रीकृष्णचरितम्, पद्यसं० 14
4. संस्कृतसाहित्येतिहासः, पृष्ठसंख्या 41, लेखकः-पं० रामचन्द्रमिश्रः (चौखम्भाप्रकाशनम्)
5. संस्कृतवाङ्मयकोशः (प्रथमखण्डः), पृष्ठसं० 289

जातम्। तदा **वसुदत्ता**ख्या तदीया माता एव समधिकं कष्टपूर्वक बालकस्यास्य परिपालनं कृतवती। कतिपयवर्षानन्तरमेकदा **वेतसपुर**निवासिनः **देवस्वामिनो**ऽपत्यं **इन्द्रदत्तः, करम्भकस्य** च पुत्रः**व्याडी**ति नामानावुभावपि भ्रातरौ **वसुदत्तायाः** गृहे रात्रिकालातिपाताय समाजग्मतुः। दैवयोगात्तस्यामेव रात्रौ तस्मिन् ग्रामे कस्यचिन्नाटकस्य मञ्चनमारब्धम्। तत्रत्यं मृदङ्गध्वनिमाकर्ण्य बालोऽयं **पुष्पदन्तः** तन्नाटकमवलोकयितुमुत्कण्ठितस्सन् स्वमातरं निवेदयित्वा अकथयत्–'अहं तन्नाटकं द्रष्टुं गच्छामि। अहमत्रागत्य तत्राभिनेयमानं निखिलं नाट्य-वृत्तान्तं साभिनयं त्वामपि श्रावयिष्यामि'। एतदाकर्ण्य **इन्द्रदत्तः व्याडि**श्चोभावपि भ्रातरौ समधिकमाश्चर्यचकितौ बभूवतुः। उभयोरभ्यागतयोर्विस्मितावस्थायां वीक्ष्य **वसुदत्ता**ऽतीव सहजतया कथितवती यदयं बालकः एकदैव कमपि वर्ण्यमानं विषयं श्रुत्वा दैवप्रदत्तधारणाशक्तिमहिम्ना स्वधीषणायां धारयति। अत एवात्र कोऽपि सन्देहः नैव करणीयः। तदनु बालकस्यास्य परीक्षणार्थं तावुभावपि भ्रातरौ **प्रातिशाख्यस्य** पाठं कृतवन्तौ, बालकोऽयं सकृदेवाकर्णितं **प्रातिशाख्य**पाठं यथावदश्रावयत्। तदनन्तरमेते त्रयोऽपि नाट्यशालां संप्राप्य तन्नाटकमपश्यन्। नाटकान्ते स्वगृहं संप्राप्य बालकोऽसौ स्वमातुः समक्षं यथावत्तन्नाटकस्याभिनयं प्रादर्शयत्।

अतीवाश्चर्यजनकेन प्रसङ्गेनानेन **इन्द्रदत्त-व्याडि**नामानावुभावपि भ्रातरौ सुप्रसन्नौ कृतकृत्यौ च सञ्जातौ। यतो हि पुरा ह्येतावुभावपि विद्याप्राप्ति-निमित्तमतिकठिनानि तपांसि तप्त्वा भगवन्तं **कार्तिकेयस्वामिनं** तोषितवन्तौ। तत्तपोभिरत्यन्तं सन्तुष्टः **स्वामिकार्त्तिकेयः** वरदानतयाऽकथयत्–'पाटलिपुत्रे वर्षनाम्नः विदुषः सकाशाद् युवामुभावपि भ्रातरौ निखिलां विद्यामवाप्स्यसीति[1]।

बिहारप्रान्तस्य पाटलिपुत्रे शङ्करस्वामिनाम्नः विप्रस्य **वर्ष-उपवर्ष**नामानौ द्वौ पुत्रावास्ताम्। तत्र **वर्ष**नामा तदीयः ज्येष्ठपुत्रः मूर्खः दरिद्रश्चासीत्। किन्तु **उपवर्ष**नामा तस्य कनिष्ठपुत्रः पण्डितः धनाढ्यश्चासीत्। एकदा **उपवर्ष**पत्न्या

1. कथासरित्सागरः, प्रथमलम्बके, द्वितीयस्तरङ्गः, पद्यसं0 30-46

तिरस्कृतः **वर्षः** विद्याप्राप्तिनिमित्तिमतिकठिनं तपस्तप्त्वा **स्वामिकार्तिकेयं** तुतोष। तत्तपसाऽतीव सन्तुष्टः भगवान् **कार्तिकेयस्**तत्समक्षं निखिलां विद्यां प्रकाश्य तमुवाच–'एकश्रुतिधरं संप्राप्य मत्प्रदत्ता निखिलेयं विद्या त्वया प्रकाशनीया' इति।

गच्छता कालेन यदा **इन्द्रदत्त-व्याडि**नामानावुभावपि भ्रातरौ विद्याध्ययनहेतवे **वर्षोपाध्याय**गृहं सम्प्राप्तौ, तदा तदीया भार्या अर्थात् गुरुपत्नी बभाषे–'यावद्धि कश्चिदेकश्रुतिधरोऽत्र नैव समागमिष्यति, तावत्पर्यन्तं मत्पतिरयं स्वकीयां विद्यां नैव प्रकाशयिष्यती'ति।

चिरकालपर्यन्तमन्वेषणानन्तरं **पुष्पदन्ता**पराभिधानं **वररुचि**नामानममुं बालकं समासाद्य उभावपि भ्रातरौ समवाप्तमनोरथौ सञ्जातौ। उभावपि भ्रातरौ **स्वामिकार्तिकेय**संप्राप्तवरदानविषयिणीं कथां **वसुदत्तां** संश्राव्य कालयापनहेतवे किञ्चिद् धनं तस्यै विनिवेद्य विद्यार्जननिमित्तं तं बालकं याचितवन्तौ[1]।

एतदाकर्ण्य वसुदत्ता स्वपुत्रस्य पुष्पदन्तस्य जन्मकाले नभोमण्डलादशरीरायाः सरस्वत्यास्तां दिव्यवाणीं तं भ्रातृद्वयं संश्राव्य उक्तवती यत् तस्मादेव कालादहं समधिकं चिन्तातुरा व्यग्रा चास्मि यदसौ **वर्षोपाध्यायः** कुत्र मिलिष्यतीति। किन्तु युवयोर्मुखारविन्दान्निखिलं वृत्तान्तं विज्ञाय मे चेतसि सुमहान् परितोषः सञ्जातः। मत्पुत्रः **पुष्पदन्तो**ऽयं तवापि भ्रातृतुल्य एव, एतावता विद्यार्जननिमित्तमेनं **वर्षोपाध्याय**मुपनय इति।

वसुदत्ताया अमृतोपमं वाक्यमिदमाकर्ण्य उभावपि भ्रातरौ सुप्रसन्नौ कृतकृत्यौ च सञ्जातौ। तावुभावपि तस्याभीप्सितबालकस्य यज्ञोपवीतसंस्कारं कृत्वा वेदाध्ययनयोग्यं विधाय तं वर्षगुरुसमीपं निनाय। **वर्षोपाध्यायो**ऽप्येतानभीष्ट-शिष्यान् वीक्ष्य ओङ्कारोच्चारणपूर्वकं स्वकीयया दिव्यवाण्या निखिलान् वेद-वेदाङ्गांस्तान् शिक्षयामास।

1. तदेव, पद्यसं० 54-66

अत्रैतदपि वर्णितं विद्यते यत् पुष्पदन्तापरनामा **वररुचिः** 'एकश्रुतिधर' आसीत्, **व्याडिः** 'द्विश्रुतिधरः', **इन्द्रदत्तश्च** 'त्रिःश्रुतिधरो'ऽवर्त्तत।

कथासरित्सागरे तत्पद्यं यथा–

कृत्वाऽस्मानग्रतोऽन्येद्युरुपविष्टः शुचौ भुवि।
वर्षोपाध्याय ओङ्कारमकरोद्दिव्यया गिरा॥
तदनन्तरमेवास्य वेदाःसाङ्गा उपस्थिताः।
अध्यापयितुमस्मांश्च प्रवृत्तोऽभूदसौ ततः॥
सकृच्छ्रुतं मया तत्र द्विश्रुतं व्याडिना तथा।
त्रिःश्रुतं चेन्द्रदत्तेन गुरुणोक्तमगृह्यत[1]॥

एवम्प्रकारेण व्यतीतेषु केषुचिद्दिवसेषु **वर्षोपाध्यायस्य** शिष्य-सम्पत्समधिकं वर्द्धिता जाता। तच्छिष्याणां मध्ये **पाणिनि**र्नामा कश्चिन्मन्दबुद्धिरप्यासीत्। असौ गुरुसुश्रूषां भारस्वरूपमनुभवतिस्म। तस्मादेव कारणाद् गुरुपत्नी तं स्वाश्रमाद् बहिः निष्कासितवती। गुरोराश्रमान्निष्कासितोऽसौ **पाणिनि**स्समधिकं खिन्नो जातः। तदनन्तरमनेन विद्याप्राप्तिनिमित्तमतिकठिनं तपस्तप्तम्। तत्तपसा सुप्रसन्नः भगवान् **शिवः** प्रायशस्सर्वासु विद्यासु मुखस्थानीयमभिनवं व्याकरणशास्त्रं स्वयमेव विरच्य स्वकीयप्रियशिष्यं **पाणिनि**मुपदिष्टवान्। **पाणिनि**रपि तमपूर्वं व्याकरणग्रन्थरत्नमवाप्य सर्वतोभावेन गर्वान्वितो भूत्वा शास्त्रार्थनिमित्तं **कात्यायना**परनामानं **वररुचि**माहूतवान्। **पाणिने**स्तदामन्त्रणं स्वीकृत्य **वररुचि**रपि तेन सह सप्तदिनानि यावत् शास्त्रार्थञ्चकार। सम्प्राप्ते ह्यष्टमे दिवसे **पाणिनेः** पराजयावसरे **शिव**विहितहुङ्कार-शब्दाद् गगनमण्डलमकस्माद् गुञ्जायमानमभूत्। तद्गुञ्जारवश्रवणमात्रेणैव **वररुचिना**ऽधीतमैन्द्रमतसम्मतं व्याकरणम्, तस्य स्मृतिपथात्सर्वतोभावेन विलुप्तं जातम्। एतावता **वररुचिना** पराजितोऽपि **पाणिनि**श्शिवसाहाय्येन विजितो जातः। तदनन्तरमसौ **वररुचि**रपि भगवतः शिवस्याराधनाय हिमगिरिमुपजगाम।

1. तदेव, 78-80

तत्रासौ निराहारस्सन्नतिकठिनं तपस्तप्त्वा **श्रीशङ्करं** तुतोष। आशुतोषः भगवान् **शिवः वररुचेस्**तपश्चर्यया तुष्टस्सन् तस्मै स्वनिर्मितं तदेव व्याकरणमुपहृतवान् यद् व्याकरणं पाणिनये पूर्वमुपहृतमासीत्। **श्रीशिव**प्रदत्तव्याकरणग्रन्थप्राप्ति-समकालमेव पूर्वविस्मृतमैन्द्रमतपरिपुष्टं व्याकरणमपि तस्य स्मृतिपथेऽधिरूढं सञ्जातम्[1]। परिणामतः **वररुचिर**यं पाणिनेरष्टाध्याय्यां विद्यमानेषु प्रायशः 1,245-सूत्रेषु वार्तिकं विलिख्य व्याकरणशास्त्रं सुव्यवस्थितं सुसमृद्धञ्चाकरोदिति[2]।

पूर्वपल्लवितानां **माल्यवान्-पुष्पदन्त-काणभूति-वररुचि-कात्यायन-**प्रभृतीनामतिविस्तृतान्याख्यानानि **बृहत्कथामञ्जर्य्याम्, कथासरित्सागरे, संस्कृतवाङ्मयकोशे**ऽथ च **इन्साइक्लोपेडिया-इण्डिकादिषु** तत्तदैतिह्यपुस्तकेषु कोशग्रन्थेषु च सुविशदं प्रपञ्चितानि सन्ति, जिज्ञासुभिस्सुधीजनैस्तत्तत्कथानकं ततस्तत एवाकलनीयम्।

गन्धर्वराज-पुष्पदन्तस्य कालनिर्धारणम्–

संस्कृतस्यैतिह्यपुस्तकेषु **कात्यायनद्वयस्योल्लेखवशाद् गन्धर्वराज-पुष्पदन्तस्य** कालनिर्धारणे भ्रान्तिततिस्समुत्पन्ना जाता। केषाञ्चन् विदुषां मतिमिदं यत् स्मृतिग्रन्थकारः **कात्यायनः** भिन्नः, **पाणिनेर**ष्टाध्यायीमधिकृत्य वृत्तिकारः **कात्यायनश्च** कश्चिदपर एवेति।

महाकवेः **कालिदासस्य 'ज्योतिर्विदाभरणे'** समुपन्यस्तं निम्नपद्यमेव तद्भ्रान्तिविलसितस्य मूलभूतं कारणं वरीवर्ति। तत्पद्यं यथा–

धन्वन्तरिः क्षपणकामरसिंहशङ्कु-वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेस्सभायां रत्नानि वै वररुचिर्नवविक्रमस्य[3]॥

---

1. (क) कथासरित्सागरः, प्रथमलमबके, चतुर्तस्तरङ्गः, पद्यसं0 20-27
   (ख) बृहत्कथामञ्जरी, द्वितीयस्तरङ्गः, पद्यसं0 71-74
2. आर्थर एण्टनी मैक्डानल द्वारा विरचित संस्कृत साहित्य का इतिहास, (हिन्दी अनुवादक-डॉ0 रामसागर त्रिपाठी, पृष्ठसंख्या 414
3. ज्योतिर्विदाभरणम् 12/10

अत्रैतद्विचारणीयं विद्यते यन्नूतनविक्रमादित्यस्यावस्थितौ कः खलु कालखण्डस्सुनिश्चित इति? विक्रमादित्यप्रथमस्तु ख्रिष्टाब्दात् शतवर्षं प्रागेव **बिहारप्रान्तस्य पाटलिपुत्रे** विद्यमानोऽवर्त्तत इति विद्वद्भिर्निधारितपूर्वम्। अयं हि **प्रथमः विक्रमादित्यः** शकानां समूलविनाशकारकत्वात् **'शकारि'**नाम्नापि सुप्रथितो जातः। किन्तूपर्युक्तपद्ये 'नवविक्रमस्ये'तिपदप्रयोगादसौ नूतनविक्रमादित्य एवेत्यत्र न काचिद्विप्रतिपत्तिः। नूतनविक्रमादित्योऽयं ख्रिष्टाब्दस्य चतुर्थशताब्द्या-मुज्जयिन्यां **मालवाधिपति**त्वेन ख्यातिङ्गत इति विदुषामनुमतं मतम्। विक्रम-संवत्सरस्य प्रवर्त्तकोऽयं नूतनविक्रमादित्यः **'विक्रमार्क'**नाम्नाऽपि प्रसिद्धिं लेभे। तस्यैव राज्यसभायां विद्यमानेषु नवरत्नेषु वैद्यराजः **धन्वन्तरिः**, **क्षपणक**कविः, नामलिङ्गानुशासनाख्यकोशग्रन्थस्य प्रणेता **अमरसिंहः**, **शङ्कु**नामाकश्चित्कवि-विशेषः, **वेतालभट्टः**, **घटकर्परः**, महाकविः **कालिदासः**, **बृहज्जातक**स्य ज्योतिषग्रन्थस्य रचयिता **वराहमिहिरः**, **वररुचि**श्चेति नवसंख्याकाः विद्वांसः, भिन्न-भिन्नकालवर्तिनोऽप्येककालावच्छेदेन तत्र विराजमाना आसन्निति पूर्वोक्तपद्यमभिलपति। पूर्वपरिगणिताः विद्वांसः समकालवर्तिनस्सन्ति न वेति विषये पाश्चात्यविदुषामपि मतैक्यं नैव विद्यते। तत्र श्रीमन्तः **विलकिंस**महोदयोऽपि सन्दिहान इव प्रतिभाति[1]।

अस्मद्विचारानुसारं यथा हि **श्रीशिवमहिम्नः** स्तोत्रे द्वात्रिंशतिपद्यानामनन्तर-वर्तीनि पद्यानि प्रक्षिप्तानि सन्ति, तथैव महाकवेः **कालिदासस्य 'ज्योति-र्विदाभरणे'**ऽपि मालवाधिपतेर**भिनवविक्रमादित्यस्य** गौरवसंवर्द्धनार्थं केनचिदपरेण विदुषाऽतीव चातुर्यपूर्वकं पद्यमिदं न्ययोजि। यतो हि **वररुचि**प्रमुखानामु-पर्युक्तविदुषामेकत्रावस्थितिविषये ऐतिह्यपुस्तकेषु प्रामाण्याभावात् पद्यमिदं सर्वथा प्रक्षिप्तमिव प्रतीयते।

कतिपयेषां प्रमुखानामैतिह्यपुस्तकानामनुशीलनेनैतत्सुस्पष्टं भवति यत् ख्रिष्टाब्दपूर्वं

---

1. इन्साइक्लोपेडिया-इण्डिका, वाल्यूम 21, पृष्ठसं0 279

चतुर्थशतके समुद्भूतः **कात्यायन** एव स्मृतिग्रन्तकारः, वैयाकरणत्वेन प्रथितः **वार्तिककारो**ऽप्यवर्तत इति। अथ चासावेव **वररुचिः कात्यायना**भिख्येन संस्कृतवाङ्मये प्रसिद्धिमाससाद[1]। पाश्चात्यविदुषः **बी0ए0 स्मिथ**महोदयस्य मतानुसारं **वररुचि-कात्यायनो**ऽयं ख्रिष्टाब्दपूर्वमष्टम्यां शताब्द्यां विद्यमानोऽवर्त्तत[2] इति, किन्तु ऐतिह्यसाक्ष्याभावात् **स्मिथ**महोदयस्य मतमिदं न विचारसहम्। **षडगुरुशिष्य**नामधेयेन वेदान्तविदुषा प्रणीतायां **वेदान्तदीपिका**यामेतदुल्लिखितं विद्यते यत् छन्दःशास्त्रस्य प्रणेता **पिङ्गलाचार्यः पाणिने**रनुजन्माऽर्थात् कनिष्ठभ्राता आसीत्। पूर्वपल्लवितः **व्याडि**नामा विद्वान् **पाणिने**र्मातुलभ्राता आसीत्। ख्रिष्टाब्दस्य द्विशत-(200) वर्षपूर्वोद्भवः महर्षिः **पतञ्जलि**रप्यभिधत्ते यत् **कौत्स**ऋषिः **पाणिनेः** शिष्य आसीदिति[3]।

एतवताऽस्मत्पूर्वप्रतिपादितरीत्या **पुष्पदन्त-वररुचि-कात्यायन-पाणिनि-व्याडीन्द्रदत्त**प्रभृतीनां विदुषां समकालवर्तित्वं स्वत एव सिद्धम्। पाणिनि-**कात्यायन**योर्मध्ये विहितशास्त्रार्थवशादुभयोर्विदुषोः ख्रिष्टाब्दस्य चतुर्थशतक-पूर्वभवत्वमपि सुसिद्धं जातम्। केचन् विद्वांसः **पाणिनेः** कालः ख्रिष्टसम्वत्सरस्य 500/700 वर्षपूर्ववर्तित्वमङ्गीकुर्वन्ति[4], किन्तूपोद्बलकसमीचीनप्रमाणा-भावात्तन्मतमप्यपास्तम्।

अत एव गन्धर्वराजः **पुष्पदन्तः** ख्रिष्टाब्दात् प्रागेव चतुर्थशतके विद्यमान

---

1. संस्कृतसाहित्य का इतिहास, पृष्ठसं0 33, 150, 602, 635 एवं 400 लेखक-वाचस्पति गैरोला
2. आर्थर एण्टानी मैक्डानल द्वारा प्रणीत संस्कृत साहित्य का इतिहास, अनुवादक-डॉ0 रामसागर त्रिपाठी, पृष्ठसं0 495
3. तदेव, पृष्ठसं0 495
4. (क) संस्कृत साहित्य का इतिहास, पृष्ठसं0 602, लेखक-वाचस्पति गैरोला
   (ख) संस्कृतसाहित्येतिहासः, पृष्ठसं0 40, लेखकः-पं0 रामचन्द्रमिश्रः, (चौखम्भाप्रकाशनम्)

असीदिति निश्शङ्कं वक्तुं शक्यते। तथापि गवेषकाणामुपरि मया एषः भारः निक्षिप्यते यत्ते विषयेऽस्मिन् यथासम्भवं तथ्यात्मकमनुसन्धानं विधाय एतेषां विदुषामाविर्भावविषये इदमित्थन्तया निर्णयं कृत्वा संस्कृतवाङ्मये प्रथितं भ्रान्तिविलसितत्वमपाकुर्वन्त्विति।

टीकाकर्त्तुर्जगदीशभट्टाचार्यस्य परिचयः

अस्माभिः पूर्वपल्लवितस्य बङ्गविदुषः **पं० मधुसूदनसरस्वती**महोदयस्य समसामयिकोऽयं **जगदीशभट्टाचार्यः जगदीशतर्कालङ्कार**नाम्नाऽपि ख्यातिङ्गतः। बङ्गप्रान्तस्य **नवद्वीपस्थले महाप्रभुचैतन्यदेव**स्य श्वसुरः **श्रीसनातनमिश्रो**ऽवर्त्तत। तस्यैव प्रपौत्रोऽयं **जगदीशभट्टाचार्यः** ख्रिष्टाब्दस्य सप्तदशशताब्द्याः पूर्वार्द्धभागे जनुर्लेभे। 'इन्साइक्लोपेडिया-इण्डिका'-नामधेयः कोशग्रन्थोऽभिधत्ते यदद्यतः 350 वर्षं प्रागेवासौ विद्वन्मणिः स्वजन्मना बङ्गभूमिं समलङ्कृतञ्चकार। अस्य विदुषः वंशपरम्परायामिदानीमपि तत्सन्ततयः विराजन्ते।

श्रीजगदीशभट्टाचार्यस्य पितुरभिधानं **यादवचन्द्रविद्यावागीश** इत्यासीत्। यः खलु सततं वेदाध्ययनतत्परोऽवर्त्तत किन्तु विधेर्विधानन्तु विचित्रमेव बोभवीति। यदाऽसौ **जगदीशः** बाल्यावस्थायां पञ्चवर्षदेशीय एवासीत्, तदैवास्य पितुः श्रीमतः **यादवचन्द्र**स्यासामयिकं निधनं सञ्जातम्। पञ्चभ्रातृषु तृतीयस्थानीयोऽयं **जगदीशः** बाल्यावस्थायामेवाभिभावकराहित्यान्निरङ्कुशोऽथ च किञ्चिदुद्दण्ड-प्रकृतिकस्सञ्जातः। परिणामतः वृक्षेष्वारोहणम्, पक्षिणां कोटरेषु स्वहस्तनिवेशनम्, पक्षिशावकानामालम्भनन्तु तदीयं दैनन्दिनं कार्यमासीत्। एकदाऽसौ ताडवृक्षमारुह्य एकस्मिन् पक्षिकोटरे स्वहस्तनिवेशः कृतस्तदैव तत्कोटरे विद्यमानस्सर्पः फणं प्रसार्य फूत्कारस्वनं कृत्वा आघातं कर्त्तुं प्रवृत्तः। कुशाग्रबुद्धिसम्पन्नोऽसौ बालकः तस्य सर्पस्य मुखमेव पिधाय दृढेन जग्राह किन्तु तदीयः पुच्छभागोऽस्य हस्ते कुण्डलितो जातः। तदनन्तरमसौ बालकः च्छुरिकां निस्सार्य तं सर्पं खण्ड-खण्डीकृत्य भूमावपातयत्। दैवयोगेन तस्यैव वृक्षस्याधोभागे स्थितस्सन्नेकः परिव्राजकस्तदीयं निखिलं क्रियाकलापं विलोकयन्नासीत्। तद्बालकस्य धीषणाशक्त्या

प्रभावितो भूत्वा परिव्राजकोऽयं तमाहूय पठनार्थमादिदेश। तदनु बालोऽयं **जगदीश**स्तस्य संन्यासिन आश्रमे स्थित्वा विद्याध्ययनमारब्धवान्। विद्यारम्भकाले **जगदीशो**ऽसावष्टादशवर्षदेशीय आसीत्। स्वल्पैरेवाहोभिर्बालकोऽयं वर्ण-परिचयादारभ्य व्याकरण-काव्यादिनिखिलग्रन्थरत्नानां पारायणमकार्षीत्। दीनता-वशादसौ मृत्तिकातैलाभावे वंशवृक्षस्य शुष्कपत्राणि प्रज्वालयित्वा तन्माध्यमेन प्रकाशमासाद्य विद्याध्ययनं करोतिस्म।

गच्छता कालेनासौ **जगदीशः** बङ्गविद्वत्सु लब्धप्रतिष्ठविदुषः **श्रीभवानन्द-सिद्धान्तवागीश**शर्म्मणश्चतुष्पाठ्यां विद्याध्ययनं कृत्वा न्यायशास्त्रेऽप्रतिमं पाण्डित्य-माससाद। तत्रत्यैरेव गुरुभि**र्जगदीशो**ऽयं 'तर्कालङ्कार' इत्युपाधिना विभूषितो बभूव। कालान्तरेऽसौ **नवद्वीपे**ऽवस्थितानां बङ्गाभिजनानां साहाय्येन स्वनाम्ना एकां चतुष्पाठीमपि स्थापितवान्, यत्र सुदूरदेशेभ्यः ज्ञानपिपासवःच्छात्राः विद्याध्ययनार्थमागच्छन्तिस्म। तदानीं नवद्वीपस्य विद्वत्सु नैयायिकप्रवरस्य **श्रीजगदीश-तर्कालङ्कार**स्याभिधानमतीव समादरपूर्वकं परिगृह्यतेस्म।

मैथिलविदुषः **गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणि**माधारीकृत्य यथा हि श्रीमता **गदाधरभट्टाचार्येण** 'गादाधारी' टीका आटीकिता, अथ च प्रसिद्धपाण्डित्येन श्रीमता **रघुनाथशिरोमणिना** 'दीधिति'-र्नाम्नी टीका विरचितेति विदितचरम्। **जगदीशतर्कालङ्कारो**ऽयं **रघुनाथशिरोमणे**-'र्दीधिति'टीकोपरि 'जागदीशी'-नाम्नीं नितान्तपाण्डित्यपूर्णां मनोहरां टीकां विरच्य न्यायशास्त्रेऽतुलं यशश्चयमविन्दत। तदनन्तरमसौ 'तर्कामृतमि'ति नाम्ना न्यायग्रन्थरत्नस्य एवञ्च 'शब्दशक्तिप्रकाशिका'-भिख्यस्य सुप्रथितस्य ग्रन्थस्यापि प्रणयनञ्चकार। अस्यां हि शब्दशक्तिप्रकाशिकायां साहित्यिकानां व्यञ्जनाशक्तेस्सर्वतोभावेन खण्डनमनेन कृतम्।

एतदेव ग्रन्थरत्नमस्य **जगदीशतर्कालङ्कार**स्य सर्वस्वभूतमिति मन्यते। तदनन्तरमसौ मम्मटाचार्यस्य 'काव्यप्रकाशमा'श्रित्य ''रहस्यप्रकाश''नाम्नीं सुमनोहरां टीकां प्रणिनाय[1]। टीकेयमद्यावधिः प्रकाशनसौभाग्यं नासादिता। एतस्याष्टीकायाः

---

1. (क) ऐंग्लोसंस्कृतलाइब्रेरी, नवद्वीपः, पाण्डुलिपिसंख्या 673
   (ख) नोटिसेज् ऑफ संस्कृत मैन्युस्क्रिप्ट्स द्वारा राजेन्द्रलालमित्र सूचीसंख्या 1651

प्रकाशने विद्वद्भिर्यत्नशीलैर्भाव्यम्। गच्छता कालेनासौ **श्रीमच्छङ्कराचार्य**विरचित-**सौन्दर्यलहरी**त्यपराभिख्यां **आनन्दलहरी**माश्रित् 'रहस्यप्रकाश'-नाम्नीं टीकामपि रचयामास। एतस्याष्टीकायाः पाण्डुलिपिः 'इण्डिया-आफिस-लाइब्रेरी-लन्दन' मध्ये सुरक्षिता वरीवर्तीति 'न्यू कैटलागेज-कैटलागोरुम'-नामधेयः पाण्डुलिपि-कोशग्रन्थः स्पष्टयति[1]।

अस्मिन्नेव क्रमेऽनेन महाविदुषा 'महिषासुरमर्दिनी'तिनाम्नः स्तोत्रग्रन्थस्यापि 'रहस्यप्रकाशा'भिख्या टीका विरचिता। टीकेयमिदानीं कुत्रचिदपि नोपलभ्यते। सा टीका कालकवलिता जातेति मन्ये, किन्तु **पं० हरप्रसादशास्त्रिणा** विनिर्मिते 'द नोटिसेज ऑफ संस्कृत-मैन्युस्क्रिप्ट्स' नाम्नि कोशग्रन्थे समुल्लिखिता विद्यते[2]। नैतावन्त्येवापितु भगवतः **श्रीकृष्णस्य** मुखारविन्दान्निःसृतां सर्वोपनिषदः सारभूतां **श्रीमद्भगवद्गीता**मवलम्ब्यासौ 'रहस्यप्रकाशा'ख्यामतीव वैदुष्यपूर्णां टीकां प्राणैषीत्। टीकेयं पश्चिमबङ्गप्रान्ते कोलकातायां **सर् विलियमजोन्स**महाशयेन संस्थापितायां 'रायल-एशियाटिक-सोसाइटी-बङ्गाल'नामिकायां संस्थायामिदानीमपि सुरक्षिताऽस्ति[3], तत्प्रकाशनाय विपश्चिदपश्चिमैः प्रयत्नशीलैर्भाव्यम्।

न्यायशास्त्रनदीष्णेनानेन महाविदुषा विरचितानां न्यायग्रन्थनां तट्टीकाग्रन्थानाञ्च संख्या नास्त्यल्पीयसी। तस्मात्तेषां सामग्र्येणात्र परिगणनमसम्भवमेव, तत्तु पाण्डुलिपिकोशग्रन्थादेवाकलनीयम्[4]।

---

1. न्यू कैटलागेज् कैटलागोरुम, वाल्यूम VIII, पृष्ठसं० 129
2. द नोटिसेज् ऑफ संस्कृतमैन्युस्क्रिप्ट्स-द्वारा-पं० हरप्रसादशास्त्री, वाल्यूम II, रिपोर्टसंख्या 607
3. (क) रायल एशियाटिक सोसाइटी, बङ्गाल, 1, पार्क स्ट्रीट, कोलकाता
   (ख) नोटिसेज् ऑफ संस्कृत मैन्युस्क्रिप्ट्स, द्वारा पं० हरप्रसादशास्त्री, वाल्यूम I, रिपोर्टसंख्या 257
4. न्यू कैटलागेज् कैटलागोरुम,वाल्यूम VII, पृष्ठसं० 126-128

मातृकाणां परिचयः

श्रीशिवमहिम्नःस्तोत्रस्य 'रहस्यप्रकाशा'भिख्यायाष्टीकायाःनिम्नाङ्किताः पञ्चसंख्याकाः मातृका विविधमातृकागारेषु सुरक्षितास्सन्ति–

संस्थाया अभिधानम्	स्थानम्	अधिगम संख्या	टीकाया नाम	लिपिः	पत्रसं0 पूर्णः/ अपूर्णः	आकारः	प्रतिपत्रे पंक्तयः अक्षराणि
1. युनिवर्सिटी ऑफ ढाका	ढाका	2247A	रहस्य-प्रकाशः	बङ्ग	–	–	–
2. बङ्गीयसाहित्य परिषद	कोलकाता	1777	,,	,,	–	–	–
3. विश्वभारती विश्वविद्यालय	शान्ति-निकेतन	607	,,	,,	–	–	–
4. राष्ट्रिसंस्कृत-संस्थानम्, गङ्गा-नाथझापरिसरः	प्रयागः	7185	,,	मैथिली	1-17 पूर्णः	38×6.5	7:52
5. ,,	,,	23318	,,	बङ्ग	1-18 पूर्णः	40×8.5	8:78

उपर्युक्तासु पञ्चमातृकासु क्रमसंख्या 1-3 पर्यन्तमुल्लिखिताः मातृकाः कृतेऽपि प्रयासबाहुल्ये मया नैव समासादिताः। अत एव ग्रन्थसंरक्षणधिया **राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरे**ऽवस्थितं मातृकाद्वयमेवाधारीकृत्य मयैतत्सम्पादनकार्यं सुसाधितम्। उभयोर्मातृकयोर्मध्ये मैथिलीलिप्यामुपनिबद्धा मातृका समधिकपाठयुता परिशुद्धा च वरीवर्ति, एतावता सैव मातृका मया आदर्शमातृकारूपेण परिगृहीता। तदतिरिक्ता बङ्गलिप्यामुपनिबद्धा मातृका पाठभेद-कार्यनिमित्तं सम्प्रयुक्ता।

पाठकानां सौकर्यहेतवे मैथिलीलिप्यामुपनिबद्धां मातृकां G.J. i, इति स्थानवाचिकेन सङ्केताक्षरेण संसूचितवानस्मि। एवञ्च बङ्गलिप्यामुपनिबद्धां मातृकां G.J. ii, इतिसङ्केताक्षरेण प्रदर्शितवानस्मि। उभयोर्मातृकयोस्साहाय्येन मया ग्रन्तरत्नमिदं सुसम्पाद्य विदुषां समक्षं प्रकाश्यमानीयत इति महत्प्रमोदावसरः।

धन्यतावचांसि वितरणम्–स्वकीयपादपद्मपरागपूतीकृतनिखिलजगन्मण्डलनां विश्वविश्रुतकीर्त्तिमूर्त्तिनामस्मद्गुरुवर्य्याणां **प्रो0 रामकरणशर्मा**-महाशयानां शुभाशंसाभरितैर्वाग्वैभवैस्सनाथीभूतं ग्रन्थरत्नमिदं किमप्यपूर्वं गौरवास्पदं पदमधिरोहति। अतोऽहं सर्वादौ तेषां चरणयुगलयोः प्रणतिततिभिस्स्वकीयमाधमर्ण्यं स्वीकरोमि कृतज्ञताञ्च विज्ञापयामि।

विविधानवद्यविद्याविद्योतितततान्तःकरणानां ध्वन्यध्वन्यध्वनीनानां त्रिवेणीमहाकवित्वेन ख्यातिङ्गतानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचराणामस्मद्गुरुकल्पानां **प्रो0अभिराज-राजेन्द्रमिश्र**महोदयानामहैतुकी कृपामयी, प्रेरणाप्रदा 'नान्दीवाक्'-वल्लरीयुता सम्मतिश्शिवभक्तानां चेतस्सु कामप्यनिर्वचनीयां तृप्तिं जनयिष्यतीति नश्चेतसि द्रढीयान् विश्वासः। नितरां कृतज्ञस्सन्नहं **प्रो0 मिश्र**महाशयानां चरणयुगलयोर्निपत्य तेषामाधमर्ण्यमङ्गीकरोमि कृतवेदिताञ्च विनिवेदयामि।

धर्म्मस्य साक्षाद्विग्रहभूतानां श्रुतिस्मृतिसम्मतसदाचारपरिपालनतत्पराणां कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य धर्म्मशास्त्रविभागाध्यक्षचराणां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य 'इमेरिटसप्रोफेसर'-पदेऽधिष्ठितानामस्मद्गुरुकल्पनां **प्रो0 वाचस्पतिशर्मात्रिपाठि**महाशयानां **धर्मा**नुप्राणिता 'प्रशस्तिवाक्' सीमन्तसिन्दूरवददसीयं ग्रन्थसौन्दर्यं प्रवर्द्धयत्यतितरां नितराम्। अतः कृतज्ञोऽहं तच्चरणयोः प्रणतिपुरस्सरं कृतज्ञतां व्याहरामि धन्यतावचांसि च व्यनज्मि।

ग्रन्थरत्नस्यास्य एतत्परिसरद्वारा प्रकाशनाय मुद्रणादिव्यवस्थाद्वारा अस्माननु-

गृहीतवतां सदाचारसम्पन्नानां वेद-न्याय-मीमांसा-वेदान्तशास्त्रमर्मज्ञानां 'विपश्चिन्मणिः' 'शास्त्ररत्नाकरः' 'सर्वशास्त्रविशारदे'त्यादिविविधविरुद्विभूषितानां राष्ट्रियसंस्कृतसंस्थानस्य कार्यवाहकत्वेन कुलपतिचराणां सम्प्रति एतत्परिसरे प्राचार्यपदमलङ्कुर्वतां **डॉ० एन० आर० कण्णन्**-महोदयानां सविधे भूयोभूयः धन्यवादज्ञापनपूर्वकं प्रणामाञ्जलिं समर्पयामि।

'छन्दस्वती'-त्यपराभिधानेन ख्यातिङ्गतानां परिसरेऽस्मिन् साहित्यविभागाध्यक्षानां **प्रो० शैलकुमारीमिश्र**महाभागानां प्रेरणाप्रदेनोत्साहवर्द्धनेन ग्रन्थसम्पादनकार्यमिदं निर्विघ्नतया सुसम्पन्नं जातम्। अतः कृतज्ञोऽहं ताः प्रति धन्यवादं विज्ञापयामि कार्त्तज्ञञ्च बिभर्मि।

अत्र मूलग्रन्थे तदीय-टीकाभागे च समागतानां कतिपयेषां वैदिकपदानामर्थावगमे साहाय्यमाचरतां **प्रो० रहसबिहारीद्विवेदि**महाशयानामवदानमप्यविस्मरणीयमेव। अतः **प्रो० द्विवेदिमहाशयान्** प्रति नतिततिपुरस्सरं धन्यतावचांसि विज्ञापयामि तेषां कार्त्तज्ञञ्च बिभर्मि।

धर्मशास्त्रविभागाध्यक्षानां **प्रो० रामकृष्णपाण्डेय**-'परमहंस'महाशयानां साहित्याम्भोधौ कृतावगहानां **प्रो० विश्वम्भरनाथगिरि**महोदयानाञ्च साहाय्यमप्य-विस्मरणीयमेव। एतावता उभावपि विद्वांसौ प्रणम्यौ धन्यवादभाजौ च वर्त्तेते। ग्रन्थेऽस्मिन् समागतानां कतिपयेषां ज्योतिषशास्त्रीयपारिभाषिकपदानामवबोधे साहाय्यमाचरतां **काशीहिन्दुविश्वविद्यालय**स्य ज्योतिषविभागाध्यक्षपदम-लङ्कुर्वतामस्मत्समधीवर्य्याणां **प्रो० रामजीवनमिश्र**महाशयानां योगदानमतीव महत्त्वाधायकमासीत्। अत एवास्मत्समधीवर्य्याः **प्रो० रामजीवनमिश्र**महाशयाः सनमस्कारं धन्यवादार्हास्सन्ति।

अस्मदीया धर्म्मभार्या **श्रीमती मीनाझा**-शुभोदया निखिलं गृहकार्यजातं स्वयमेव निभाल्य ग्रन्थरत्नस्यास्य निर्विघ्नसम्पादननिमित्तं पर्याप्तं संसाधनमुपायनी-कृतवती। एतदर्थं शक्तिस्वरूपां तामप्यहमाशीर्वादशतैर्विभूषयामि। अस्मदीया पुत्री

श्रीमती निहारिकामिश्रशुभोदया पुत्रश्च **चि0 मयङ्कशेखरझा**-शुभोदयः प्रूफसंशोधनकार्ये पर्याप्तं साहाय्यमकार्षीत्। एतदर्थमुभावप्यपत्यौ शुभाशंसाभाजौ वर्त्तेते।

पाण्डुलिपि-विभागीयमानुषङ्गिकं लघुतरं कार्यं स्वयमेव सम्पाद्य गुरुतरेऽस्मिन् सारस्वतकार्ये प्रेरितवन्तं पाण्डुलिपि-पण्डितपदेऽधिष्ठितं **श्रीशैलेन्द्रपाण्डेय**-शुभोदयमप्याशीःराशिभिस्सभाजयामि। ग्रन्थरत्नस्यास्याक्षरसंयोजकाय पृष्ठविन्यासकर्त्रे च **श्रीकृष्णकुमारपाण्डेय**शर्मणे धन्यवादं विज्ञापयामि कृतज्ञताञ्च बिभर्मि। अस्मिन्नेव क्रमे **अक्षयवटप्रकाशनस्य** स्वामिने **श्रीसत्यव्रतमिश्र**महोदयाय धन्यतावचांसि वितरामि तदीयं कर्त्तांज्ञ्च सहर्षं स्वीकरोमि। अतः परं स्वनिर्मितानि कानिचित्पद्यानि समुपस्थाप्यन्ते तद्यथा–

स तर्क्कालङ्कारो जगदिति युतेशो बुधवरो
महिम्नः स्तोत्रस्य दिनकरशिवोपेन्द्रपरकाम्।
त्रिधां टीकां रम्यामकुरुत सुबाङ्लालिपिमयीं
मया नागर्यां सा सुरवचसि चाकारि सुलभा॥1॥

श्रीमद्रामकिशोरोऽहं झोपाह्वो विदुषां मुदे।
तां त्रिदेवमयीं टीकां सम्पाद्य वै यथामतिः॥2॥

बाङ्लालिपिमयी टीका नागर्यां संस्कृतीकृता।
भक्तानां सुधियां चैषा मुदे स्यादिति कामना॥3॥

सम्पादनेऽस्मिन् यदि कुत्रचित्स्यात्
त्रुटिर्मदीयाऽथ च मुद्रणस्य।
स्तोत्रं पठन्तस्सुधियस्समस्ताः
क्षम्यन्तु दोषानिति मेऽभिलाषः॥4॥

यैः कैश्चिदन्यसुजनैरिह पूतयागे
दत्तानि संयतविचारहवींषि तेभ्यः।
झोपाह्व एष किल रामकिशोरशर्म्मा
स्वीयां समर्पयति नित्यनतिं समेभ्यः॥5॥

अन्ते च **महाकालसंहितायामु**ल्लिखितेन निम्नपद्येन भूमिका-विलेखनादत्रैवोपरम्यते–

मिश्रिताभ्यां पयोम्बुभ्यां क्षीरं हंसो यथा पिबेत्।
शुभाशुभाभ्यां हि तथा शुभमेव श्रयेत् सुधीः॥

अवसाने च गुरुपरम्परया संप्राप्तं हरिहराश्रितं पद्यमिदमुपस्थाप्य विरमामि।

यौ तौ शङ्ख-कपालभूषितकरौ मालाऽस्थिमालाधरौ
देवौ द्वारवती-श्मशाननिलयौ नागारिगौ वाहनौ।
द्वि-त्र्यक्षौ बलि-दक्षयज्ञमथनौ श्री-शैलजावल्लभौ
पापं मे हरतां सदा हरि-हरौ श्रीवत्स-गङ्गाधरौ॥

॥ इतिशम् ॥

प्रयागे
मकरसंक्रान्तिः
विक्रमसम्वत् 2074

विदुषामाश्रवः
बिहारप्रान्ते मोदफलपुरमण्डलान्तर्गत-
आरोपुरग्रामवास्तव्यः
श्रीकान्ततनूजोऽहल्यागर्भजः
झोपाह्वो डॉ० रामकिशोरः

।। ग्रन्थरत्नमिदं दिनकरसहितं मुरहर-पुरहर-चरणकमलेषु समर्पितमस्तु ।।

॥ श्रीरस्तु, शुभमस्तु ॥

□□

गन्धर्वराजपुष्पदन्तमुखपङ्कजविनिर्गतं

।। श्रीशिवमहिम्नःस्तोत्रम् ।।

जगदीशतर्कपञ्चाननभट्टाचार्यविरचित-
हरि-हर-सूर्येति त्रिपक्षीय-'रहस्यप्रकाश'-
समाख्यया व्याख्यया समलङ्कृतम्

।। ॐ नमः शिवाय[1] ।।

अर्द्धं स्थाणुविलग्नाप्यर्द्धमपर्णा लता कापि[2]।
अविकलफलजनयित्री भवतां भूत्यै चिरं भूयात्।।1।।

पुष्पदन्तसमुद्गीते स्तवे संप्रति शूलिनः।
आदराज्जगदीशेन 'रहस्यार्थः' प्रकाश्यते।।2।।

[3]शैवाः कति सौराः वैष्णवाः विलसन्ति कियन्तः।
व्याख्यात्रयेण तेषां वयमिह मुदमाचरिष्यामः।।3।।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि यदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर! निरपवादः परिकरः।।1।।

---

1. ॐ नमः परदेवतायै, G. J. i
2. सती, G. J. i
3. अधिकः पाठः, G. J. i

ननु ब्रह्मादीनामपि गिरः शिवस्तवकरणे अयोग्यत्वात् कथं प्राकृतैः स्तोतव्य इति, [1]सर्वेषामेवं स्तुतिकरणायोग्यत्वमुद्भाव्य [2]न्यूनतां परिहरन् स्तवमारभते-**महिम्नेत्यादि**। हे हर! **ते** = तव, **महिम्नः** = महत्त्वस्य, **पारं** = अवधिम्, **अविदुषो** = अजानतो जनस्य, **स्तुतिः** = स्तवनम्, यदि **असदृशी** = अयोग्या, **तत्** = तदा ब्रह्मादीनामपि, **गिरः** = स्तुतिरूपाः, त्वयि **अवसन्नाः** = अवसादं प्राप्ताः, कुण्ठिता इतियावत्। [3]तथा च ब्रह्मादयो भवमाहात्म्यं न जानन्तीतिभावः। **'परमि'**त्यवधारणे, अवसन्ना एवेत्यर्थः। ननु इत्यनध्यवसायेन कोऽपि स्तवकरणे प्रवृत्तः स्यादित्याह-**अथावाच्य** इत्यादि। **अथ** = अथवा, **सर्वः** = ब्रह्मादिप्राकृतपर्यन्तः, स्वमतिपरिणामावधि यथा स्यात् तथा **गृणन्** = स्तुवन्, **अवाच्यः** = स्वनिन्द्यः, स्वमतेः **परिणामो** = विषयावाप्तिः। तथा च स्वबुद्धेर्यावद्विषयः, तावत्पर्यन्तानुधारणेनैव अवाच्यता भवतीतिभावः। तस्मान्ममापि भवदीये[4] **स्तोत्रे** = स्तवे, एष **परिकरः** = निर्बन्धः, **निरपवादः** = निर्दोष एवेति। यद्वा अविदुषो यदि स्तुतिः असदृशी, तदा ब्रह्मादीनामपि स्तुतिः त्वयि[5] अवसन्ना अस्तु। तथा **गिरः** = वाग्देवताया अपि स्तोत्रे सामर्थ्याभावात् अतिशयोत्कर्षः सूचितः। ननु यत्किञ्चिन्महिम्नः परिज्ञानेन ब्रह्मादीनां स्तुतिकरणसम्भवेऽपि न्याय-मीमांसादिबहुविधमतावरुद्धबुद्धिभिर्ब्रह्मादिभि[6]र्मया वा स कथं स्तोतव्यः? इत्यत आह–**अथेत्यादि**। स्वमतं अस्यास्तीति [7]स्वमती, तेषां **परिणामः** = अवलम्बनम्, अर्थात् स्वसिद्धान्तावलम्बनं अवधीकृत्य स्तुतिकरणे कुतः असादृश्यमिति? **ममापि,** इत्यपिकारेण ब्रह्मादीनामपि संग्रहः। अन्यच्च पूर्ववद् बोध्यम्। केचित्तु ननु यत्किञ्चिन्महिम्नोऽज्ञानेऽपि स्तुतिः सम्भवतीति 'स्तुतिरसदृशी'ति कथं उक्तम्?

1. 'सर्वेषामि'त्यारभ्य 'उद्भाव्य' यावदधिकः पाठः, G. J. i
2. स्वन्यूनतां, G. J. ii
3. 'तथा च' इत्यारभ्य 'न जानन्तीतिभावः' पर्यन्तमधिकः पाठः, G. J. i
4. भवदीयस्तवे, G. J. i
5. अयि सम्बोधने, इत्यधिकः पाठः, G. J. i
6. 'ब्रह्मादिभिः' इत्यधिकः पाठः, G. J. ii
7. स्वमतिपरिणामोऽवलम्बनम्, तथा च स्वमतावलम्बनमवधीकृत्य, G. J. ii

इत्यत आह–**अथेत्यादि**। तथा च यत्किञ्चिन्महिमज्ञानेन ईदृशस्तुतौ नैव विवाद इति भावः। ननु अनया स्तुत्या किं फलम्? इत्यत आह–**स्वमतीत्यादि**। **स्वस्मिन्** = आत्मनि, **मतिः** = आत्मतत्त्वज्ञानम्, तथा च स्तुतेः मोक्ष एव फलमितिभावः, इत्याहुः[1]।

[2]**सूर्यपक्षे तु–हे हर!** हे सूर्य! इतियावत्। 'कर्त्ता हर्त्ता तमिस्रहा' इति **पद्मपुराणादिति** तु **रहस्यम्। विष्णुपक्षे तु–हेऽहर** = हरसदृश!। तत्सादृश्यमभावश्चेत्यादिना नञोऽर्थादिति। अन्यच्च प्राग्वदिति।।1।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥2॥

ननु महिम्नः पारं कथं ब्रह्मादयो न जानन्तीत्यत आह-**अतीत** इत्यादि। **हरेति**, सम्बोधनपदमनुवर्त्तते। **तव चेति**, चकारो वस्त्वर्थे। तवैव महिमा वाङ्मनसयोः पन्थानं अतीतः। **वाङ्मनसयोरिति** समासान्तत्वादनन्तता[3]। **वाचः पन्थानम्**, पदार्थोपस्थितिरूपम्, **अतीतः** = अतिक्रान्तवान्, तदभावाश्रय इतियावत्। [4]अत्र तु वाक्पथातीतत्वेनैव स्तवस्यासम्भवात्, मनःपर्यन्तानुधावनं[5] व्यर्थम्। [6]शुकोदीरितपदग्रथनायां स्तवत्व-प्रसक्त्या तन्निराकरणाय मनः पदस्यावैयर्थ्यात्। तथा चेति, तथा च सन्निकर्षज्ञानपूर्वकगुणकथनस्य स्तवत्वेन उत्कर्षज्ञानञ्चात्र मनसा, तच्च न सम्भवति, उपनयादिसन्निकर्षविरहादिति दिक्। [7]किन्तु 'यतो

1. इत्याह, G. J. ii
2. 'सूर्यपक्षे' इत्यारभ्य 'प्राग्वदिति' यावदधिकः पाठः, G. J. i
3. समासान्तादनन्तभावाज्जातित्वात्, G. J. ii
4. न च वाक्0, G. J. ii
5. 0धावनमिति वाच्यम्, G. J. ii
6. 'शुकोदीरित' इत्यारभ्य 'इति दिक्', पर्यन्तमधिकः पाठः, G. J. ii
7. 'किन्तु' इत्यारभ्य 'ध्येयम्' यावदधिकः पाठः, G. J. i

वाचो निर्वर्त्तन्ते अप्राप्य मनसा सह' इत्यादि-**श्रुते**रनुसारेणैव चोक्तमिति ध्येयम्। मनसः पन्थास्तु बहिर्विषये उपनयादिति। ननु वाङ्मनसयोः पन्थानं स कथमतीतः? श्रुतिरूपवाग्गोचरत्वं अस्त्येव। इत्यत आह-**अतद्व्यावृत्या** इत्यादि। **अतद्व्यावृत्या, तदितरेभ्यो** = तद्भिन्नेभ्यो घटादिभ्यो **व्यावृत्या,** न घटः, न पटः, [1]इत्यादिनिषेधशेषरूपतया, श्रुतिरपि यं चरितं[2] **चकितं** = सभयम्[3], **अभिधत्ते** = बोधयति। [4]विशिष्टनिर्वचनसामर्थ्येन भयं युक्तमेव। तथा च असाधारणतद्बोधकपदाभावात् स्तवो न सम्भवतीति साधारण-यत्तत्पदादिना [5]स्तवश्च पश्चाद् व्यावर्त्तक एवेति, उपसंहरति-**स कस्ये**त्यादि। केनापि स्तोतुं न शक्यत एवेतिभावः। ननु एक एव तस्य गुणश्चेत् कथं न स्तोतुं शक्यते? इत्यह आह-**कतिविध** इत्यादि, कतिविधाः गुणा अस्येत्यर्थः। कियन्तो गुणा इति युगसहस्रेणापि ज्ञातुं न शक्यत इतिभावः। ननु ,येन ग्रहीतुं शक्यते, तस्यैव स[6] स्तोतव्यो भविष्यति, इत्यत आह-**कस्ये**त्यादि। **विषयः** = ग्राह्यः, तथा च कस्यापि ग्राह्यो न भवतीति[7]।

ननु क्षित्याद्यष्टमूर्त्तीनामेव शिवत्वात् क्षित्यादयस्तु[8] ग्राह्या एव, इत्यत आह-**पदेत्वित्यादि। पदे** = स्थाने, **अर्वाचीने** = आधुनिके क्षित्यादौ, [9]क्षित्यादयस्तु वाङ्मनसयोः पन्थानं [10]नाध्येतीति नातीत इत्यर्थः[11]। तथा च प्राचीनं शिवात्मकं

1. इत्यादिनिषेधरूपया, G. J. ii
2. अधिकः पाठः, G. J. ii
3. अधिकः पाठः, G. J. ii
4. विशेष्य0, G. J. ii
5. स्तवश्चाव्यावर्त्तक एवेति, G. J. ii
6. अधिकः पाठ, G. J. ii
7. भवन्तीत्यर्थः, G. J. ii
8. क्षित्याद्यास्तु, G. J. ii
9. क्षित्यादिस्तु, G. J. ii
10. नातियन्ति, G. J. ii
11. नातीत इत्यर्थः, इत्यधिकः पाठः, G. J. i

धाम केनापि गृहीतुं न शक्यत एवेतिभावः। **केचित् तु** - ननु स्मृतिपुराणेतिहासेभ्य एव ग्राह्यः, इत्यत आह-**पदेत्वित्यादि**। **अर्वाचीने** = स्मृत्यादौ[1], **पदे** = पदरूपे, तत्र च कस्य मनो वचो वा न पतति? तथा च स्मृत्यादिद्वाराऽपि सृष्टिस्थितिप्रलयकर्तृत्वग्रहेऽपि नेष्टसिद्धिरितिभाव इत्याहुः। ननु आधुनिक-साङ्केतिकपदैरेव स्तवः करणीयः, इत्यत आह-**पदेत्वित्यादि**[2]। **अर्वाचीने** = आधुनिकसाङ्केतिके, तथा चाधुनिकसङ्केतविषयाज्ञानादाधुनिकसङ्केतो बाधित एवेतिभावः, इत्यपि केचित्। [3]ननु अर्वाचीने पदेऽपि मनःप्रत्यासत्तौ सत्यां वाकपथाभावात् कथं स्तवः? इत्यत आह-**वच** इति। सूर्यपक्षे, विष्णु-पक्षेऽप्येवम्[4]।।2।।

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन! बुद्धिर्व्यवसिता॥3॥

ननु स्तवस्यासम्भवे कथं स्तोतुमारभ्यते? इत्यत आह–**मधुस्फीता वाच** इत्यादि। हे ब्रह्मन्! **सुरगुरोः** = बृहस्पतेरपि, **वाक्** = (वाणी), तव **विस्मयपदं** = आश्चर्यस्थानम्[5], किं भवति? ननु विस्मयपदं कथं भवतीत्यत आह–**मधुस्फीता वाचो निर्मितवत** इति। बृहस्पतेर्वाग्वैलक्षण्यार्थमाह–**मधुस्फीता** इति। ननु मधुसदृशत्वे क उत्कर्ष इत्यत आह–**अमृतमिति**। अमृतरूपा [6]वाच इत्यर्थः। अमृतस्यापि वैलक्षण्यार्थमाह–**परममिति**। **यद्वा वाक्** स्तवरूपा [7]भवति।

---

1. स्मृतौ, G. J. i
2. पदेत्विति, G. J. ii
3. ननु, इत्यधिकः पाठ, G. J. ii
4. सूर्यपक्षे विष्णुपक्षेत्यधिकः पाठ, G. J. i
5. आश्चर्यपदम्, G. J. ii
6. अधिकः पाठ, G. J. i
7. अधिकः पाठ, G. J. ii

तत्र किं विस्मयपदम्? [1]कथं न विस्मयपदमित्यत आह–**सुरगुरोरिति**। तव इत्यत्र विशेषणम्। **सुराणां गुरुः** = पूज्यः[2]। तथा च सुराणां स्तव्यत्वेनास्माकं वा फलैराश्चर्यस्थानमितिभावः[3]। ननु स्तवादिकरणे किं फलमित्यत आह–**मधुस्फीता वाचोनिर्मितवत** इति। तवेत्यत्र विशेषणम्। तथा च [4]स्तोतुः पुरुषस्य [5]मधुस्फीतवाचा**मायत्तिः** = निष्पत्तिः[6] (एव) फलमितिभावः। ननु मधुस्फीतवाङ्निष्पत्तिरूपं [7]फलं तु क्षुद्रमेव इत्यत आह–**अमृतं निर्मितवत** इति। **अमृतं** = मोक्षम्, मोक्षेऽपि वैलक्षण्यमाह– **परममिति**, निर्वाणरूपमित्यर्थः। ननु सुरगुरोरपि वाक् यदि न विस्मयपदम्, तदा कथं स्तव आरभ्यते? इत्यत आह–**ममेत्यादि**, भवतो गुणकथनपुण्येन एतां स्तवरूपां वाणीं **पुनामि** = (पवित्रीकरोमि) इतिकृत्वा **अस्मिन्नर्थे** = स्तवरूपे, हे पुरमथन! [8]मम तु **बुद्धिर्व्यवसिता** = व्यवसायवतीत्यर्थः[9]।

[10]**सूर्यपक्षे तु**–पुराणि मथ्नाति, प्रलयकाले सूर्य एव वर्च्चसा सर्वाणि पुराणि दहतीति पुराणादौ श्रवणात्, **पुराणि मथ्नाति**, रश्मिभिरुत्तापयति इति वा, **पुरमथनः** = सूर्यः।

विष्णुपक्षे तु-पुरस्य = षट्पुरस्य मथनो विष्णुः। **अथवा** शररूपेण विष्णुरपि त्रिपुरमथनः, 'रथचरणपाणिः शर' इति वक्ष्यमाणत्वात्। वाणीं पुनामि। अथवा **पुरं** = शरीरम्, पुनामि इतिकृत्वा अस्मिन् अर्थे बुद्धिर्न व्यवसिता? अपितु व्यवसितैव। शिरश्चालनञ्च इति कश्चित्।।3।।

---

1. किं विस्मयपदम्, G. J. ii
2. अधिकः पाठः, G. J. i
3. फलैराश्चर्यमितिभावः, G. J. ii
4. स्तोतुं, G. J. ii
5. मधुस्फीता, G. J. ii
6. अधिकः पाठः, G. J. i
7. फलं तु, इत्यधिकः पाठ, G. J. i
8. ममत्वबुद्धि0, G. J. ii
9. व्यवसायवतीति यावत्, G. J. ii
10. 'सूर्यपक्षे' इत्यारभ्य 'इति कश्चित्', पर्यन्तमधिकः पाठः, G. J. i

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन्वरद! रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥4॥

ननु निरीश्वराणां मीमांसकानां [1]मते कथं स्तुतिविषयं सङ्गच्छत इति तन्मतं निराकुर्वन् आह–**तवैश्वर्यमित्यादि**। तवैश्वर्यं यत्[2] **त्रयीवस्तु** = वेदानां त्रयाणां प्रतिपाद्यम्। तथा च ईश्वरे वेदा एव प्रमाणमिति। एतेन मीमांसकमतमपास्तम्। **ऐश्वर्यं** = नित्यज्ञानेच्छाकृतिरूपम्। ननु ईश्वरप्रतिपादक–वेदानामर्थवादान्नेश्वर-सिद्धिः, इत्यत आह–**'जगदुदयरक्षाप्रलयकृदिति'**। [3]कृदिति भावे क्विप्। **उदयः** = सृष्टिः। **रक्षा** = पालनम्। तथा च [4]क्षित्यादिकर्तृन्यनुमानेन ईश्वरसिद्धिरितिभावः। तव[5] तदेव ऐश्वर्यं तिसृषु तनुषु **व्यस्तं** = पृथक्त्वेन स्थितम्। ननु [6]एकस्यैव शिवस्य तनुत्रयवत्वं कथम्? इत्यत आह–[7]**गुण-भिन्नास्विति**। **गुणैः** = सत्त्वरजस्तमोरूपैः, **भिन्नासु** = ब्रह्मविष्णुशिवात्मिकासु। साक्षेपं मीमांसकमतमाह–**अभव्यानामित्यादि**। हे वरद! इह तिसृषु तनुषु। **यद्वा**[8] इह लोके रमणीयां न पुनः परत्रापीति। **एके** = मीमांसकाः, अस्मिन् ऐश्वर्ये **व्याक्रोशीं** = वक्ष्यमाण-किमिह? इत्यादिदूषणरूपां निन्दाम्, **विदधते** = उद्भावयन्ति। ननु ते कथं एवं विदधते? इत्यत आह–**जडधिय** इति। ननु मीमांसकानुयायिनो बहव एव तत्र रमन्ते[9], तत् किं ते भ्रान्ताः? इत्यत आह–

1. अधिक पाठः, G. J. i
2. अधिकः पाठः, G. J. ii
3. अधिकः पाठ, G. J. i
4. क्षित्यादिकर्तृत्वाद्यनुमानेन, G. J. i
5. अधिकः पाठः, G. J. i
6. एकस्य शिवस्य, G. J. i
7. गुणभिन्नेति, G. J. i
8. 'यद्वा' इत्यारभ्य 'परत्रापीति' पर्यन्तमधिकः पाठ, G. J. i
9. अधिकः पाठ, G. J. ii

अभव्यानां रमणीयामिति। **भव्यं** = कुशलम्, तत्शून्यानामित्यर्थः। ननु अन्येषां मते व्याक्रोशी रमणीया न वा? इत्यत आह–**अरमणीयामिति,** निन्दारूपत्वादितिभावः। निन्दायाः फलमाह–**विहन्तुमिति**, आत्मानं विनाशयितुमित्यर्थः। [1]पाषण्डानां नामग्रहणेऽपि दोषादाह–**एक** इति। [2]सूर्यपक्षे विष्णुपक्षेऽप्येवम्।।।4।।

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः।।5।।

व्याक्रोशीं विवेच्य दर्शयति–**किमीह** इत्यादि। **धाता** = धातृरूपः शिवः, **किमीहः सृजति**, का **ईहा** = चेष्टा-व्यापरौ यस्य। तथा च तादृश-व्यापाराभावात् त्रिभुवनकर्त्तृत्वं बाधितमितिभावः। ननु क्षित्यादिकर्त्तुः शरीरसत्वे तादृशव्यपारोऽपि भविष्यति, इत्यत आह–**किं काय** इति। **कः** = कीदृशः, कायो यस्य। तथा च क्षित्याद्यनुकूलतादृशशरीराभावादेव कर्त्तृत्वं बाधितमितिभावः। ननु क्षित्याद्यनुकूलतादृशोपायान्तरसम्भवे[3] तादृशशरीरमपि, तथा[4] सेत्स्यति, इत्यत आह–**किमुपाय** इति। **कः** = कीदृशः, उपायो यस्य इत्यर्थः। **उपायः** = कारणान्तरम्। तथा च उपायाभावादेव कर्त्तृत्वं बाधितमितिभावः। ननु कार्यान्यथानुपपत्या तादृशोपायः सेत्स्यति, इत्यत आह–**किमाधार** इति। **कः** = कीदृशः, आधारो यस्येत्यर्थः। यथा च[5] कुलालस्य घटोत्पादे कर्त्तुरधिकरणापेक्षा[6], तथा अत्रापि अधिकरणसापेक्षता[7]।

1. 'पाखण्डानामित्यारभ्य 'एक इति' पर्यन्तमधिकः पाठ, G. J. i
2. सूर्यपक्षे विष्णुपक्षेऽप्येवमित्यधिकः पाठ, G. J. i
3. 0तादृशोपायान्तरसद्भाव-तादृश0, G. J. i
4. अधिकः पाठः, G. J. i
5. अधिकः पाठ, G. J. i
6. 0पेक्षया, G. J. ii
7. 0सापेक्षा, G. J. i

तादृशाधिकरणञ्चाप्रसिद्धमेवेतिभावः[1]। ननु 'तत्रापि सा निराधारा युयुधे तेन चण्डिका' इति **मार्कण्डेयपुराणदर्शनात्**, आधारं विनापि कार्यं भविष्यति इत्यत आह– **किमुपादान** इति। **उपादानं** = समवायिकारणं यस्येत्यर्थः। यथा घटादेः कपालाद्युपादानम्, तद्वत् क्षित्याद्युपादानं न सम्भवति इतिभावः। [2]इत्यनेन प्रकारेण **कांश्चन्** = मीमांसकान्, कुतर्कोऽयं **मुखरयति** = मुखरीकरोति। पाषण्डानां नाम न ग्राह्यम्, इत्यत आह–**कांश्चिदिति**। ननु मीमांसकानेव कथं मुखरयति? इत्यत आह–**हतधिय** इति, दुर्बुद्धीन् इत्यर्थः। ननु ते हतधियो भवन्तु, अन्येषां का क्षतिः? इत्यत आह–**जगतो मोहाय** इति, भ्रमाय इत्यर्थः। ननु एतत्तर्कसहकारेण अनुमानात् ऐश्वर्याभावः सेत्स्यति, इत्यत आह–**अनवसरदुःस्थ** इति। **त्वयि** = ईश्वरे, **अनवसरात्** = तर्कानवकासात्[3], **दुस्थः** = दुर्बल इत्यर्थः। ननु कथमत्र तर्कावकाशो नास्ति? इत्यत आह–**अतर्क्यैश्वर्य** इति। इदमैश्वर्यं **अतर्क्यम्** = तर्काविषयः, वेदादिबलवद्बाधक-सत्वादितिभावः। [4]सूर्यपक्षे विष्णुपक्षेऽप्येवम्।।5।।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठतारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर! संशेरत इमे।।6।।

ननु तथापि नेश्वरसिद्धिः अजन्या एव, क्षित्यादयो [5]बाह्याः, इत्यत आह– **अजन्मान** इत्यादि। **अवयववन्तोऽपि लोकाः** = क्षित्यादयः, **किमजन्मानः?**

---

1. 0मिवेतिभावः, G. J. ii
2. इत्यनेकप्रकारेण, G. J. i
3. अधिकः पाठः, G. J. ii
4. अधिकः पाठः, G. J. i
5. वाच्या, G. J. i

= अनुत्पत्तिमन्तः ? अपि तु न [1]भवन्त्येवम्। तथा च अवयवित्वम्, जन्यद्रव्यत्वम्, अजन्यत्वम्, तच्च [2]गोत्वाश्वत्ववद्विरुद्धमितिभावः। ननु सावयवत्वेन क्षित्यादेर्जन्यत्वसिद्धेऽपि[3] ऐश्वर्ये[4] किं [5]प्रमाणम्? इत्यत आह–**जगतामित्यादि**। **जगतामधिष्ठतारं** = [6]कर्त्तारम्, **अनादृत्य** = [7]अनपेक्ष्य, **भवविधिः** = उत्पत्तिविधिः, तथा च कार्यत्वहेतुकसकर्तृत्वानुमानेन ईश्वरसिद्धिरितिभावः। **मीमांसकः** [8]शङ्कते–**अवनीशो वा** इत्यादि। ईश्वरभिन्न एव क्षित्यादिकर्त्ता स्यात् इतिभावः। **समाधत्ते**–भुवनेत्यादि, **परिकरः** = परिवारः, सहकारीतियावत्, स्वर्गेऽपि वा।

'परिकरः पर्यङ्क-परिवारयोरि'**त्यमरः**। तथा च अनीश्वरस्य भुवनजनने कः सहकारी स्यात्? अनीश्वरस्य स्तवनोत्पादसामर्थ्याभावात्, सहकारिणस्तथात्वे स एव ईश्वर इतिभावः। ननु ईदृशविशेषदर्शनात् कथमेषां ईश्वरे संशयः? इत्यत आह–**यत** इत्यादि, **यतः** = [9]ईश्वरविशेषदर्शनात् हे अमरवर! **इमे** = मीमांसकाः, **त्वां प्रति** = त्वां लक्ष्यीकृत्य, **संशेरते** = संशयवन्तः, [10]अतस्ते मन्दाः। यथा सूर्योदयशालित्वज्ञानेऽपि प्राच्यां प्रतीच्यादिभ्रमस्तद्वदत्रापीतिभावः।

[11]सूर्यपक्षे विष्णुपक्षेऽप्येवम्।।6।।

---

1. भवन्त्येव, G. J. ii
2. गोत्वाश्वत्वविरुद्धः; G. J. i
3. 0जन्यत्वे सिद्धेऽपि, G. J. ii
4. ऐश्वर्येऽपि, G. J. ii
5. मानम्, G. J. i
6. अधिकः पाठ, G. J. i
7. अधिकः पाठ, G. J. ii
8. शङ्क्यते, G. J. ii
9. ईदृशविशेषदर्शनात्, G. J. i
10. अतस्ते मन्दाः, इत्यधिकः पाठः, G. J. i
11. अधिकः पाठः, G. J. i

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥7॥

ननु [1]ब्रह्मादित्रयाणां देवानामेव सृष्ट्यादिकार्यत्रयकर्त्तृत्वेन शिवस्य किमसाधारण्यम्? इत्यत आह–**त्रयी**त्यादि। **इति** = एभिः प्रकारैः, **प्रस्थाने,** प्रस्थीयते अनेन इति **प्रस्थानम्** = पन्थाः, तस्मिन् प्रभिन्ने सति इत्यर्थः। इति इत्यस्य विवरणमाह–**त्रयीत्यादि**। [2]**त्रयी** = वेदाः। **यद्वा** त्रयाणां ब्रह्म-विष्णु-शिवानां समाहारस्त्रयी, अयमेकः पन्थाः। **सांख्यं** = कपिलप्रणीतं चतुर्विंशतितत्त्वपरिचायकं शास्त्रम्। संख्यायते अनेन इति **सांख्यं** = ज्ञानमिति वा, अयमेकः पन्थाः। **योगः**, वशिष्टमहर्षिणा निगदितः भगवता अर्जुनाय उपदिष्टो वा, अयमेकः पन्थाः। **पशुपतिमतं** = शैवागमः, अयमेकः पन्थाः। **वैष्णवं** = वैष्णवागमः, स एकः पन्था। एवं [3]बहुतरप्रकारेणेत्यर्थः। इदं एकमतं त्रयीरूपम्, **परं** = प्रकृष्टं पथ्यम्। **अदः** = [4]'संख्यादिरूपं प्रकृष्टं पथ्यमिति च[5]'। एवम्प्रकारेण तु **रुचीनां** = [6]इच्छानाम्, **वैचित्र्यात्** = [7]वैलक्षण्यात्, ऋजु-कुटिलनानापथजुषां नृणां त्वं **एको** = [8]मुख्यो, गम्योऽसि। साक्षात् त्वद्भजनभाक्पन्थाः[9] ऋजु-परम्परात् त्वद्भजनभाक्पन्थाः कुटिल इत्यर्थः। ननु ऋजुमार्गसत्वे कथं कुटिलमार्गानुसरणम्? इत्यत आह–**अर्णव** इवेति। यथा

---

1. ब्रह्मादीनां त्रयाणाम्, G. J. ii
2. त्रयी = वेदाः। यद्वा, इत्यधिकः पाठः, G. J. ii
3. बहुप्रकारेणेत्यर्थः, G. J. ii
4. सांख्यादि, G. J. ii
5. 'च' इत्यधिकः पाठः, G. J. ii
6. अधिकः पाठः, G. J. ii
7. अधिकः पाठः, G. J. ii
8. मृग्यो, G. J. ii
9. 0वाक्पन्थाः, G. J. ii

कश्चिन्नदः साक्षात् समुद्रगः [1]कश्चिच्च नदान्तरसङ्गतः समुद्रगः। तथा च [2]जलान्तरसेविनामपि शिव एव पर्यवसानम्, किन्तु चिरकालेनेति। कुटिलवर्त्मानुसरणं न प्रशस्तमितिभावः। **परे तु-ऋजुकुटिलनानापथजुषामिति**, **ऋजुपन्थाः** = [3]सात्त्विककर्मोपाययोग्यः। तदुपायश्च [4]सत्त्वरजस्तमांसि। ईदृशनानापथजुषां मनुष्याणां त्वमेको **अगम्यः** = अप्राप्यः, [5]राजसादिकर्म तु सकामानामेव, तथा च निष्कामानामेव त्वं प्राप्य इतिभावः। ननु नानापथसेविनः कथं मनुष्याः? इत्यत आह–**रुचीनामित्यादि**। तथा च इच्छावैलक्षण्यमेव तत्र नियामकमितिभावः। ननु केषाञ्चिद् बन्धेच्छा, केषाञ्चिन्मोक्षेच्छा इत्यत्र किं नियामकम्? इत्यत आह–**त्रयीत्यादि**, त्रयो वेदा इत्यर्थः। तथा च **भगवद्गीतायाम्**–

एवं त्रयी धर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते॥ इत्यादि।

मोक्षेच्छानियामकमाह–**सांख्यमिति**, तथा च [6]योगोऽपि। पुनः बन्धेच्छानियामकमाह–**पशुपतीत्यादि**। शैवागम-वैष्णवागमयोः वेदवत् स्वर्गादिप्रतिपादकत्वादिति, **प्रस्थाने** = उपाये, **परं** = स्मृति-पुराणादि, **इदं** = त्रयीरूपम्, **अदः** = सांख्यादिरूपम्, **इति** = एवम्प्रकारेण, **पथ्यं**, तादृशेच्छानां [7]नियामकमित्यर्थः। [8]केचित्तु हे ऋजुकुटिल! पापान्न निह्नुतिः, पुण्यान्न निरृजुः, नानापथजुषां त्वमेकोऽगम्यः नृणाम्। [9]मनुष्यागम्यत्वं दृष्टान्तविधया साधयति–

1. कश्चिन्नदान्तरसङ्गतः, G. J. ii
2. वर्षान्तर, G. J. i
3. सात्त्विककर्मोपायः, G. J. ii
4. तत्तच्छास्त्रम्, G. J. ii
5. राजसादिकर्मत्वं, G. J. ii
6. योगेऽपि, G. J. i
7. नियामक इत्यर्थः, G. J. i
8. 'केचित्तु' इत्यारभ्य 'त्वमेकोऽगम्यः' पर्यन्तमधिकः पाठः, G. J. ii
9. 'मनुष्यगम्यत्वमि'त्यारभ्य 'साधयती'ति यावदधिकः पाठ, G. J. i

पयसामर्णव इव इति। [1]**पयसां** = क्षीराणाम्, **अर्णवः** = समुद्रः, क्षीरोद इत्यर्थः। यथा क्षीरोदो मनुष्याणामगम्यस्तथा त्वमपीतिभावः, [2]इत्याहुः। [3]सूर्यपक्षे विष्णुपक्षेऽप्येवम्।।7।।

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद! तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।8।।

ननु ईदृशां नृणां ईश्वरस्यागम्यत्वेऽपि बन्धनिवृत्तिः कथं स्यादित्यत आह–**महोक्ष** इत्यादि। ननु नृभिरिन्द्रादयः सुराः कथं न मृग्यन्ते? इत्यत आह–**सुरा** इत्यादि। **सुराः** = इन्द्रादयः, **तां तामृद्धिम्**, ऐरावतादि, वज्रादि, क्षौमादि, चतुःसमानुलेपनादि, मणिहारादि रत्नचषकादि[4], त्रैलोक्यैश्वर्यादिरूपाम्, **दधति** = भुञ्जते। ननु ईदृशर्द्धिमन्तः सुराः कथं न मृग्याः? इत्यत आह–**भवद्भ्रूप्रणिहिताम्** इति। **तु** शब्दोऽवधारणे। [5]भवद्भ्रूभङ्गेनैव **प्रणिहितां** = अर्पितामित्यर्थः। एवञ्च शिव एव मृग्यो न सुरा इतिभावः। ननु शिवस्यापि ईदृश्यर्द्धयः [6]सन्त्येवेति, कुतो देवतान्तरवैलक्षण्यम्? इत्यत आह–**महोक्ष** इत्यादि। महांश्चासौ [7]उक्षश्चेति। **महत्त्वं** = वृद्धत्वम्, वृद्धवलीवर्द्द इत्यर्थः। एकवचनेन वृषान्तरव्यावृत्तिः। **खट्वाङ्गं** = शूलम्, **परशुं** = कुठारम्, **अजिनं** = चर्म्म,

---

1. पयसां अर्णव इव = क्षीरोद इव, अणर्व इति क्षीराणां
   अर्णवः = समुद्रः, G. J. ii
2. अधिकः पाठः, G. J. i
3. अधिकः पाठः, G. J. i
4. चषको स्त्री-पानपात्रमित्यमरः, इत्यधिकः पाठः, G. J. i
5. भवद्भ्रूभङ्गेन प्रणिहिताम्, G. J. ii
6. सन्त्येव कुतो, G. J. ii
7. उक्षा चेति, G. J. ii

भस्म = प्रसिद्धम्, **फणिनः** = सर्प्पाः, **कपालं** = मनुष्यशिरोऽस्थि। एतेन ऐरावतादि-वज्रादिक्षौमवस्त्रादि-चतुःसमानुलेपनादि-रत्नहारादि[1]-रत्नचषकादिभ्योऽपकर्षः सूचितः। इत्येवं प्रकारेण **इयत्** = एतावत्, हे वरद! तव **तन्त्रोपकरणं** = [2]प्रधानमुपकरणम्। **'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये[3] परिच्छदे'** इत्यमरः। **उपकरणं** = सहकारि। ननु त्रैलोक्यैश्वर्यादि स्वयं कथं न [4]दधति? इत्यत आह–**न हीत्यादि**। स्वकीये आत्मनि आरमन्ते इति आत्मारामः। तथा च **स्वात्मारामं** = परमयोगिनम्, [5]विषय-वासनारूपा या मृगतृष्णा, सा हि यस्मात् **न भ्रमयति** = न मोहयति। एवञ्च विषयवासनाग्रस्तानामेव ऐश्वर्यादिसुखेच्छा, न तु परमयोगिनः शिवस्येतिभावः।

[6]**सूर्यपक्षे**–हे वरद! ईयच्चक्रादि इति प्रकरणम्, **'इति हेतुप्रकरण-प्रकाशादिसम्पत्तिषु'** इत्यमरः।

द्यूतेऽक्षे शारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये।
नाद्यूताङ्गे कार्षचक्रे व्यवहारे कलिद्रुमे।। इत्यमरः।

तथा चक्रादियुद्धोपयुक्तप्रकरणं तव महः। तथा च **महाभारते**–

ततोऽभ्युपगमत् त्वष्टा मार्त्तण्डस्य विवस्वतः।
भूमिमारोप्य तत्तेजः पातयामास तत्त्ववित्।। इत्यादि।

त्वष्टा तत्तेजसा तेन विष्णौ चक्राद्यकम्पयत्। एवं **खट्वाङ्गं** = शूलम् , **परशुः** = शिवस्यास्त्रम्, परशुरामस्य च। **अजिनं** = चर्म्म, कर्णस्य कवचरूपम्,

1. रत्नहारादि, इत्यधिकः पाठः, G. J. ii
2. प्रधानोपकरणम्, G. J. ii
3. सूत्रवापे, G. J. ii
4. दधाति, G. J. ii
5. विषयरूपा, G. J. i
6. 'सूर्यपक्षे' इत्यारभ्य 'शेषं पूर्वदिशावसेयमिति यावदधिकः पाठः, G. J. i

कृष्णार्जुनाभ्यां अभेद्यमासीत्। **भस्म** = ज्वरस्य प्रहरणम्, येन भस्मना रामकृष्णयोरपि मोहः सम्पादितः, मेरोः शृङ्गमपि भस्मसाज्जातम्। तथा च भारते-

तद्भस्मरक्षसस्तस्य मेरोः शिखरमागमत्।
प्रदीप्तं पतितं तत्र गिरिशृङ्गं व्यदारयत्।।
एवं हलधरो नन्दः कृष्णमाह विचेतनः।
कृष्ण! कृष्ण! महाबाहो! प्रदीप्तोऽस्म्यभयङ्कर!।।
एवं चिक्षेपैव महद्भस्म-ज्वालागर्भं महाबलः।
ततः प्रदीप्तगात्रस्तु मुहूर्त्तमभवत् प्रभुरि'त्यादि।।

फणिनो = महादेव-वासुकीप्रभृतयः, **कपालं** = शिरस्त्रसन्नाहरूपम्, **कं** = शिरम्, पालयतीति कपालम्। तथा च ईयद्युद्धोपयुक्तप्रकरणम्, तव तेजःस्वरूपमेव। एतद्बलादेव एते समरविजयिनः। **तन्त्राणां** = प्रधानानाम्, विष्णुप्रभृतीनाम्, **उपकरणं** = युद्धोपकरणम्। ननु विष्णुशिव-प्रभृतिभिः सुरैः कथं चक्रादिरूपा ऋद्धिर्लब्धा? इत्यत आह-**न हीत्यादि**। तथा च युद्धविजिगीषयैव चक्रादीनां ग्रहणम्, न हि आत्मारामस्य जिगीषा अस्तीतिभावः, इतिदिक्।

विष्णुपक्षे तु-महोक्षो = महावृषः, त्रिपुरयुद्धे त्रिपुरशस्त्राभिहतमहादेवरथो महोक्षरूपेण विष्णुना उद्धृत इति **महाभारतादौ दर्शनात्। खट्वाङ्गं** = दण्डः, बलभद्रावतारे लाङ्गलतया खट्वाङ्गं धृतमितिभावः। परशुरामावतारे **परशुः** = अस्त्रम्। व्यासावतारे चर्म्माम्बरत्वात् **अजिनं** = उपकरणम्। रामावतारेऽपि चिरकुञ्चाजिनाम्बराविति श्रवणाच्च। रुद्ररूपत्वे भस्म कपालञ्च, **भस्म** = उपकरणम्, 'रुद्राणां शङ्करश्चास्मीति' **गीतायामुक्तत्वात्**। अनन्तरूपस्य फणिन एव सहचराः। शेषं पूर्वदिशावसेयमिति।।४।।

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।

समस्तेऽप्येतस्मिन्पुरमथन! तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता॥७॥

ननु जगत्कर्तृत्वेन ईश्वरसिद्धौ सत्यामेव [1]तदीयतन्त्रोपकरणकथनादिरूपस्तवः, तत्र च [2]बहुतरवादिनां विवादः कथम्? इत्यत आह–**ध्रुवं कश्चिदि**त्यादि। **कश्चित्** = सांख्यः, सर्वं = (निखिलम्), **ध्रुवं** = नित्यम्, वदति। द्व्यणुकादि-घटपर्यन्तानामाविर्भावतिरोभावौ ननु उत्पाद-विनाशौ। अतः [3]सांख्यादिमते पृथिव्यादि सर्वं ध्रुवमेव। अत एव 'नासतो विद्यते भावो, नाभावो विद्यते सत' इति **भगवद्-गीतायामपि**[4] प्रतिपादितमिति। **अपरो** = बौद्धः, इदं = पृथिव्यादि सकलं **अध्रुवं** = अनित्यम्, वदति। तन्मते सर्वेषामेव क्षणिकत्वात् [5]उत्पत्ति-विनाशौ च स्वाभाविकौ, न च[6] तत्र कारणापेक्षा। **परो** = नैयायिकः, जगति **ध्रौव्याध्रौव्ये** = नित्यत्वानित्यत्वे, **गदति** = वदति। ननु एकस्यैव जगतः कथं नित्यत्वमनित्यत्वञ्च? इत्यत आह–**व्यस्तविषय** इति, पृथग्भूतविषय इत्यर्थः। तथा च परमाण्वादेर्नित्यत्वम्[7] द्व्यणुकादेरनित्यत्वमिति न विरोधः। निरीश्वराणां सांख्यानाम्, सेश्वराणामपि [8]ईश्वरकर्तृत्ववादिनाम्, अनीश्वरवादिनां पाषण्डानाम्, अशरीरीश्वरवादिनां नैयायिकानां नामग्रहणमप्यनुचितमिति, कश्चिदित्यादिपदैर्निर्देशः। एतस्मिन् [9]समस्ते व्यस्ते जगति, समस्तेऽपीत्यपिकाराद् व्यस्तेऽपीत्यर्थः। **विस्मितो** = विस्मयापन्नः[10], वस्तुतो विस्मयाभावादाह–**इवेति**। तैर्मतभेदैः करणभूतैः त्वां

---

1. त्वदीयतन्त्रोपकरणादिरूपस्तवः, G. J. ii
2. बहुवादीनां विवादे, G. J. i
3. सांख्यमते, G. J. ii
4. 0मेव, G. J. ii
5. उत्पाद0, G. J. ii
6. अधिकः पाठः, G. J. i
7. 0र्नित्यत्वमिति न विरोधः, G. J. ii
8. ईश्वराकर्तृत्व0, G. J. ii
9. 'समस्ते व्यस्ते' इत्यधिकः पाठः, G. J. ii
10. विस्मयाविष्टो, G. J. i

स्तुवन् जिह्रेमि = सलज्जोऽस्मि। ननु लज्जा चेत् कथं स्तौसीत्यत आह–**न खल्वित्यादि**। ननु भोः पुरमथन! **मुखरता** = वाचालता। न खलु **धृष्टा** = धार्ष्ट्यवती, बलवतीतियावात्। तथा च मुखरता एव लज्जामभिभूय प्रेरयतीतिभावः।

यद्वा मुखरता = मुखाश्रया, सरस्वती, **धृष्टा** = चपला। तथा च चपलसरस्वत्यैव लज्जामभिभवति इतिभावः।

[1]**सूर्यपक्षे**–पुराणि **मथ्नाति** = तापयति, सहस्ररश्मिभिरिति **पुरमथनः** = सूर्यः। सर्वमन्यत् समानम्।

विष्णुपक्षे तु–कृष्णावतारे षट्पुरवधेन **पुरमथनो** = विष्णुः। तुल्यमन्यदिति।।९।।

तवैश्वर्यं यत्नाद्यदुपरि विरञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश! यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति?।।10।।

ननु ब्रह्मविष्णू कथं स्तूयेते इति? अतोऽप्युत्कर्षमाह–**तवैश्वर्यमित्यादि**। पुरा ज्योतिर्मयलिङ्गाविर्भावसमये तन्महत्त्वातिशयेन सर्वं व्याप्तमालोक्य तदवधिज्ञानार्थं ब्रह्मविष्णुभ्यां[2] अध उर्ध्वञ्च प्रयात[3] इति पुराणादौ श्रवणात्[4]। [5]हे गिरिश! **यत्** = अनिर्वचनीयम्, **तवैश्वर्यं** = अतिशयितमहत्त्वरूपम्, तत् **परिच्छेत्तुं** = अवधारयितुम्, **उपरि** = यावद्गम्यदेशे, **अधश्च** = यावद्गम्यदेशे, **विरिञ्चिः** = ब्रह्मा, **हरिश्च** = विष्णुश्च यातौ। यत्नादेव **अनलं** = असमर्थौ। लिङ्गस्य ज्योतिर्मयत्वं ख्यापयति–**अनलस्कन्धेत्यादि**। **अनला** = अग्नयः, अर्थात्

---

1. 'सूर्यपक्षे' इत्यारभ्य 'तुल्यमन्यदिति' यावदधिकः पाठः, G. J. i
2. विष्णुब्रह्मभ्यां, G. J. ii
3. प्रयातौ, G. J. ii
4. दर्शनात्, G. J. ii
5. 'हे गिरिश!' इत्यारभ्य 'यातौ' पर्यन्तमधिकः पाठः, G. J. ii

शाखोपशाखरूपाः ये अग्नयः, तेषां **स्कन्धः** = वृक्षमूल-शाखयोर्मध्ये दीर्घप्रदेशः, तद्रूपं वपुर्यस्य। तथा **चामरः**–

'अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोरिति'।

लिङ्गरूपत्वलाभाय स्कन्धपर्यन्तानुधावनम्। [1]**स्कन्धः** = समूह इत्यपि कश्चित्। **ततः** = तदनन्तरम्, **ताभ्यां** = ब्रह्मविष्णुभ्यां, करणभूताभ्याम्, **स्वयं** = स्वयमेव, न तु तयोर्यत्नात्, **तस्थे** =परिच्छिन्नपरिमाणवत्तया स्थितवान्[2], प्रतिज्ञातवान्[3]। [4]**पुत्राय तिष्ठते कुमारीतिवत्** तस्थे।

प्रतिज्ञानिर्णयप्रकाशनेषु 'स्था' इत्यात्मनेपदमिति। [5]**यद्वा** स्वयमित्यस्य तृतीयान्तम्। यदिति च, एतत् क्रियाविशेषणम्। [6]**तस्थे** इति भावाख्यातरूपम्। **स्वयं** = स्वेनेति, कर्त्तृपदमिति। **यद्वा** स्वयं गृणद्भ्यां ताभ्यां कर्त्तृभूताभ्याम्, **तस्थे** = स्थितमिति। ननु लिङ्गस्य तस्य सङ्कुचितत्वं कथं जातम्? इत्यत आह–**अनुवृत्तिरिति**। ननु द्वावेव कथं नैव तस्थे? इत्यत आह–**गृणद्भ्यामिति,** स्तुवद्भ्यामित्यर्थः। तथा च स्तुतिरेवात्र कारणमिति। ननु भक्ति-श्रद्धाविहीनयोः स्तुतिः कथं गृहीता? इत्यत आह–**भक्तिश्रद्धाभरगुरुः**, इति क्रियाविशेषणम्, आराध्यत्वेन ज्ञानम्, **भक्तिः**। शास्त्रे तथेति प्रत्ययः, **श्रद्धा**। **तयोर्भरेण** = [7]आलम्बनेन **गुरुः** यथा स्यादित्यर्थः। ननु स्तुतेः कथं ईदृशं फलम्? इत्यत आह–**तवेत्यादि**। **अनुवृत्तिः** = सेवा, **यत्** = यस्मात्, स्वयं तस्थे, [8]तत्कारणात् किं न फलतीत्यर्थः[9]।

1. 'स्कन्धः' इत्यारभ्य 'कश्चित्' पर्यन्तमधिकः पाठः, G. J. i
2. स्थितः, G. J. i
3. अधिकः पाठः, G. J. ii
4. अधिकः पाठः, G. J. i
5. 'यद्वा' इत्यारभ्य 'तृतीयान्तम्' यावदधिकः पाठ, G. J. ii
6. 'तस्थे' इत्यारभ्य 'इति क्रियाविशेषणम्' यावदधिकः पाठ, G. J. ii
7. अनियमेन, G. J. i
8. ततः कारणात्, G. J. i
9. किं फलतीति वाऽर्थः, G. J. ii

[1]**सूर्यपक्षे त्वाह–गिरिश!, गिरेः** = उदयगिरेः, **शं** = कल्याणम्, तत्स्वरूपम् तव **ऐश्वर्यं** = महिमानम्, **परिच्छेत्तुं** = ज्ञातुम्, **उपरि** = पूर्वम्, पूर्वकालम्, पितामहत्वेन विरिञ्चिः। **अधः** = पश्चात्, **हरिः** = रामावतारः, **यातौ** = प्राप्तौ। तथा च उपरितनो ब्रह्म अधस्तनो रामः। एवं सम्बन्धवशात् अवश्यं ज्ञास्याव इति तौ यातौ, तथापि **अलं** = असमथौ। **अनलसम्बन्धवपुषः**, अनलसम्बन्धः वपुर्यस्य, तेजोराशित्वादितिभावः। ततः पितामहत्वात् उपरितनत्वं विरिञ्चिः, रामस्तु अधस्तनसन्ततित्वं प्राप्य अनन्तरं त्रिसन्ध्यं सूर्योपस्थापनात् यातौ तथापि **अनलः** = असमर्थौ। त्रिसन्ध्यं **गृणद्भ्यां** = स्तुवद्भ्यां ताभ्यामिति, तादर्थ्ये चतुर्थी। स्वयं **तस्थे** = तयोर्हृदयालम्बितया, तस्थे। अन्यत् समानम्।

विष्णुपक्षे–गिरीणां = (पर्वतानाम्), **शं** = कल्याणरूपः, विष्णोः पर्वतानामधिपतित्वात् कल्याणकारित्वमिति।

यद्वा गिरौ = सुमेरौ, शेते इति **गिरिशो** = विष्णुः, वैकुण्ठस्यापि सुमेरोरेकादेशत्वात्। **यद्वा शः** = शास्ता च प्रकीर्त्तितः, **इत्येकाक्षर** कोशात्। तवैश्वर्यं **परिच्छेत्तुं** = परीक्षितुम्, **विरिञ्चिः** = ब्रह्मा, **हरिः** = इन्द्रः। एको गो गोपदीन् अपकृत्य **उपरि** = ब्रह्मलोके, यातः। अपरतस्तु **अधः** = स्वर्गादधः, पृथिव्याम्, मथुरायां महावृष्णाद्युत्पातैः गोपपीडार्थं यातः, तथापि तौ परीक्षायामसमर्थौ। ततो ब्रह्मा इन्द्रश्च तत्कोशं स्तुतिभिः शमयामास। सर्वमन्यत् समानमिति।।10।।

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थितारायास्त्वद्भक्तेस्त्रिपुरहर! विस्फूर्जितमिदम्॥11॥

ननु ब्रह्मणो विष्णोश्च भक्त्यतिशयेन फलं जातम्, इत्यत्र किं चित्रम्? अन्येषां भक्तिः फलवती न वा? इत्यत आह–[2]**अयत्नादापाद्येत्यादि**। हे त्रिपुरहर!

---

1. 'सूर्यपक्षे' इत्यारभ्य 'सर्वमन्यत् समानम्' यावदधिकः पाठः, G. J. i
2. अयत्नादित्यादि, G. J. i

दशास्यो = रावणः, **अयत्नात्** = हेलयैव, **त्रिभुवनं** = (त्रिलोकीम्) **अवैरव्यतिकरं** = वैरसम्पर्कशून्यम्, **आसाद्य** = विधाय, इन्द्रादयस्तु भृत्यवत् स्थिताः, अन्ये राजानो युद्धे हता एव, इत्युभयथापि अवैरव्यतिकरत्वमिति। बाहून [1]**यदभृत** = धृतवान्। ननु एतस्य बाहूनां धारणे काऽनुपपत्ति? इत्यत् आह–**रणेत्यादि**। **रणकण्डू** = रणरागः, तत्पररवशानित्यर्थः। तथा च[2] यथा रणे कुम्भकर्णादीनां [3]बाणे बाहूनां च्छेदो जातः, सा सामग्री अत्राप्यस्तीतिभावः। **यद्वा** दशास्यो यद्बाहून् **रणकण्डूपरवशानासाद्य**, रणकण्डूरेव **परः** = शत्रुः, तद्वशान्। तथा च शत्रुवशवर्त्तिनोऽपि बाहूनवलम्ब्य त्रिभुवनं **अभृत** = धृतवान्[4], त्रिभुवनभर्त्ता बभूव इतियावत्। ननु वैरिषु विद्यमानेषु कथं त्रिभुवनभर्त्ता बभूव? इत्यथ आह–[5]**अवैरेत्यादि**। अन्यच्च पूर्ववदिति। त्वद्भक्तेः **विस्फूर्जितं** = प्रभावः, इदं बाहूनां धारणम्। ननु कदाचित् क-भक्तितः कथमेवं फलम्? इत्यत आह–**स्थिराया** इति। ननु स्थिराऽपि भक्तिः यादृच्छिकी चेत् कथमीदृशं फलम्? इत्यत आह–**शिरः पद्मेत्यादि**। शिरःपद्मश्रेणींभिः **रचितः** = कल्पितः, तव चरणाम्भोरुहेषु **बलिः** = पूजोपहारो, यस्यां भक्तौ। तथा च एवम्विधा भक्तिः नैव यादृच्छिकीतिभावः। रावणेन पुरा शिरांसि च्छिन्नानि[6] हरचरणेऽर्पितानीति **रामायणम्**।

यद्वा ननु[7] रावणस्य राक्षसस्य कथं शिवे भक्तिर्जाता? इत्यत आह–**त्वदिति**, पञ्चम्यन्तं **त्वत्**-[8]**प्रसादादिति** तु **फलितार्थः**। ननु ईश्वरानुग्रहो रावणे इति कथं ज्ञातम्? इत्यत आह–**शिरःपद्मे**त्यादि। त्वदित्यत्र विशेषणम्।

---

1. यदन्यत अभृत = धृतवान्, G. J. ii
2. 'तथा च' इत्यधिकः पाठः, G. J. i
3. कुम्भकर्णप्रभृतीनां बाण-बाहूनां, G. J. ii
4. भृतवान्, G. J. ii
5. अवैरमित्यादि, G. J. ii
6. च्छित्वा, G. J. ii
7. अधिकः पाठः, G. J. i
8. ०प्रासादादित्यर्थः, G. J. ii

शिरःपद्मश्रेण्या [1]**रचितो** = गृहीतः, चरणाम्भोरुहाणां बलिर्येन, तस्मादित्यर्थः। तथा च तदुपकल्पितबलिग्रहणेन हरानुग्रह उन्नीयत इतिभावः।

[2]**सूर्यपक्षे तु–हे पद्मश्रेणीरचितचरण!** पद्मश्रेणीषु **रचितौ** = अर्पितौ, चरणौ येन।

'रक्ताम्बुजासनमशेषगुणैकसिन्धुमि'ति **शारदायां** ध्यानकथनात्। **दशास्यो रणकण्डूपरवशान्, रणकण्डुर्यस्य परस्य** = शत्रोः, कार्त्तवीर्यार्जुनस्य वशान् अर्थात् तदीयानेव बाहून् आसाद्य **सङ्गस्य** = कार्त्तवीर्यार्जुनबाहूसङ्गतो भूत्वाऽपीति फलितार्थः। शिरो **अभृत** = धृतवान्, लज्जया शिरच्छेदनमिव प्रापय इति तु फलितार्थः। तत् **त्रिपुरहरविस्फूर्जितं** = महादेवमाहात्म्यम्। ननु राक्षसे कथं माहात्म्यप्रकाशः? इत्यत आह-**त्वद्भक्ते**रिति, त्रिसन्ध्यं सूर्योपस्थापने विहितभक्ति-रित्यर्थः। तथा च सूर्यभक्तित एव महादेवमाहात्म्यं प्रकाशितमिति। **स्थिरायाः** = अहरहः क्रियमाणायाः, **त्रिभुवनमिति, आपाद्येति** (च) क्रिया विशेषणम्। त्रीणि भुवनानि यत्र, तत् त्रिभुवनम्,यद्धस्तस्थमिति तु फलितार्थः। एवं **अवैरव्यतिकरम्** इत्यपि तद्विशेषणम्। सर्वमन्यत् समानम्।

विष्णुपक्षे तु–त्रिपुरहर!, त्रयाणां = हरकुवेरदशरक्षाणां पुरम्, विश्वकर्म्मणा आदौ लङ्कां निर्म्माय दत्वा दक्षिणप्लवत्वात् महादेवेन उपेक्षिता, ततः कुवेरेण गृहीता। **त्रिपुरं** = लङ्काम्, तां हरतीति **त्रिपुरहरो** = रामः। दशास्यो यद् बाहून् **अभृत** = बाहूनां च्छेदनं न प्राप। शूराणां बाहूच्छेदनन्तु मरणादपि कष्टतरम्, रामेण सह युद्धे इति भावः। **त्वद्भक्तेः** = जयविजयमवस्था-कालीनभक्तेः विस्फूर्जितम्। ननु इदानीं किं सा भक्तिः नास्ति? इत्यत आह– **स्थिराया** इति। ननु इदानीमपि सा भक्तिः स्थिरा, इत्यत्र किं प्रमाणम्? इत्यत आह–**शिर** इत्यादि। शिरांस्येव पद्मश्रेणीतया रचितः अर्थात् रामस्य चरणाम्भोरुहयोः बलिः यस्यां भक्तौ, रामचरणाहतानि शिरांस्येव, तच्चरणमुद्दिश्य बलित्वे कल्पितानि। न च शत्रौ कथं भक्तिरिति वाच्यम्? भीष्मद्रोणयोः अर्जुनस्य तथादर्शनात्, शूराणामेव स्वधर्म्म इति बोध्यम्।।11।।

---

1. रचितश्चरणा0, G. J. i

2. 'सूर्यपक्षे' इत्यारभ्य 'इति बोध्यम्' यावदधिकः पाठः, G. J. i

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः॥12॥

ननु भक्तेर्विस्फूर्जितं बाहूधारणञ्चेत्, त्रिपुरान्धकप्रभृतीनां बाहूधारणं केन [1]कारितमिति? कथं वा देवद्विषो रावणस्य विबुद्धिर्न जाता? इत्यत आह– [2]**अमुष्यत्वत्सेवे**त्यादि। **अमुष्य** = रावणस्य, पातालेऽपि अलभ्या **प्रतिष्ठा** = प्रतिष्ठानम्[3], अवस्थितिरितियावत्। तथा च पातालेऽप्यस्यावस्थितिर्नासीदित्यिर्थः। ननु रावणस्य कथं एवमवस्था जाता? इत्यत आह–[4]**कैलासेऽपी**त्यादि। अमुष्य कैलासेऽपि **भुजवनं** = भुजसमूहम्, **विक्रमयतः** = भुजवन-विक्रमं कुर्वतः। ननु कैलासोत्पाटनेऽस्य कथं असहिष्णुता? इत्यत आह–**त्वदधिवसताविति**। तथा च वसतिस्थानोन्मूलने असहिष्णुता उचितैवेतिभावः[5]। ननु ईश्वराज्ञया कैलासोत्पाटने को दोषः? इत्यत आह–[6]**बलादिति**, ईश्वरानन्दाय[7] इतिभावः। ननु स्वभुजबलेन कथं ईदृशे कर्मणि प्रवृत्तः? इत्यत आह–**त्वत्सेवेत्यादि**। ननु पातालेऽपि अस्यावस्थित्यभावः। [8]ननु साङ्गुष्ठार्पणेनापि कैलासस्य स्थिरभावः केन सम्पादितः? इत्यत आह–**अलसे**त्यादि। अलसस्य इव चलितं **अङ्गुष्ठस्य** = पादाङ्गुष्ठस्य, **शिरो** = अग्रम्,यस्य, एवम्भूते त्वयि सतीत्यर्थः। तथा च लीलया [9]पादाङ्गुष्ठा-र्पणेनापि, कैलासस्य स्थैर्यं सम्पादितम्, रावणस्य च

1. कारितम्, G. J. i
2. अमुष्येत्यादि, G. J. ii
3. अधिकः पाठ, G. J. ii
4. कैलासेऽपीति, G. J. i
5. विचित्रैवेतिभावः, G. J. i
6. बलादितिभावः, G. J. i
7. अधिकः पाठः, G. J. ii
8. 'ननु इत्यारभ्य 'स्थिरभावः' पर्यन्तमधिकः पाठः, G. J. i
9. पदा0, G. J. ii

पातालादप्यधः-पतनसम्भावनाऽपि। **यद्वा आपातालेऽपि** = पातालपर्यन्तमपि, [1]रावणस्य **प्रतिष्ठा** = कीर्त्तिरासीत्। **अलभ्या** = दुर्लभा। ननु कथं एवम्विधा प्रतिष्ठा जाता? इत्यत आह–**अलसेत्यादि**। अलसस्य इव चलिते पादाङ्गुष्ठ–शिरसी यस्य, एवम्भूते त्वयि सतीत्यर्थः।

तथा च शिरः कम्पेन रावणस्य सम्भावना कृता, **कुमारकाव्ये** तथादर्शनात्।

'कम्पेन मूर्ध्नः शतपत्रयोनिमि'त्यादि,

'सम्भावयामास यथा प्रधानमिति'।

पादाङ्गुष्ठचालनेन अभयं दत्तम्, यथा–**आनन्दलहरीस्तवे**-

भयश्रोतुं दातुं फलमपि च वाञ्छा समधिकम्।
शरण्ये लोकानां तव हि चरणावेव निपुणाविति।।

अलसेत्यनेन [2]अन्यत्र चालनं सूचितम्। [3]यद्वा **अलसो** = आरसः। अचलेति सम्बोधनम्। 'रसे रागे द्रवे रस' इति **कोशात्**। ननु शैवेनापि रावणेन कथमेवं कृतम्? इत्यत आह–**ध्रुवमि**त्यादि। **उपचितो** = वृद्धिं प्राप्तः, **खलो** = (शठः) **मुह्यति** = मुह्यत्येव ध्रुवमिति।

[4]**सूर्यपक्षे तु-त्वत् सेवा** = सूर्योपस्थापनादिरूपा, **कैलासे** = (तन्नामके) गिरौ, **त्वदधिवसतौ** = सूर्यलोके, पाताले, रावणलोकेऽपि। दिग्विजयकाले **भुजवनं** विक्रमयतो अमुष्य दुष्प्रापा प्रतिष्ठा आसीत्। प्रतिष्ठायाः कारणान्तरमाह–**अलसचलिते**त्यादि, अलसे चलिते अङ्गुष्ठशिरसी यस्येत्यर्थः। शिरश्चालन-सम्भावनया पादाङ्गुष्ठचालनेन सूचिता,जयेन च महती प्रतिष्ठा आसीदितिभावः। सर्वमन्यत् समानम्।

विष्णुपक्षे तु-त्वत्सेवा = जयविजयावस्थायाम्, कैलासेऽपि शिवस्य,

---

1. अधिकः पाठः, G. J. ii
2. अनाचलनं, G. J. i
3. 'यद्वा' इत्यारभ्य 'इति कोशात्' यावदधिकः पाठः, G. J. i
4. 'सूर्यपक्षे' इत्यारभ्य 'अन्यच्च पूर्ववदेवेति दिक्' पर्यन्तमधिकः पाठः, G. J. i

स्वाधिवसतौ = अयोध्यायाम्, अनरण्यवधसमये, **पाताले** = वरुणलोकेऽपि। प्रतिष्ठाया हेत्वन्तरमाह–**अलसेत्यादि**, अलसस्येव चलिते **अङ्गुष्ठ शिरसी** = पादाङ्गुष्ठशिरःपर्यन्तं यस्य, एवम्भूते त्वयि सतीत्यर्थः। तथा च विष्णोरपि क्रोधवशात् शरीरकम्पेन विष्णुक्रोधपात्रतया रावणस्य प्रतिष्ठा ब्राह्मणो वाचा वरदानगौरवेण च तदा क्रोधफलं न जातामितिभावः। **अलसे**त्यनेन कम्पस्य स्वल्पतालाभात् विष्णोः धैर्यं सूचितमिति। अन्यच्च पूर्ववदेवेति दिक्।।12।।

यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपि सती–
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयो–
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः।।1 3।।

ननु शिवसेवयापि रावणो मृत एवेति। [1]ततोऽपि फलातिशयमाह– **यदृद्धिम्**,इत्यादि। **सुत्राम्णो** = इन्द्रस्य,ऋद्धिं **परमोच्चैरपि** = सर्वोत्कृष्टामपि, **बाणो** = बलिसुतो, **अधश्चक्रे** = अपकृष्टीचकार। तथा च [2]बाणऋद्धिः इन्द्रसम्पत्तेरपि गरीयसीति। ननु ऋद्धेर्विनाशित्वे क उत्कर्षः? इत्यत आह– **सतीमिति** = [3]अविलग्नामित्यर्थः। [4]महादेवस्य वरप्रदानेन महाकालत्वं प्राप्तस्य बाणस्य ऋद्धिरपि स्थिरैवेति, इन्द्रस्य न तथेतिभावः। ननु तथापि त्रैलोक्यैश्वर्यशालिनः [5]शक्रात् कथमतिशयः? इत्यत आह–**परिजने**त्यादि। परिजन इव[6] **विधेयं** = वशीभूतम्, त्रिभुवनं यस्य, तथेति। **यद्वा**[7] परिजनानां विधेयं त्रिभुवनं यस्य, तथेति। ननु दैत्यस्यापि कथं ईदृशी ऋद्धिः? इत्यत आह–**त्वच्चरणयोर्वरिवसितरि**

1. 'ततोऽपि' इत्यधिकः पाठः, G. J. ii
2. बाणैश्च ऋद्धिरिन्द्रस्य सम्पत्तेरपि, G. J. ii
3. स्थिरामित्यर्थः, G. J. ii
4. महादेववरदानेन महाकलित्वं, G. J. ii
5. क्रोधात्, G. J. ii
6. अधिकः पाठ, G. J. ii
7. 'यद्वा' इत्यारभ्य 'तथेति' यावदधिकः पाठः, G. J. ii

न तच्चित्रमिति। वरिवसिता = सेवाकर्त्ता। ननु ईदृश्या सेवया ऋद्धिर्जायताम्, बाणस्य महाकलत्वप्राप्तिः कथं जाता? इत्यत आह–**न कस्या** इत्यादि। [1]**शिरसोऽवनतिः** = प्रणामः। तथा च त्वत्प्रणामरूपसेवैव सर्वोन्नतिसम्पादिकेति।

[2]**सूर्यपक्षे**–हे वरद!, **'पद्मद्वयाभयवरान् दधतं कराब्जै'**रिति ध्यानात्। **न तच्चित्रं** = नाद्भुतम्। ननु कथं एतत् न चित्रम्? इत्यत आह–**त्वच्चरणयो**-रित्यादि। ननु सूर्यसेवा कदा बाणेन कृता? इत्यत आह–**तस्मिन्निति,** शिवपूजाङ्गत्वेनापि सूर्यपूजाकर्त्तरीत्यर्थः।

'ईशानाय सूर्यमूर्त्तये नमः' इत्यष्टमूर्त्तिघटकत्वेनापि यत् सूर्यपूजनम्, तस्यैव फलमिदम्। मुख्यतया पूजायां तु यत् फलम्, तद् वक्तुमशक्यमेवेति। अन्यत् सर्वं पूर्ववत्।

विष्णुपक्षे तु–हे! **सुत्राम्णः** = इन्द्रस्य, वरद! बाणो यद् **ऋद्धिं** = स्वीयामेव, **अधः** = स्वस्माद् विच्युताञ्चक्रे। **परमोच्चैरपि** = सर्वोत्कृष्टामपि, **सतीं** = सोमेन महादेवेन रक्षिताम्, न तत् चित्रम्। ननु कथं एतत् न अद्भुतम्? इत्यत आह–**तस्मिन्निति,** विष्णुसेवाविमुखेत्यर्थः। ननु विष्णुसेविनां किमधिकं फलं जातम्? इत्यत आह–**त्वच्चरणयोरित्यादि। त्वयि वरिवसितरि** = त्वदुद्देश्य कामचार इति, प्रह्लादादौ कस्यै उन्नत्यैन भवति? सर्वमन्यत् समानमिति दिक्।।13।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा
विधेयस्यासीद्यस्त्रिनयन! विषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।14।।

ननु एकस्मिन् बाणे तत्रापि दैत्यकृपा चेत्, क उत्कर्षः? इत्यत आह–**अकाण्डब्रह्माण्ड,** [3]इत्यादि। हे त्रिनयन! तव कण्ठे [4]**स कल्माषः** = कालिमा,

1. शिरसा, G. J. ii
2. 'सूर्यपक्षे' इत्यारभ्य 'सर्वमन्यत् समानमिति दिक् पर्यन्तमधिकः पाठः, G. J. i
3. इति, G. J. ii
4. यः कल्माषः, G. J. ii

आसीत् = [1]आविरतभूत्, [2]तरसा **श्रियं** = शेभाम्, न कुरुते? अपि तु कुरुत एव। **अहो** = आश्चर्यम्[3]। ननु कण्ठे कथं कल्माषः? इत्यत आह–**विषं** = कालकूटरूपम्, **संहृतवत इति** = कवलितवत इत्यर्थः। ननु यत् [4]कालकूटदर्शनादेव हेमगौराङ्गस्यापि विष्णोः कृष्णता जाता, तद् विषं कथं कवलितम्? इत्यत आह–**अकाण्डेत्यादि**। **अकाण्डे** = असमये, यो ब्रह्माण्डस्य **क्षयः** = क्षयारम्भः, तेन **चकिताः** = भीताः, [5]ये देवा असुराश्च, तेषु कृपया **विधेयस्य** = वश्यस्य। **यद्वा** तेषु[6] या कृपा, तद्वश्यस्य इत्यर्थः। ननु स्फटिकसदृशे कण्ठे कल्माषरूपविकारः [7]कुतः कारणात् स्वीकृतः? इत्यत आह–**विकार** इत्यादि। तथा च कालकूटविषजनितं यद् भुवनस्य भयम्, तद्भङ्गरूपं यद् **व्यसनं** = क्रीडनम्, तद्वदित्यर्थः।

[8]**सूर्यपक्षे-तव कण्ठे** = कण्ठसमीपे, सप्तमी सामीप्ये। यो राहुः **कल्माषः** = कृष्णवर्ण आसीत्।

'कल्माषः कर्बुरे कृष्णे', इति व्याडिः। व्याघ्रादिर्यथा मनुष्यादीनां कण्ठदेशमेवादौ ग्रसति, तद्वत् राहुरपि कण्ठसमीपे आगतः, न तेजोराशिं सूर्यं स्पर्ष्टुमपि शक्नोतीतिभावः। स राहुः श्रियं न, न कुरुते, अपि तु कुरुत एव। **श्रियं तु पित्रादीनां राहुदर्शनदत्तं हि श्राद्धचन्द्रतारकम्**, इत्यादि स्मृतेरिति। ननु राहुग्रासे विकारः सूर्येण कथं स्वीकृतः? इत्यत आह–**विकार** इत्यादि। भुवनभयभङ्गस्तु पापनाश-पुण्योत्पादद्वारेतिभावः। सूर्यस्य उत्कर्षान्तरमाह–**त्रिनयनेत्यादि**। त्रयाणां लोकानां नयनानां विषमिव **विषं** = अन्धकाररूपम्, संहृतवत इत्यर्थः। ननु सूर्येण अन्धकारः कथं संहारः क्रियते? इत्यत आह–**अकाण्डेत्यादि**। अन्धकारे सति हिंस्राणां प्रादुर्भावादकाण्डब्रह्माण्डक्षयप्रसङ्गात्

1. आविर्बभूव, G. J. ii
2. अधिकः पाठः, G. J. i
3. आश्चर्ये, G. J. i
4. कालकूटदर्शनाद्धेम0, G. J. i
5. ये, इत्यधिकः पाठः, G. J. ii
6. तेषु कृपाविधेया यस्य, तथा च कृपावश्या इत्यर्थः, G. J. i
7. कः स्वीकृतः? इत्यत आह–, G. J. ii
8. 'सूर्यपक्षे इत्यारभ्य इति दिक्' पर्यन्तमधिकः पाठः, G. J. i

चकिताः ये देवा असुराश्च, तेषु या कृपा तद्विधेयस्य इत्यर्थः, अन्यच्च तुल्यमिति दिक्।

विष्णुपक्षे तु—तव कण्ठसमीपे, वक्षसीति यावत्। **कल्माषः** = चित्ररूपम्। 'चित्रं किर्मिरकल्माष-सवलैताश्च कर्वुरे' **इत्यमरः**।

तथा च भृगोश्चरणाभिघातेन शोणिमा, धूलीधूसरत्वञ्च स्वाभाविकं श्यामत्वम्। अतो वक्षसि चित्ररूपम्, तस्यैव श्रीवत्ससंज्ञा। सकल्माषस्तव श्रियं न, न कुरुते? अपि तु कुरुत एव। ननु ईश्वरेण चरणाभिघातजनितविकारः कथं सह्यते? इत्यत आह—**विकार** इत्यादि। भृगोः क्रोधवशाद् विष्णुना एव पालितस्य भुवनस्य यद् भयम्, तद्भङ्गव्यसनिन इत्यर्थः। ननु तथापि तत्रस्थानां लक्ष्मी-ब्रह्म-गरुडानां कथं सहिष्णुता जाता? इत्यत आह—**त्रिनयन** इत्यादि। **त्रयाणां** = लक्ष्मी-ब्रह्म-गरुडानां नयनानाम्, **विषं** = जलम्, संहृतवत इत्यर्थः। 'पुंभावे तत्क्रियायाञ्च पौरुषं विषमप्सु **चेत्यमरः**। तथा च तेषां अश्रुनिवारेणन दुःखापनोदनं कृतमितिभावः। ननु तेषां अश्रुनिवारणेन दुःखापनोदनं कथम्? भृगोरेव शान्तिः कथं न कृतेत्यत आह—**अकाण्ड** इत्यादि।

'काण्डो बाणः काण्डोऽस्त्री दर्शबाणार्च्चवर्गावसरवारिषु' **इत्यमरः**।

रुद्रणैव पाशुपतबाणेन जगतसंह्रीयते। तथा च अकाण्डाद् बाणभि(द)त्वाद् भृगुक्रोधाद् ब्रह्माण्डक्षयप्रसङ्गः, तेन चकिताः ये ये देवाः, तेषु कृपया **विधेया** = सम्पादनीया यस्येत्यर्थः। इतिदिक्।।14।।

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश! त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः॥15॥

ननु जगतसंहारकस्य रुद्रस्य विषपानं किमद्भुतम्? इत्युत्कर्षान्तरमाह—**असिद्धार्था** [1]**नैवे**त्यादि। हे ईश! **स स्मरः** = स कन्दर्पः, [2]**इतरसुरसाधारणम्**,

1. नैव इति, G. J. ii
2. इतरसुरसाधारणता, G. J. i; इतरसुरसाधारणतया, G. J. ii

इतरे = त्वद्भिन्नाः, ये **सुराः** = इन्द्रादयः, तत्साधारणं त्वां पश्यन् स्मरः स्मर्तव्यात्माऽभूदित्यर्थः। स्मर्त्तव्यात्मा शरीरं यस्य, स तथा।

'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' **इत्यमरः**। ननु देवदेवः महादेवः, स कथं साधारणत्वेन जानाति? इत्यत आह–**असिद्धार्था,** इत्यादि। [1]यस्य विशिखा **असिद्धार्थाः** = अकृतप्रयोजनाः, न निवर्त्तन्ते। त्रयाणां जगतां लाभाय, **क्वचिदपीति**। ननु दुर्बले क्वचिदपि असिद्धार्थतया अनिवृत्या क उत्कर्षः? इत्यत आह–**सदेवे**त्यादि। तत्रापि नरापेक्षया उत्कर्षार्थं **असुर** इति, ततोऽप्युत्कर्षार्थं **देवेति**। ननु विशिखानां लक्ष्यलाभेऽपि पश्चात् पराजये क उत्कर्षः? इत्यत आह–**जयिन** इति। [2]तत्रापि यदा कदाचित् जयेऽपि क उत्कर्षः? इत्यत आह–**नित्य**मिति। ननु नित्यं जयशीलोऽपि कन्दर्पः कथं शङ्करेण पराजितः? इत्यत आह–**न** [3]हीत्यादि। **वशिषु** = वशीकृतेन्द्रियेषु, **परिभवो** = [4]बाणप्रयोगादिरूपो, **न हि पथ्यः** = [5]नैव हितः, इत्यर्थः। [6]**यद्वा** ननु कुसुमास्त्रप्रयोगरूपापराधेन कन्दर्पः कथं भस्मीकृतः? इत्यत आह–**न हीत्यादि**। वशिषु **परिभवो** = वाक्ताडनादिरूपः, न पथ्य इत्यर्थः।।15।।

[7]**सूर्यपक्षे तु**–हे ईश! **आत्मा** = शाखः, **अः** = विष्णुः, आत्मा यस्य। **'आत्मा वै जायते पुत्र'** इति श्रुतेः। तथा च शाखः त्वां **इतरसुर इव साधारणं** = अविलक्षणम्, पश्यन्। **यद्वा इतरा** = नीचाः, सुराः यस्मात्, स। तथा **साधारणं** = सर्वभूतस्थम्, स रोगविरूपोऽपि **स्मरः** = स्मररूपः, अभूत्। **हे स्मर्त्तव्य!** इति सम्बोधनम्। तथा च जितेन्द्रियस्त्वां **साधारणं** = सर्वभूतस्थम्,

1. यस्य विशिखा, इत्यधिकः पाठः, G. J. ii
2. तथापि, G. J. i
3. हीति, G. J. ii
4. अस्त्रप्रयोगरूपः, G. J. ii
5. अधिकः पाठः, G. J. ii
6. 'यद्वा' इत्यारभ्य 'न पथ्य इत्यर्थः' यावदधिकः पाठः, G. J. ii
7. 'सूर्यपक्षे तु' इत्यारभ्य 'विष्णुपक्षेऽपि बोध्यः' पर्यन्तमधिकः पाठः, G. J. i

त्वां पश्यन् इत्यर्थः। तथा च **भगवद्गीता**–

सर्वभूतस्थितं यो मां भजत्येकत्वमाश्रितः।
सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते॥ इति॥

सर्वभूतस्थं **पश्यन्** = अवलोकयन्। **यद्वा स्मर्त्तव्यात्मा**, स्मर्त्तव्यः = चिन्तनीयः, **आत्मा** = आत्ममात्रपरोऽभूत् इति फलितार्थः। एवं क्रमेण मोक्षो भवतीतिभावः। ननु आत्मचिन्तापरान् कामः कथं नातितरति? इत्यत आह–**न हीत्यादि**। **वशिषु** = जितेन्द्रियेषु, **परिभवः** = कामाभिभवरूपः, नैव पथ्य इति। ननु कः तावत् स्मरः उच्यते? इत्यत आह–**असिद्धार्था** इत्यादि। **अर्थो** = मोक्षादिरूपः, **देवासुरनरे** जगति नित्यम्, असिद्धार्था एव। किन्तु जातप्रयोजना अवश्यमित्यर्थः। ननु शाखस्य कथं रोगविकारः? इत्यत आह–**न हीत्यादि**। वशिष्ठ-नारदादिषु **परिभवो** = असन्मानपथ्यः, न हितः, नारदक्रोधवशात् तस्य रोगो जात इति **भारतादौ** दर्शनात्। ननु एवं चेत्, योगिनामपि कथं न कामाभिभवः? इत्यत आह–**क्वचिन्निवर्त्तन्त** इत्यर्थः। अयमर्थस्तु विष्णुपक्षेऽपि बोध्यः।।15।।

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्नग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥16॥

[1]सायङ्काले कोऽपि राक्षसो जगतक्षयार्थमुद्यतः। [2]तन्निराकरणन्तु नृत्यव्याजेन [3]महादेवः कृतवानिति **पौराणिकी कथा**। तत्र च देवान्तराद् वैलक्षण्यं ख्यापयन् आह = **मही पादाघातादित्यादि**। जगद्रक्षायै त्वं **नटसि** = नृत्यं करोषि।

[4]ननु देवैरन्यैर्यत्नत एवासुराः संह्रियन्ते। रुद्रेण नृत्यव्याजात् कथं एवं

---

1. सायं समये, G. J. ii
2. तन्निराकरणञ्च, G. J. i
3. शिवेन क्रियत इति पौराणिकी कथेति, G. J. ii
4. ननु विष्णुना युद्ध एवासुराः संहृताः। रुद्रेण नृत्यव्याजेन राक्षसो मारणं कथं क्रियते?, G. J. i

क्रियते? इत्यत आह–**ननु** इत्यादि। ननु भोः तव **विभुता** = प्रभुता, **वामैव** = विपरीता एव, विलक्षणैव इतियावत्। [1]ननु चरणविन्यासं विना कथं नृत्यम्? इत्यत आह–**महीत्यादि**। **पादाघातात्** = पादविक्षेपात्, **सहसा** = शीघ्रम्, **संशयपदं** = अस्ति, नास्ति, वेति संशयस्य [2]चिह्नम्, [3]मूर्च्छादिरूपम्, मही व्रजति इत्यन्वयः।

'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' **इत्यमरः**। तच्च विषयतयेतिभावः। [4]नृत्यस्य धर्मान्तरं दर्शयति-**पदमि**त्यादि। **विष्णोः पदं** = आकाशम्। भ्राम्यद्भुजपरिघरुग्णग्रहगणम्, **भ्राम्यन्तो** = [5]भ्रमिति, क्रियावन्तो, ये भुजाः, **तेषां परिघेन** = परिघातेन। **यद्वा** भुजा एव **परिघाः** = अस्त्रभेदाः [6]तैरेव **रुग्णाः** = पीडिताः, **ग्रहगणाः** = सूर्यादयो यत्र, तत्तथा।

'परिघः परिघातेऽस्त्रेऽप्योघे वृन्देऽम्भसां रये **इत्यमरः**[7]।

नृत्यस्य धर्म्यान्तरमप्याह–**मुहुरित्यादि**, **मुहु**रिति, सर्वत्रैवान्वितम्। **द्यौः** = स्वर्गः, **मुहुः** = बारम्बारम्, **दौस्थ्यं** = दुरवस्थितम्, कष्टेनावस्थानमितियावत्। **याति** = प्राप्नोति। कथं दौस्थ्यं याति? [8]इत्यत आह–**अनिभृते**त्यादि। अनिभृताभिः = [9]असंवृताभिः, जटाभिः **ताडितं** = पीडितम्, **तटं** = पार्श्वदेशो यस्याः, सा तथेति।।

[10]**सूर्यपक्षे तु**–दुःसहतेजसं सूर्यं पुरान्नष्टा भ्रमिमन्त्रेण शातयामास। तत्र स्तौति–जगद्रक्षायै दुःसहरश्मिभिः अतिपीडितस्य जगतो रक्षायै त्वं **नटसि** =

---

1. ननु चरणनिक्षेपादेव नृत्यत्वात्। तदत्र कथम्? इत्यत आह–महीत्यादि, G. J. i
2. स्थानम्, G. J. ii
3. 'मूर्च्छादिरूपम्' इत्यारभ्य 'इत्यन्वयः' पर्यन्तमधिकः पाठः, G. J. i
4. नृत्यधर्मान्तरमाह–पदमित्यादि, G. J. ii
5. भ्रमिति, क्रियावन्तो, इत्यधिकः पाठः, G. J. i
6. तैः उद्विग्नाः, पीडिताः, G. J. ii
7. अधिकः पाठः, G. J. ii
8. इत्यत्राह, G. J. ii
9. असंयुजभिः, G. J. i
10. 'सूर्यपक्षे तु' इत्यारभ्य 'अन्यत्तुल्यमिति दिक्' पर्यन्तमधिकः पाठः, G. J. i

नट इव आचरसि, यन्त्रभ्रमिवशादितिभावः। ननु दुःखसहिष्णुता कथं तेन क्रियते? इत्यत आह–**ननु** इत्यादि। **वामैव** = मनोज्ञैव, स्वदुःखमत्यापि जगतां दुःखं हरतीति मनोज्ञत्वम्।

'वामौ वल्गुप्रतीपावि'**त्यमरः**। ननु कस्माद् भयाद् जगद्रक्षा क्रियते? इत्यत आह–**मही**त्यादि। **पादाघातात्**, 'पादा रश्म्यस्तुर्य्यांशा, **इत्यमरः**'। **भ्राम्यद्भुजपरिघरुग्णग्रहगणम्**, मेरुभ्रमणवशाद् भ्राम्यन्तो ये भुजाः, **भुज्यन्ते** = पृथिव्याः रसाः गृह्यन्ते, एभिरिति **भुजाः** = रश्मयः, तेषां परिघातेन, तैः परिघैर्वा **रुग्णः** = पीडितः, चन्द्रादिग्रहणो येन, तत्तथेति। **द्यौः** = स्वर्गः, **दौस्थ्यं** = अतिकष्टेनावस्थानम्, याति। **मुहु**रिति, **व्रजती**त्यादि सर्वत्रैवान्वितम्। कथं दौस्थ्यं याति? इत्यत्राह–**अनिभृते**त्यादि। रश्मीनामाघातात् **अनिभृताः**, न विद्यन्ते **निभृता** = निःशेषेण **धृता** = [1]सरसा, मुकुटाम्रवृक्षमूलेषु, तथा च **अनिभृता** = नीरसा, जटादिरित्यर्थः, यस्यां इति सा, तथा। दौस्थ्यहेत्वन्तरमाह– **ताडिततटे**ति। रश्मीनां आघातात् **ताडितं** = मुद्रार्पितम्, तटं यस्याः, सा तथेति।

विष्णुपक्षे तु–वामनरूपं विष्णुं स्तुवन्नाह–**मही**त्यादि। बलिप्रभृतिभ्यो असुरेभ्यो जगति रक्षायै त्वं नटसि, याचकरूपेण नटसि। ननु जगद्रक्षार्थं याचकता कथं स्वीकृता? इत्यत आह–**वामैव विभुता** इति। **वामा** = देवान्तरेभ्यो विपरीताया एव महत्त्वं विवृणोति–**पादाघातादि**त्यादि। पादस्य, पृथिव्यादिव्यापकत्वेन तदाघातात् संशयो भवत्येवेतिभावः। तदानीमेव युद्धार्थमुद्यताः ये ये असुराः,तेषां नाशाय भ्राम्यन्तो ये भुजाः, तेषां परिघातेन **रुग्णाः** = पीडिताः, ग्रहगणाः यत्र, तत्तथा। असुरेषु क्रोधवशात् **अनिभृता** = असंवृता, या जटाः, ताभिः ताडितं तटं यस्याः, सा तथा। ब्रह्मचारिवेशस्य तस्य जटाधारणं अस्त्येवेति, तस्य तदानीं अन्तरीक्षादिव्यापकं वपुर्व्यक्तं **हरिवंशे**–

'तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे।
नभः प्रक्रममाणस्य जानुमूले महात्मनः।।
परं प्रक्रममाणस्य पादमूले व्यवस्थितौ।।' इति।

अन्यत्तुल्यमिति दिक्।16।।

---

1. रसया? इतिपाठः, G. J. i

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम! दिव्यं तव वपुः॥17॥

ननु महादेवस्य वपुष ईदृङ्महत्त्वे किं प्रमाणम्? इत्यत आह–[1]**वियदि**ति। तव वपुः अनेनैव [2]अगस्त्यमुनिना परिपीतसमुद्रस्य [3]भवज्जटैकदेशान्तर्विलीन-गङ्गाम्भोभिः पूरणेनैव **उन्नेयं** = अनुमेयम्। जटाया महत्त्वेन[4] वपुर्माहात्म्यं कथितम्, इत्यत आह–**घृतमहि**मेति। वपुषो विशेषणं महिमा, [5]महत्परिणम्। ननु तत्किं वपुर्विरूपम्? इत्यत आह–**दिव्य**मिति, [6]उत्कृष्टरूपमित्यर्थः। **ते** = तव, शिरसि **वारां** = जलानाम्, यः [7]प्रवाहो [8]**पृषतलघु**र्यथास्यात्, पृष्ठतोऽम्बुकणाः तद्वदल्पं यस्याः, तेन प्रवाहेन जगज्जलधिवलयं समुद्रेण कृतवेष्टनम्, इतिहेतोः द्वीपाकारम्। ननु तेन प्रवाहेण जगत् कथं न प्लावितम्? इत्यत आह–**द्वीपे**ति। द्वीपस्य उच्चत्वादितिभावः। [9]जलवेष्टितप्रदेशस्यैव द्वीपत्वादाह–**आकारे**ति, द्वीपसदृशमित्यर्थः। ननु प्रवाहस्य अल्पत्वेन अतिविस्तृतसमुद्रखातपूरणं कथं जातम्? इत्यत आह–**वियद्व्यापी**ति। ननु कियद् देशावच्छिन्नं वियत्तेन प्रवाहेण व्याप्तम्? इत्यत आह–**तारागणेत्या**दि। तारागणेन **गुणिता** = वर्द्धिता, फेनोद्गमरुचिर्यस्य, स तथा। तथा च [10]तारागणत्वावच्छिन्नवियद्व्यापीति फलितार्थः।

---

1. वियद्व्यापीत्यादि, G. J. ii
2. अगस्त्यमुनिपरिपीत0, G. J. ii
3. तव जटैक0, G. J. ii
4. महत्त्वं विना वपुर्महत्त्वं बाधितम्, इत्यत आह-**धृतमहि**मेति, G. J. ii
5. सहजपरिमाणम्, G. J. i
6. उत्कृष्टमित्यर्थः, G. J. i
7. प्रवाहो दृष्टस्तेन प्रवाहेण, G. J. i
8. 'पृषतलघुः' इत्यारभ्य 'तद्वदल्पं यस्याः'पर्यन्तमधिकः पाठः, G. J. ii
9. जलोज्झित0, G. J. ii
10. तारागणावच्छिन्नः, G. J. ii

सूर्यपक्षे तु—वियद्व्यापी यो गङ्गाप्रवाहः, **तव वारां** = त्वज्जनितवर्षजलानाम्। 'आदित्याज्जायते वृष्टिरिति' **श्रुतेः**। **शिरसि** = अग्रदेशे, **पृषतलघुदृष्टः**, अम्बुकणाकल्पस्वयं यथा स्यात्तथा दृष्टः। तेन त्वदाविर्भूतवर्षजलक्रोधीकृतगङ्गाप्रवाहेण, अनेन अगस्त्यपीतपयोधिमहाखातपूरत्वेन **तव वपुर्धृतमहिम**, धृतो **महिमा** = माहात्म्यम्, येन। समुद्रस्थानां जन्तूनां उपकारो, माहात्म्यम्। तथा च तव वपुः परोपकारार्थमितिभावः। अन्यच्च तुल्यमिति।।17।।

विष्णुपक्षे तु—वामनप्रादुर्भावे यो वारां प्रवाहस्तव **शिरसि** = शिरःसमीपे, पृषतलघु यथा स्यात्तथा दृष्टः। वामनशरीरस्य ब्रह्माण्डकटाहव्यापकत्वान्महानपि गङ्गाप्रवाहस्तच्छिरःसमीपे स्वल्प एव दृश्यत इति भावः। अन्यच्च पूर्ववदिति दिक्।।17।।

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरत्रिणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्रा प्रभुधियः।।18।।

ननु वपुषो महत्त्वे विष्णुपादोद्भवगङ्गायाः शिरसि धारणे वा क उत्कर्षः? इत्यत आह–[1]**रथः क्षोणी यन्ता शते**त्यादि। त्रिपुरतृणं **दिधक्षोः** = दग्धुमिच्छतः तव कोऽयं **आडम्बरविधिः** = परिपाटीविधानम्? त्रिपुरस्य लघुत्वख्यापनाय **तृणेति**। तथा च नखच्छेद्ये कुठार-प्रयोगः किमर्थं क्रियत इतिभावः। आडम्बर-विधिमाह–**रथ** इत्यादि। **क्षोणी** = पृथिवी रथः। [2]पृथिवीरथोचितसारथिमाह–**शतधृतिरि**ति, ब्रह्मा सारथिरित्यर्थः। **अगेन्द्रः** = हिमालयो, धनुः। चन्द्रार्कौ रथाङ्गे चक्रद्वयम्। **रथचरणपाणिः** = [3]चक्रपाणिः, **शरो** = बाण, इत्येवम्। ननु स्वयमेव त्रिपुरवधे समर्थश्चेत्, क्षित्यादिसाहाय्यालम्बनं किमिति स्वीकृतम्?

---

1. रथ इत्यादि, G. J. ii
2. पृथिवी, इत्यधिकः पाठः, G. J. ii
3. अधिकः पाठः, G. J. ii

इत्यत आह–**विधेयैरि**त्यादि। **विधेयैः** = आज्ञाकारिभिः करणभूतैः **क्रीडन्त्यः** = [1]क्रीडां कुर्वन्त्यः, प्रभुधियो न **परतन्त्राः** = पराधीनाः। तथा च खेलया एवं कृतम्, न तु साहाय्यालम्बनार्थमितिभावः। **यद्वा** एवंरूपाः प्रभुधियो न परतन्त्राः, अपि तु स्वतन्त्राः, क्रीडारूपपरतन्त्रा [2]एवेतिभावः।

सूर्यपक्षे तु–त्रिपुरतृणं दिधक्षोर्महादेवात् **ते** = तव, इत्याडम्बरविधिः कोऽयम्? इत्यनुचित एवेतिभावः। ननु महादेवादिद्वारा त्रिपुरवधः कथं कृतः? प्रभुना सूर्येण स्वयं कथं न कृतः? इत्यत आह–**प्रभुधिय** इत्यादि। सर्वमन्यत् समानमिति।

विष्णुपक्षे तु–रथचरणपाणिः = चक्रपाणिः, शर इव कृत्वा **त्रिपुरतृणं** = तृणसदृशं त्रिपुरम्, दिधक्षोर्महादेवात् **ते** = तव, आडम्बरविधिः कोऽयम्? यदि च चक्रपाणिः शरो न स्यात्, तदा कुतोऽस्य त्रिपुरदाहसम्भावनापीतिभावः। अन्यच्च तुल्यमिति दिक्॥18॥

हरिस्ते साहस्त्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर! जागर्ति जगताम्॥19॥

ननु त्रिपुरवधेन हरस्य शौर्याधिक्यमायातम्, तेन च हरस्य क उत्कर्षः? इत्यत आह–**हरिस्ते** [3]**साहस्त्रमि**त्यादि। दक्षयज्ञभङ्गे भृङ्गिना विष्णोश्चक्रं गिलितमासीत्। ततश्च विष्णुना तत्तुष्टये प्रत्यहं सहस्रपद्मकरणकपूजाव्रतमारब्धम्। तत्र तत् परिरक्षार्थं हरेण एकदा कमलमेकं गोपितम्। ततो विष्णुना सहस्रमूर्त्तये निजनेत्रकमलमारोपितमिति तु[4] बहुलार्थः। **हरिः** = विष्णुः! हे त्रिपुरहर! **ते** = तव, [5]**पदयोः** = (चरणयुगलयोः) **साहस्त्रं** = सहस्रसंख्यावच्छिन्नम्, **कमलबलिं**

---

1. अधिकः पाठः, G. J. ii
2. इतिभावः, G. J. i
3. साहस्रमिति, G. J. ii
4. अधिकः पाठः, G. J. i
5. पादयोः, G. J. ii

= कमलरूप-पूजोपहारम्, **आधाय** = अर्पयित्वा, तस्मिन् सहस्रे एकोने सति निजं नेत्रकमलं सहस्रमूर्त्तये **उदहरत्** = उज्जहार। असौ **भक्त्युद्रेकः** = अतिशयिता भक्तिः, **चक्रवपुषा** = चक्ररूपेण, **परिणतिं** = परिणामम्, गतः सन् त्रयाणां जगतां रक्षायै अर्थात्[1] असुरेभ्यः रक्षाहेतवे, **जागर्ति** = जाग्रद्दशा-कार्यकारी भवति।

सूर्यपक्षे तु—ते = तव, **पदयोः** = स्थानयोः, ईशानसूर्यस्वरूपयोः, **हरिः** = विष्णुः, साहस्र्यकमलबलिमाधाय, तस्मिन् सहस्रे एकोने सति **यत्** = यस्मात्, निजं नेत्रकमलं उदहरत्। यस्माद् भक्त्युद्रेकः चक्ररूपेण परिणतिं गतः सन् असौ त्रिपुरासुरारिः त्रयाणां जगतां रक्षायै जागर्ति। अत एव त्रिपुरहरेति सम्बोधनम्, त्रिपुरवधे विशिष्टस्यैव कारणत्वात्। तथा च सूर्यस्य शिवात्मकत्वात् तयोराराधनेनैव प्रीतः सूर्यः त्रिपुरवधार्थं रथचक्रत्वं स्वीकृतमितिभावः। **यद्वा चक्रवपुषा** इति, सुदर्शनचक्रं सूर्याज्जातम्। तथा च एवम्प्रकारेण हरेः भक्त्युद्रेकः। **चक्रवपुषा** = सुदर्शनचक्ररूपेण परिणतिङ्गतः। प्रलयकाले **त्रीणि** = स्वर्गादीनि पुराणि हरतीति, **त्रिपुरहरः** = सूर्यः। अन्यच्च पूर्ववदिति।

विष्णुपक्षे तु—हरिः = इन्द्रः, **ते** = तव, पदयोः **साहस्रं** = निजनेत्रकमलम्, **आधाय** = समारोप्य, हे एक! अद्वितीये तस्मिन् नेत्रसहस्रे **ऊने सति** = सहस्राधिकसंख्यातोऽल्पे सति, **कमलबलिम्,** कमलैः सहस्राधिकैः **बलिं** = उपहारम्, **उदाहरत्** = उपाहरत्। **यत्** = यस्मात्, अतःकारणात् इन्द्रस्य भक्त्युद्रेकः। **चक्रवपुषा** = समूहवपुषा, नृसिंह-वामन-कृष्णादिशरीरेण परिणतिं गतः सन् हिरणाख्याद्यसुरेभ्यो जगत्त्रयरक्षायै जागर्तीति **निर्गलितार्थ** इति।।19।।

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा कृतपरिकरः कर्मसु जनः॥20॥

---

1. अधिकः पाठः, G. J. ii

ननु अपूर्वे [1]मानाभावात् स्तुत्यादेश्चाशुचिनाशित्वात् स्तुतिरियं किमर्थम्? इत्यत आह–[2]**क्रतौ सुप्ते जाग्रत्त्वमसी**त्यादि। **क्रतौ** = यागे, **सुप्ते** = प्रध्वस्ते सति, क्रतावित्युपलक्षणम्। यागादिकर्म्मणां तृतीयक्षण एव नाशात् **क्रतुमतां** = [3]यजमानानाम्, **फलयोगे** = [4]स्वर्गादिफल-सम्बन्धे, त्वं **जाग्रदसि** = फलदोऽसि। ननु त्वमेव फलदश्चेत्, यैः कर्म्म न कृतम्, तेभ्योऽपि फलं कथं न ददासि? इत्यत आह–**क्व कर्म्म** इत्यादि। **पुरुषाराधनं** = ईश्वरसेवादिकम्, ऋते = विना, **क्व कर्म्म फलति?** = फलभाग्भवति। तथा च आराधने विनष्टेऽपि, अनेन अस्मदाराधनं कृतमिति जानन् ईश्वर एव यथाकाले फलं ददातीतिभावः। ननु ध्वंसादिद्वारा कर्म्मैव कारणमस्ति, इत्यत आह–**प्रध्वस्तमि**ति, ध्वंस-प्रतियोगीत्यर्थः। तथा च कारणीभूताभावप्रतियोगितया कर्म्मणः प्रतिबन्धकत्वमेव सिद्धम्, न तु कारणत्वमितिभावः। **यद्वा** हे पुरुष! आराधनं विना अर्थात् ईश्वराराधनं विना क्व कर्म्म फलति? तथा च यस्मिन् कर्म्मणि ईश्वराराधनं नास्ति, तत्कर्म्म एव निष्फलमितिभावः। **अथवा** सुप्ते क्रतौ **फलयोगे, फलस्य** = स्वर्गादेर्योगे = सम्बन्धे, अपूर्वरूपे, त्वं **जाग्रत** = साक्षी असि। ननु ईश्वरस्य अपूर्वसाक्षित्वे किं मानम्? इत्यत आह–**क्व कर्म्मे**त्यादि। आराध्यते अनेन इति **आराधनं** = अपूर्वम्। तथो च अपूर्वं विना प्रध्वस्तं कर्म्म क्व फलति? अत एव 'चिरध्वस्तं फलायानं न कर्म्मातिशयं विना' **इत्याचार्याः**। [5]एवञ्च फलबलेन अपूर्वे सिद्धे सुतरां ईश्वरस्य साक्षित्वमितिभावः। **यद्वा अक्रतुमतां** = [6]अप्रशस्तक्रतुमताम् दक्षादीनाम्, **सुप्ते क्रतौ** = फलाभिमुखे क्रतौ त्वं **अजाग्रदसि** = न फलदोऽसि। तथा च त्वयि अजाग्रति, कुतः

---

1. नाशाभावात्, G. J. ii
2. क्रतौ सुप्तेत्यादि, G. J. ii
3. यजमानाम्, G. J. ii
4. स्वर्गादि, इत्यधिकः पाठः, G. J. ii
5. एवंक्रमेण अपूर्वे सिद्धे, G. J. ii
6. अधिकः पाठः, G. J. ii

क्रतोर्जाग्रदवस्थेतिभावः। **पुरुषाराधनमृते** = तव आराधनं विना, **प्रध्वस्तं** = प्रमथगणेन भग्नम्, कर्म्म दक्षक्रतुरूपम्, क्व फलति? अपितु नैवेतिभावः। **अथवा क्रतौ सुप्ते** = कीर्त्तनादिना प्रतिरुद्धे क्रतुमतां फलयोगे त्वं (सततं) जाग्रदसि। तथा च अविहिताचरणेन त्वं फलं न ददासीतिभावः। **यद्वा अक्रतुमतां** = अप्रशस्तक्रतुमताम्, **फलयोगे** = असत्फलयोगे त्वं जाग्रदसीति। तथा च दक्षादीनां असत्फले, [1]शिरःच्छेदादिरूपे त्वमेव कारणमितिभावः। ननु एवञ्चेत्, पुरुषाराधनमेवास्ताम्, किं क्रतुना? इत्यत आह–**अत** इत्यादि। अतः चिरध्वस्तादपि कर्म्मणः फलोत्पादात् **कर्म्मसु** = यागादिषु, जनो **दृढपरिकरः** = स्थिरप्रयत्नः[2]। ननु यागात् स्वर्ग इति [3]जनैः कथं ज्ञातम्? इत्यत आह–**श्रुतावित्यादि**। **श्रुतौ** = वेदे, श्रद्धा विधेया इत्यर्थः। शास्त्रे तथेति प्रत्ययः **श्रद्धा**। तथा च **यागः** स्वर्गकारणमिति वेदादेव ज्ञातमितिभावः। ननु यागाभावकालेऽपि स्वर्गादिफलोत्पादे व्यभिचारे जागरूके वेदेन स्वर्गादिकारणत्वं यागस्य कथं बोध्यते? इत्यत आह–**त्वामित्यादि**। **क्रतुषु** = यागेषु, त्वां फलदानप्रतिभुवं लग्नकं संप्रेक्ष्य इत्यर्थः। तथा च ईश्वरादेव फलं क्रतुरपूर्वद्वारा सहकारीति न व्यभिचार इतिभावः।।20।। [4]पक्षत्रयेऽपि तुल्यमिति दिक्।।20।।

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद! सदस्याः सुरगणाः।
क्रतुभ्रंषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्त्तुः श्रद्धाविधुरमभिचाराय हि मखाः।।21।।

ननु पुरुषाराधनेऽसति साङ्गाद् वैदिक-कर्म्मणः फलाजनकत्वं कुत्र दृष्टम्? इत्यत आह–[5]**क्रियादक्ष** इत्यादि। हे शरणद! **दक्षः क्रतुपतिः** = यजमानः।

1. शिरसःच्छेदादि0, G. J. i
2. स्थिरयत्नः, G. J. i
3. कथं जनैः, G. J. ii
4. अधिकः पाठः, G. J. i
5. क्रियादक्षो दक्ष इत्यादि, G. J. i

ननु [1]स्वक्रियायामसमर्थस्य दक्षस्य अङ्गवैगुण्यादेव फलं न जातम्। इत्यत आह– **क्रियादक्ष** इति, क्रियासक्षम इत्यर्थः। ननु–

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामस उच्यते[2]॥

इत्यादि **भगवद्गीता**दौ श्रवणात् [3]स्वपौरुषाज्ञानेन मोहादेव-[4]प्रवर्त्तस्य कर्म्मणः तामसत्वात् कथं सत्फलोदयः स्यात्? इत्यत आह–**तनुभृता**मित्यादि, **तनुभृताम्,** प्रजानामधीश इत्यर्थः। तथा च प्रजापतेः अपौरुषं कुत इतिभावः। ननु तथापि ऋत्विजामयोग्यत्वादेव न फलोदयः, इत्यत आह–**ऋषीणा**मित्यादि। **मरीचि**प्रभृतीनां[5] सप्तर्षीणां आर्त्विज्यात्[6] कुतोऽयोग्यतेतिभावः[7]। ननु तथापि[8] सदस्यानामनैपुण्यादेव[9] क्रतुत्वं[10] न फलोदयः[11], इत्यत आह–**सदस्या,** इत्यादि। **सुरगणाः** = विष्णुप्रभृतयः, [12]साङ्गेऽपि क्रतौ, त्वत्तः क्रतुध्वंसः[13]? ननु जगत-संहारकारकात्[14] हरात् क्रतुभ्रंशे किं विचित्रम्? इत्यत आह–**क्रतुफले**त्यादि। [15]**त्वत्त** इत्यत्र विशेषणम्। ननु एवं [16]सकलकारणकलापसत्त्वेऽपि कथं क्रतुभ्रंशः?

1. स्व0, इत्यधिकः पाठः, G. J. i
2. भगवद्गीता, 18/25
3. स्व-अपौरुषाज्ञानेन, G. J. ii
4. प्रकृतस्य, G. J. i
5. अधिकः पाठः, G. J. ii
6. अधिकः पाठः, G. J. ii
7. क्वायोग्यत्वमितिभावः, G. J. i
8. अधिकः पाठः, G. J. ii
9. 0मयोग्यत्वादेव, G. J. i
10. अधिकः पाठः, G. J. i
11. अधिकः पाठः, G. J. ii
12. साङ्गमपि, G. J. i
13. 0भ्रंशः, G. J. i
14. 0संहारकात्, G. J. i
15. क्रतु इत्यत्र, G. J. ii
16. सकल- इत्यधिकः पाठः, G. J. ii

इत्यत आह–**कर्त्तुरि**त्यादि। **मखाः** = यागाः, ध्रुवं **कर्त्तुः** = मखकर्त्तुः, अभिचारायैव भवन्ति। **श्रद्धाविधुरं** = ईश्वरे श्रद्धाशून्यम्, यथा स्यात्तदित्यर्थः।

[1]**सूर्यपक्षे तु**–क्रतुफलविधानव्यसनिनः महादेवात् क्रतुभ्रंशः कथम्? तथाह–**श्रद्धे**त्यादि। शिवादौ देवे श्रद्धाशून्यं यथास्यात्, तथैवमित्यर्थः। ननु देवान्तरे श्रद्धाशून्यत्वं तस्य कथम्? इत्यत आह–**क्रतु** इति। तथा च त्वमेव सर्वं सर्वकर्म्मसु यथायथं प्रेरयसि न तु स्वेच्छयैव सर्वकर्म्म कुरुत इतिभावः। अन्यत् पूर्ववदिति। विष्णुपक्षेऽप्येवम्।।21।।

प्रजानाथं नाथ! प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः।।22।।

ननु ईश्वरस्य दक्षयज्ञभङ्गे क उत्कर्षः? इत्यत आह–**प्रजानाथ**मित्यादि। ब्राह्मणा पुरा [2]सन्ध्यानाम्नी कन्या रमणार्थं घर्षिता, **इतिकालिकापुराणे** दर्शनात्। [3]हे नाथ! अमुं **ते** = तव, **मृगव्याधरभसः** = मृगे व्याधक्रीडा, अद्यापि न त्यजति। अमुं कम्? इत्यत आह–**प्रजानाथमि**ति, ब्रह्माणमित्यर्थः। ननु मृग-व्याधरभसः प्रजानाथे कथम्? इत्यत आह **ऋष्यस्य वपुषे**त्यादि। **ऋष्यस्य** = मृगस्य, **वपुषा** = शरीरेण, स्वां दुहितरं **गतं** = प्राप्तम्, **रिरमयिषुं** = रमयितुमिच्छन्तम्। ननु धर्म्मप्रवर्त्तकेन ब्रह्मणा कथमेवं कृतम्? इत्यत आह–**अभिकमि**ति, कामुकमित्यर्थः। तथा च कामार्त्तानां क्व धर्म्मानुरोध इतिभावः। ननु दुहितृगमने अतिपातकमिति, तदानीं किं[4] तस्योपस्थितिः न आसीत्? इत्यत आह–**प्रसभमिति**, सहसा एव इत्यर्थः। तथा च तदा उपस्थितिः नासीत् इतिभावः।

---

1. 'सूर्यपक्षे' इत्यारभ्य 'विष्णुपक्षेऽप्येवम्' यावदधिकः पाठः, G. J. i
2. सन्ध्या नामा, G. J. ii
3. हे नाथ! ननु ब्रह्मणा लज्जा कथं न चक्रे? इत्यत आह–**ऋष्यस्य वपुषा** इत्यादि, G. J. i
4. अधिकः पाठः, G. J. i

यद्वा ननु दुहित्रा कथमेवं स्वीकृतम्? इत्यत आह–**प्रसभमि**ति, बलात्कारेण इत्यर्थः। [1]**यद्वा** प्रकृष्टा सभा यत्र, तत् प्रसभम्। तथा च सभामध्ये एवं धाष्ट्र्येण [2]निर्लज्जता सूचिता। ननु दहिता कथं अधर्म्ममयं लज्जा च परित्यक्ता? इत्यत आह–**रोहिद्भूतामि**ति, मृगीभूतामित्यर्थः। तथा च पशूनां क्व[3] लज्जेति? अधर्म्मस्तु [4]तिर्यग्योनौ नास्त्येवेतिभावः। एवञ्च लज्जा-भयेन धर्म्मभयेन[5] च ब्रह्मणापि ऋष्यस्य वपुर्गृहीतमिति। स्थानान्तरं गते सति कदाचित् ईश्वरस्य उपेक्षा भविष्यतीति, देशान्तरे कथं न गतम्? इत्यत आह–**दिवं** = स्वर्गम्, आकाशं वा यातमपीति। ननु व्याधस्य करुणाशून्यत्वात् तत्सादृश्यमीश्वरे बाधितम्, इत्यत आह–**सपत्राकृतमि**ति, बाणेन विद्धमित्यर्थः। तथा च अधर्म्मचारिणि ब्रह्मणि ईश्वरोऽपि करुणाशून्य एवेतिभावः। ननु धनुर्विना कथं बाणप्रयोगः? इत्यत आह–**धनुष्पाणेरि**ति। मृगधर्म्ममाह–**त्रसन्तमि**ति। यद्वा अद्यापि त्रसन्तमित्यर्थः। शिरश्छेदजनितत्रासोऽद्यापि विद्यत एवेतिभावः। इत्थञ्च [6]रोहिणीनक्षत्ररूपेण [7]ब्रह्मा, मृगशिरोनक्षत्ररूपेण (तद्) [8]दुहिता, दिवि तिष्ठति। तत् कन्यागतं आर्द्रानक्षत्ररूपेण शिवः तमनुधावति अद्यापीति प्रसिद्धिरिति।।

[9]**सूर्यपक्षे तु**–हे नाथ! **धनुष्पाणेः** = शिवस्य, मृगव्याधरभसः, अमुं प्रजानाथं न त्यजति? अपितु त्यजत्येव। अमुं कीदृशम्? अद्यापि त्रस्तम्। ननु अधर्मोद्यतं ब्रह्माणं किमर्थं शिवः त्यजति? इत्यत आह–**ते** इति, तुभ्यमिति, तादर्थ्ये चतुर्थी। तथा च त्रिसन्ध्यं सूर्योपसनातत्परस्य ब्रह्मणः सूर्यभक्तिमुपलभ्य तदर्थं त्यजतीतिभावः। अन्यच्च पूर्ववदिति।

---

1. 'यद्वा' इत्यारभ्य 'स्वीकृतम्' यावदधिकः पाठः, G. J. ii
2. निर्लज्जमुचिता, G. J. ii
3. कुतो, G. J. ii
4. तिर्यग् योनेर्नास्त्येवेति०, G. J. ii
5. अधिकः पाठः, G. J. ii
6. रोहिणीरूपेण, G. J. ii
7. ब्रह्मणा, G. J. i
8. दुहिता तिष्ठति, G. J. ii
9. 'सूर्यपक्षे' इत्यारभ्य 'अन्यच्च पूर्ववदेवेति' यावदधिकः पाठः, G. J. i

विष्णुपक्षे तु–ते = तुभ्यम्, त्वदर्थमित्यर्थः। तथा च विष्णोः पुत्रत्वाद् ब्रह्मणस्तदनुरोधेन त्याग उचित एवेति। **यद्वा** सीता, रावणस्य कन्या। तस्यां जातायां मन्दोदर्यास्तत्पितुर्मयदानवस्य स्थाने शुभाशुभज्ञानार्थं प्रश्नः कृतः। तेन **ज्योतिर्विदा** उक्तम्–

'इयं ते कन्या, राक्षसकुलक्षयकरी'। तत् श्रुत्वा रावणेन पात्रे निधाय देशान्तरस्थापितेति **भविष्यपुराणे** श्रवणात्। तत्राह–**प्रजानाथं** = राक्षसप्रजानाथं रावणम्, **नाथ!** = विष्णोः!, **स्वां दुहितरं** = सीताम्, **गतं** = (सुदूरदेशं प्राप्तम्), **ऋष्यस्य** = मायामृगस्य मारीचस्य, **वपुषा** = करणभूतेन। सीतां कीदृशीम्? **रोहिद्भूतां** = मृगीभूताम्, भीतेतिभावः। अन्धं रावणं दिवं यातमपि अद्यापि त्रसन्तं **ते** = तव, मृगव्याधरभसः न त्यजति, अत एव त्रसन्तमित्यपीति। अन्यच्च पूर्ववदेवेति।।22।।

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन! पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनियतदेहार्द्धघटना-
दवैति त्वामद्धा बत वरद! मुग्धा युवतयः।।23।।

देवान्तरादुत्कर्षान्तरमाह–[1]**स्वलावण्या** इत्यादि। हे **पुरमथन!**, **पुरो** = अग्रे, **अह्नाय** = झटित्येव, **पुष्पायुधं** = (कमादेवम्), **प्लुष्टं** = दग्धम्, **दृष्ट्वापि** = (विलोकनेनापि)। ननु क्रोधावेशेन जन आत्मानमपि हन्यादिति कामो दुस्त्यज एव। इत्यत आह–**तृणवदिति**। ननु [2]मनागपि कामे कथं अग्निप्रयोगः [3]कृतः? इत्यत आह–**धृतधनुषमिति**। **देवी** = पार्वती, **देहार्द्धघटनात्** = देव्याः देहे देहार्द्धमिलनात्, यदि **स्त्रैणं** = [4]स्त्रीवशम्, त्वां **अवैति** = जानाति,

1. स्वलावण्याशंसाधृतधनुषेत्यादि, G. J. i
2. निरस्तेऽपि कामे, G. J. ii
3. कृतः, इत्यधिकः पाठः, G. J. i
4. स्त्रीवेशम्, G. J. ii

बत, खेदे। [1]ननु स्त्रैणत्वं विना देहार्द्धघटनं कथं कृतम्? इत्यत आह–**तृणवदि**त्यादि। तथा च तृणतुल्यतया कामस्य दाहात् कुतोऽस्य स्त्रैणत्वमितिभावः। वरद! तदा युतयो **मुग्धाः** = मूढाः, [2]अज्ञातशिवस्वभावा इति यावत्। ननु कामेन हरस्य पुरतः कथं धनुर्धृतम्? इत्यत आह–**स्वलावण्ये**त्यादि,स्वलावण्याशंसया धृतं धनुर्येन। तथा च अतिशयलावण्यमालोक्य एव[3] हरस्य करुणा भविष्यतीति, धनुर्धृतमितिभावः। **यद्वा**[4] मूढतायां हेतुमाह–**स्वलावण्याशंसे**ति। **स्वलावण्यैः** = स्वसौन्दर्यैः, **आशंसा** = प्रशंसा, यस्याः, सा तथा। लावण्येन वशीकृतः शिवो देहार्द्धं घटयामास इति, अज्ञानान्मूढता। ननु इन्द्रियनिग्रहं विना कामःकथं जितः? इत्यत आह–**हे यमनियत!** इति, नियमितेन्द्रिय! इत्यर्थः। **यद्वा**[5] यमनियतं यत् देहार्द्धं तद्घटनादपि। यमनियतो यो देहः, [6]तदर्द्धघटनादिति वा, यदि स्त्रैणं अवैतीत्यर्थः। **पुष्पायुधमपि,** [7]इत्यपिकारेणान्वयः।

[8]**सूर्यपक्षे तु**–हे वरद! **देवी** = सूर्यपत्नी, सन्ध्यानाम्नी, **देहार्द्धघटनात्** = सन्ध्याया अभिलषितमुन्नीय विश्वकर्म्मभ्रमियन्त्रवशादर्द्धं स्वदेहं निष्कास्य देहादर्द्धरक्षणाद् यदि स्त्रैणं अवैति, तदा ईश्वरजाया मुग्धा एव। ननु दयिताभिलषितस्वदेहार्द्धनिष्कासनेनापि कथं न स्त्रैणत्वम्? इत्यत आह–**यमनियते**ति, **यमनियत** = निगृहीतेन्द्रिय इत्यर्थः। यमाश्च **शारदायाम्**–

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः।
दयार्जवं मिताहारः शौचञ्चेति यमा दशेति॥

तथा च जितेन्द्रियस्य कुतः स्त्रैणत्वमिति? त्वां कीदृशम्? **पुष्पायुधं** =

---

1. हे स्त्रैण! त्वां विना, G. J. ii
2. अज्ञा, इतियावत्, G. J. ii
3. अधिकः पाठः, G. J. i
4. अथवा, G. J. ii
5. 'यद्वा' इत्यधिकः पाठः, G. J. i
6. तद्घटनाय इति वा, G. J. i
7. इत्यपिकारेण नान्वयः, G. J. i
8. 'सूर्यपक्षे तु' इत्यारभ्य 'इति दिक' पर्यन्तमधिकः पाठः, G. J. i

कामम्, हरेण तृणवत् परिप्लुष्टम्, दृष्टवापि अधृतधनुषं तम्। तथा च कामबाणार्थं धनुरपि येन धृतम्, स कथं कामुकः? कथं वा स स्त्रैण इतिभावः। पुराणि **मथ्नाति** = रश्मिभिरुत्तापयतीति, **पुरमथनः** = सूर्यः। अन्यत् समानमिति।

विष्णुपक्षे तु—देवी = लक्ष्मी, **देहार्द्धघटनात्** = देहार्द्धयोः एकीकरणात्। **शारदयायां** तद्ध्यानं यथा—

'एकीभूतं वपुरवभुवः पुण्डरीकाक्षलक्ष्म्योरि'ति। हे वरद! यदि त्वां **स्त्रैणं** = स्त्रीलुलुपम्, अवैतीत्यर्थः। अन्यच्च सूर्यपक्षव्याख्यादिशानुमेयमिति दिक्।।23।।

श्मशानेष्ववाक्रीडा स्मरहर! पिशाचाः सहचरा-
श्चिताभस्मालेपः स्त्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद! परमं मङ्गलमसि।।24।।

देवान्तराद् वैलक्षण्यख्यापयन्[1] आह—[2]**श्मशानेष्वि**ति। हे स्मरहर! तव शीलं अमङ्गल्यं भवतु, तथापि त्वं स्मर्तृणां परमं मङ्गलमसि। यत्किञ्चित् शीलं अमङ्गलम्, न सर्वस्यैवेत्यत आह—**अखिलमिति नाम,** प्रसिद्धौ। ननु परमं मङ्गलमसीति कथं ज्ञातम्? इत्यत आह—**वरदे**ति। [3]अमङ्गल्यत्वे कुतो वरलाभ इतिभाव। एवं **अखिलम्**, इत्यस्य विवरणमाह—**श्मशानेष्वि**त्यादि, बहुवचनादतिशयामङ्गल्यं सूचितम्। अमङ्गल्यप्रकरणे **स्मरहरे**ति योग्यपदोपन्यासः। पिशाचाः सहचरा इत्यत्रापि बहुवचनं अमङ्गल्याधिक्यसूचनाय। [4]चिताभस्मैव **आलेपः** = अनुलेपनम्। **स्त्रगपि** = माल्यमपि, **नृकरोटीपरिकरः** = नरकपालास्थिसमूह इति **साम्प्रदायिकाः**। अत्र च श्मशानेष्वित्यादिना निन्दैव आयाति, न पुनः स्तुतिः इत्यवधेयम्। वस्तुतस्तु

---

1. 0ख्यापनाय, G. J. ii
2. श्मशानेष्वाक्रीडा स्मरणहरेत्यादि, G. J. ii
3. अमङ्गल्यात्, G. J. i
4. चिताभस्मैरालेपोऽनुलेपनम्, G. J. i

हे [1]स्मरहर! [2]भवतु तवैव शीलं अमङ्गल्यम्, न विद्यते [3]मङ्गलं यस्मात्, तत्तथा। एवं तव नामापि अखिलमित्युभयत्रैवान्वितम्[4]। हे स्मर्तृणां वरद! तथा त्वं **मङ्गलमसि** = मङ्गलरूपोऽसि। ननु शीलं कथं अमङ्गल्यम्? इत्यत आह– **श्मशानेष्वित्यादि, आक्रीडा,** दर्शनरूपा। तथा च यावत् श्मशानदर्शित्वेन नित्यत्वं सूचितम्। **स्मरहरपिशाचाः**, स्मरहररूपा ये पिशाचाः, पिशाचत्वेन प्रच्छन्नवेशा [5]भैरवा एव सहचरा इतिभावः। **चिताभस्मा** इति, **चितं** = व्याप्तम्, **आभस्म** = भस्मपर्यन्तं येन, एतेन व्यापकत्वं सूचितम्। स चासौ आलेपश्चेति, स तथा **आलेपो** = निर्लेपः। अत एव [6]पुरुषस्तु [7]पुष्करपलाश-वन्निर्लेपः, पद्मपत्रजलवदित्यर्थः, इति सांख्याः। **स्त्रगपि नृकरोटीपरिकरः,** नृणां **करोट्यो** = अस्थीनि, यस्यां गङ्गायाम्, सैव माला, **परिकरोऽपि** = परिवारः तथा च गङ्गाया माल्यरूपतया परिवारतया च सुतरां मङ्गलत्वमिति तु[8] रहस्यम्। **यद्वा** तव स्मर्तृणां अमङ्गल्यं शीलं भवतु, तथापि हे वरद! त्वं[9] परमं मङ्गलमसि, तेषामित्यर्थः। स्मर्तृणां अमङ्गल्यं शीलमाह = **श्मशानेष्वित्यादि,** वामागमसेविनां श्मशानेष्वाक्रीडा, तथापि[10] स्मरहर! **पिशाचाः**[11], श्मशानरक्षकाः सहचराः। तथा चिताभस्मभिः **आलेपः** = अनुलेपनम्, **स्त्रगपि** = जपमालापि [12]नृकपालास्थिसमूहः। तथा च वामागमसेविनां अमङ्गल्यशीलत्वेऽपि तव स्मरणादेव परमं मङ्गलं भवतीत्याशयः। [13]अयमर्थस्तु पक्षत्रये सङ्गत एवेति दिक्।।24।।

---

1. भव, G. J. i
2. अधिकः पाठः, G. J. ii
3. मङ्गल्यं, G. J. ii
4. उभयत्रान्वितम्, G. J. ii
5. शिवा एव, G. J. ii
6. अधिकः पाठः, G. J. ii
7. पुष्करपलाशवन्निर्लेप इति सांख्याः, G. J. ii
8. अधिकः पाठ, G. J. ii
9. अधिकः पाठः, G. J. ii
10. अपि, इत्यधिकः पाठः, G. J. ii
11. पिशाचरूपपिशाचाः, G. J. i
12. नृकपालोऽस्थि, G. J. i
13. अधिकः पाठः, G. J. i

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्।।25।।

योगिनामाराधनक्रममाह–[1]**मनः प्रत्यगि**त्यादि। यद्वस्तु **अन्तः** = मध्ये, [2]आलोक्य **यमिनः** = [3]पूर्वोक्तदशविधयमवन्तः, आह्लादं = परमसुखम्, **दधति** = धारयन्ति। यत्पदवाच्यमाह–**तत्त्वमिति, परमार्थरूपमित्यर्थः**। यदा चतुर्विंशतितत्त्वानां मध्ये **यत्** अन्तस्तत्त्वं, सदाशिवरूपं तत् इत्यर्थः। ननु किं तावत् परमार्थरूपम्? इत्यत आह–**किमपि** इति, विशेष्यानिर्वाच्यमित्यर्थः। **किल** = निश्चितम्, तद् वस्तु भवान् एव। ननु समाधिं विना कथं योगः? इत्यत आह–**मन**[4] इत्यादि। **प्रत्यक्चित्ते**, प्रत्यञ्चतीति प्रत्यक्प्रसरच्चित्तं, यत्र, आत्मनि इतियावत्। आत्मनि मनःसङ्कल्परूपम्, **सविधं** = निकटवर्त्ति यथा स्यात् तथा, **अवधाय** = समाधाय। [5]ननु धारणां विना कथं योगसिद्धि? इत्यत आह–**आत्तमरुत** इति, वशीकृतवायव इत्यर्थः। धारणमाह **शारदायाम्**–

भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधिः।
धारणं प्राणमरुतो 'धारणेति' निगद्यते।।

इति समाधिधर्म्ममाह–'**प्रहृष्यद्रोमाण**' इत्यादि '**जातपुलका**' इतियावत्। **प्रमदो** = हर्षः, तेन यानि **सलिलानि** = अश्रूणि, तैः**उत्सङ्गता** = मिलिता, दृशो येषाम्। ननु आत्मनि मनःसमाधाय हृदि[6] आह्लादं कथं दधति? इत्यत्र दृष्टान्तमाह–**अमृतमये ह्रद इव निमज्य** इति। अयमर्थस्तु पक्षत्रयेऽपि तुल्य एवेति।।25।।

1. मनः प्रत्यक्चित्ते सविधमवधायात्तेत्यादि, G. J. i
2. अधिकः पाठः, G. J. i
3. शारदोक्त–'अहिंसेत्यादि0, G. J. i
4. यम इत्यादि, G. J. i
5. 'ननु' इत्यारभ्य 'निगद्यते' पर्यन्तमधिकः पाठः, G. J. ii
6. अधिकः पाठः, G. J. ii

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥26॥

ईश्वरस्य विभूतियोगं दर्शयन् आह–[1]**त्वमर्क** इति। एवं[2] क्षित्याद्यष्टमूर्त्तमूर्त्तयः त्वमेवेति। **परिणताः** = पण्डिताः, त्वयि **परिच्छिन्नां** = परिमितविषयाम्, **गिरं** = वाचम्, **बिभ्रति** = [3]श्रुतिप्रतिपादयन्ति। परिच्छिन्नां गिरमाह-**त्वमर्क** इत्यादि। **आत्मा** = यजमानः। इति चेति समाप्तौ। इह हि वयं पुनः शैव-शाक्त-वैष्णवाः, **यत्** = तत्त्वम्, त्वं न भवसि, तत् न **विद्मः** = जानीमः। तथा च परिच्छिन्नवाक्-प्रतिपाद्यत्वेन स्तुवन्तः परिणता अपि अपरिणता एव इति। वयमित्यनेन पूर्वस्मिन्[4] आत्मरसः सूचित इति। [5]पक्षत्रयेऽपि तुल्यमिति॥26॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्ण-विकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद! गृणात्योमिति पदम्॥27॥

[6]प्रणव प्रतिपाद्यो [7]भवानेव इत्याह–**त्रयीत्यादि**। **तिस्रो वृत्तीत्यादि**, हेशरणद! ओमिति पदं त्वां [8]**गृणाति** = बोधयति। **व्यस्तं** = पृथग्भूतम्, **समस्तं** = एकीभूतम्, तच्च त्वां **'ओम्'** इतिपदम्, [9]इत्युभयत्रैवान्वितम्। ननु

1. त्वमर्कस्त्वं सोम इत्यादि, G. J. i
2. अधिकः पाठः, G. J. ii
3. श्रुति, इत्यधिकः पाठः, G. J. i
4. 'पूर्वस्मिन्' इत्यधिकः पाठ, G. J. ii
5. अधिकः पाठः, G. J. i
6. 'प्रणति0', G. J. i
7. भवानित्याह, G. J. ii
8. गृह्णाति, G. J. i
9. इत्युभयान्वितम्, G. J. i

'ओम्' इति पदं कथं व्यस्तम्? इत्यत आह–**अकाराद्यैर्वर्णैरिति**, आद्यपदेन **उकार-मकार**परिग्रहः। ननु **त्वां**[1] **व्यस्तम्**, इति कथं घटते? इत्यत आह– **त्रयीम्**, इत्यादि, **ऋग्-यजुः-साम**रूपवेदत्रयं इत्यर्थः। ननु प्रणवस्य अकार-**उकार-मकार-नाद-बिन्दु**घटितत्वेन पञ्चधा भेदात् **त्रयीम्**, इत्यत्र यथासंख्यं न घटते, इत्यत आह–**वर्णै**रिति, नादस्य ध्वनिरूपत्वात् न वर्णत्वम्, इतिभावः। ननु तथापि बिन्दुरूपवर्णमुपादाय[2] चतुर्धा[3] एव भेदः, इत्यत आह–**त्रिभिरि**ति। **त्रिभिः**[4], इत्यनेन बिन्दुव्युदास इतिभावः। ननु [5]चतुर्धा एव वेदानां भेदा इति[6] कथं यथासंख्यम्? इत्यत आह–**तिस्त्र** इत्यादि। **वृत्तीः**, जाग्रत्-स्वप्न-[7]सुषुप्तिरूपाः। ननु अवस्था अपि चतस्र एव। तथा च **ज्ञानार्णवे**–

सुषुप्त्यादौ जागरान्ते [8]स्ववृत्ती साऽत्र लक्षणा।
अवस्था-शेषतां प्राप्ता [9]तूर्या तु परमा कला।।

इत्यत आह–**त्रिभुवन**मिति, स्वर्ग-मर्त्य-[10]पातालरूपमित्यर्थः। अकार-उकार-मकाराणां भुवनत्रयबोधकत्वापेक्षया उत्कर्षार्थमाह–**त्रीनपी**ति, ब्रह्म-विष्णु-शिवानित्यर्थः। **अभिदधत्**, अभिधाशक्तिः, तया प्रतिपादयत्। ननु **'ओम्'**

---

1. अधिकः पाठः, G. J. ii
2. 0वर्णमादाय, G. J. ii
3. चतुर्थैव, G. J. i
4. त्रिभिस्त्रिभिः, G. J. ii
5. चतुर्थैव, G. J. i
6. अधिकः पाठः, G. J. ii
7. **सुषुप्तिः** = आध्यात्मिकमज्ञानम्।
   'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या, परमेश्वराश्रया मायामयी महासुषुप्तिः यस्याम्, स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः।
   -इति **ब्रह्मसूत्रे शारीरकभाष्यम्**, 1/4/31
8. स्फुरत्ता मात्रलक्षणा, G. J. ii
9. तुर्ये, G. J. ii
10. पातालादि0, G. J. i

इत्यखण्डं पदम्, **त्वाम्**, अखण्डं कथं बोधयति? इत्याह–**तुरीयम्**, इत्यादि। उक्तत्रयीमित्याद्यपेक्षया चतुर्थसमस्तरूपमित्यर्थः। **ते** = तव, **धाम** = स्थानम्, ब्रह्माख्यम्, योगिनां विभाव्यम्[1]। ननु अन्यैरपि कथं तन्न विभाव्यते? इत्यत आह–**तीर्णविकृतीति**, विकारशून्यमित्यर्थः। **विकारास्तु**–

'**दशेन्द्रियाणि भूतानि मनसा सह षोडशविकाराः स्युरि**'ति। तथा च [2]अशरीरित्वेन तस्य अज्ञानिनां उपासना कथं स्यादितिभावः। ननु ज्ञानिभिरेव कथं तत् परिचीयते? इत्यत आह–[3]**ध्वनिभिरित्यादि**, **अणुभिः** = मन्द्रैः, **ध्वनिभिरव-रुन्धानम्, अवरुध्यते** = [4]व्यज्यते यत् [5]तद्वदित्यर्थः। तथा च **शारदायाम्**–

> **नादः संजायते तस्य क्रमादभ्यसतः शनैः।**
> **[6]मत्तभृङ्गावलीगीतिसदृशः प्रथमोध्वनिः॥**
> **[7]वंशीकांस्यानिलापूर्ण-वंशध्वनिनिभोऽपरः।**
> **एवमभ्यसतः पुंसः संसारध्वान्तनाशनम्॥**
> **ज्ञानमुत्पपद्यते ([8]पूर्णं) हंसलक्षणमव्ययम्॥ इति।**

यद्वा त्रिभुवनकर्तृ–'**ओम्**' इति पदम्, तुरीयं ते धाम **गृणाति** = कथयति, **समस्तं** = अखण्डम्, '**ओम्**' इपिदम्, त्वमपि तथा **अभिदधत्** = (अभिधया) शक्त्या प्रतिपादयत्, **व्यस्तं** = अकाराद्यैः खण्डीभूतम्, त्रयीमित्यादिरूपेण व्यस्तं त्वां (प्रत्यपादयत्[9])। ईश्वरस्य प्रणवात्मकत्वमाह **शारदायाम्**–

---

1. परिभाव्यम्, G. J. i
2. अशरीरिणः, G. J. ii
3. ध्वनिभिरिति, G. J. ii
4. अधिकः पाठः, G. J. ii
5. तदित्यर्थः, G. J. ii
6. मत्ता0, G. J. ii
7. वंशि, G. J. ii
8. पूर्वं, G. J. i & G. J. ii
9. प्रतिपादयत्, G. J. i & G. J. ii

सत्यं हेतुविवर्जितं श्रुतिगिरामाद्यं [1]जगत्कारणं,
व्याप्तं स्थावर-जङ्गमं निरुपमं चैतन्यमन्तर्गतम्।
आत्मानं रविवह्निचन्द्रवपुषं भावान्तकं सन्ततं
नित्यानन्दगुणालयं सुकृतिनः पश्यन्ति रुद्धेन्द्रियाः[2]॥

[3]एतेन उभौ पक्षावपि व्याख्याताविति दिक्।।27।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन्प्रत्येकं प्रविचरति देव! श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते॥28॥

प्रणतिपूर्वकं स्तुवन् आह–[4]**भवः शर्व** इत्यादि। हे देव! **भवते** = तुभ्यम्। **यद्वा** हे भव! **ते** = तुभ्यम्, इत्यर्थः। **प्रणिहितनमस्योऽस्मि, प्रणिहिता** = प्रकर्षेण निहिता, विरचिता, **नमस्या** = [5]नतिः, प्रणामो येन। कस्मै भवते? इत्यत्राह–**धाम्ने** = तेजःस्वरूपाय। कीदृशं तद्धामः? [6]इत्यत आह–**अस्मै** = शर्वाद्यभिधानाष्टकप्रतिपाद्याय। कथं तस्मै नमस्योऽस्मि? इत्यत्राह–त्वं नतिः क्रियते? इत्यत आह–**प्रियाय** = स्वर्गाय, मोक्षाय वा इत्यर्थः। ननु ईश्वरस्य शर्वाद्यभिधानाष्टकप्रतिपाद्यत्वे किं मानम्? इत्यत आह–**श्रुतिरपीत्यादि**। अमुष्मिन् धाम्नि **प्रत्येकम्**, क्षित्यादिक्रमेण अष्टरूपेणापि[7], अपिकारात् क्षित्यादिक्रमेणाविभक्ते धाम्नि। **यद्वा श्रुतिरपीत्यपिकारात् पुराणादिपरिग्रहः**। **प्रविचरति**, प्रसिद्धत्वेन

---

1. परं सन्ततम्, G. J. ii
2. बद्धेन्द्रियाः, G. J. i
3. अधिकः पाठः, G. J. i
4. भवः शर्वो रुद्र इत्यादि, G. J. i
5. नतिर्येन, G. J. ii
6. तद्धामेत्याह, G. J. ii
7. अष्टरूपेऽपि, G. J. ii

अस्तीतियावत्। तथा च [1]श्रुतिरेवात्र प्रमाणमितिभावः। **यद्वा** प्रत्येकम्, **शर्वाद्यष्टमूर्त्त्यभिधानेषु** श्रुतिरपि प्रविचरति इत्यर्थः। **अथवा प्रियाय** = मोक्षार्थम्। ननु कारणान्तरं विना कथं मोक्षः स्यात्? इत्यत आह–**श्रुतिरपीत्यादि**। **श्रुतिरपि** = श्रवणेन्द्रियमपि, **प्रविचरति** = उपयुज्यते। अपिकारान्मननादिपरिग्रहः। [2]तथा च–

'आत्मा वा ऽरे! (द्रष्टव्यः) श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' साक्षात्कर्त्तव्य इति। **शर्वादिनामाष्टकमाह–भव** इत्यादि। **सहमहान्, महता** = महादेवेन, **सह** = वर्त्तमानः, [3]**भीमो** = भीमसेनः इत्यादिवत्। **अभिधानाष्टकं** = नामाष्टकमिति।

[4]**सूर्यपक्षेऽपि**–हे देव! **अस्मै** = सूर्यरूपाय, **धाम्ने** प्रणिहितनमस्योऽस्मि भवते, इति तादर्थ्ये चतुर्थी। तथा च भवदर्थं त्वत्प्रदिकेतियावत्, **प्रविचरति** = प्रकर्षेण सर्वभेदप्रधानत्वेन साध्यास्ते **प्रत्येकम्**, ब्राह्मण-क्षत्रिय-वैश्येषु, अमुस्मिन् शिवे यत् अभिधानाष्टकम्, तदपि भवदर्थं **प्रविचरति**, सूर्यस्य प्रधानतया मूर्त्तिघटकत्वात् अन्येषामपि तन्निर्वाहार्थं प्रयोग इतिभावः। अन्यच्च पूर्ववदिति।

विष्णुपक्षे तु–हे देव! अमुष्मै शिवरूपाय धाम्ने प्रणिहितनमस्योऽस्मि। किमर्थम्? तत्राह–**भवते** = भवदर्थम्, भवत्प्रीत्यै इतियावत्। अन्यत् तुल्यमिति।।28।।

नमो नेदिष्ठाय प्रियदव! दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर! महिष्ठाय च नमः।
नमो वर्षिष्ठाय नित्रयन! यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः॥29॥

ननु प्रणिहितनमस्येत्यनेन[5] नमस्या कीदृशी? इत्यह आह–**नमो नेदिष्ठाय**

---

1. श्रुतिरेव प्रमाण0, G. J. i
2. 'तथा च' इत्यारभ्य 'भव इत्यादि' पर्यन्तमधिकः पाठः, G. J. i
3. 'भीमो' इत्यारभ्य 'इत्यादिवत्' पर्यन्तमधिकः पाठः, G. J. ii
4. 'सूर्यपक्षे' इत्यारभ्य 'अन्यत् तुल्यमिति'यावदधिकः पाठः, G. J. ii
5. 0नमस्येत्यत्र, G. J. ii

इत्यादि। **नेदिष्ठाय** = निकटवर्तिनि, **दविष्ठाय** = दूरवर्तिनि, व्यापकत्वात् न विरोधः। अथवा[1] निकटवर्ति यद् वस्तु, दूरवर्ति च यद् वस्तु, तद्रूपाय इत्यर्थः। अत एव सर्वस्मै इत्युपसंहारो संगच्छते। **यद्वा** भक्तानां **नेदिष्ठाय** = निकटस्थाय, अभक्तानां **दविष्ठाय** = (दूरस्थाय) इत्यर्थः। ननु तव नतिः कथं ईश्वरेण ग्राह्या? इत्यत आह–**प्रियदवेति**। तथा वने, यथा अश्वत्थे कलिद्रुमे च तुल्यरूपता। तथा सत्सु मयि नीचेऽपि तुल्यरूपता इतिभावः। **हे प्रियदव!** प्रियो **दवो** = वनो, वनाग्निर्यस्य।

'दवो दावो वनारण्य-वह्नी जन्महरौ भवौ' **इत्यमरः**। **क्षोधिष्ठाय** = क्षुद्रपरिमाणाय, **महिष्ठाय** = महिमशालिने। ननु महिमा कथं जातः? इत्यत आह–**स्मरहरेति,** स्मरस्य नाशकत्वान्महिमा सुप्रसिद्ध एव इतिभावः। **वर्षिष्ठाय** = ज्येष्ठाय, **यविष्ठाय** = कनिष्ठाय। अत एव 'नमो ज्येष्ठाय, **यविष्ठाय** = कनिष्ठाय। अत एव 'नमो ज्येष्ठाय च कनिष्ठाय च' श्रुतिरपीति। देवान्तरव्यावृत्यर्थमाह–**त्रिनयनेति**। नेदिष्ठादिसर्वरूपत्वात् आह–**सर्वस्मै** इति। **ते** = तुभ्यम्। ननु ईश्वरस्य सर्वरूपत्वे कथं विकारशून्यत्वम्? इत्यत आह–**अतिसर्वाय** इति, सर्वं अतिक्रान्तं येन। तथा च सर्वाधिकारात्मने, ब्रह्मरूपाय इत्यर्थः। **अतिक्रान्तम्**, सर्वं व्याप्तं येन, इति वा। ननु किं तावत् सर्वं त्वदभिन्नम्? इत्यत आह–**तदिदम्**, इति, तत्सर्वं **इदं** = नेदिष्ठादि, इति।।29।।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्वे स्थित्यै मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः।।30।।

सगुण-निर्गुणभेदेन स्तौति-[2]**बहलरजसे**, इत्यादि। **विश्वोत्पत्तौ** = विश्वोत्पत्तिनिमित्तम्, **भवाय** = भवरूपाय, भवत्यस्मादिति भवः। ननु रजोगुणं विना कथमुत्पपत्तिः? इत्यत आह–**बहलरजसे** इति, **बहलं** = बहुलतरम्,

1. 'अथवा' इत्यारभ्य 'संगच्छते'पर्यन्तमधिकः पाठ, G. J. ii
2. बहलरजसे विश्वोत्पत्तावित्यादि, G. J. i

रजो = रजोगुणो यस्मिन्, तस्मै इत्यर्थः। **मृडयतीति** = सुखयतीति, मृडाय। अत एव आह–**जनसुखकृते**, इति। ननु सत्त्वगुणावलम्बनं विना कथं सुखम्? इत्यत आह–**सत्त्वे स्थित्यै**, इति। तथा च सत्त्वगुणावलम्बनार्थं मृडरूपाय इत्यर्थः। **तत्संहारे** = विश्वसंहारे, **प्रबलतमसे** = बलवत्तरं तमो गुणो यत्र, तस्मै। यत्किञ्चित् तमोगुणात् प्रलयो न संभवतीत्यत आह–**प्रबले**ति। ननु भवरूपात् मृडरूपाद् वा कथं संहारः? इत्यत आह–**हराय** इति। गुणत्रयशून्यत्वमाह–**शिवाय** इति। **निस्त्रैगुण्ये** = गुणत्रयशून्यरूपतादशायाम्। ननु शरीरिणः शिवस्य कथं निस्त्रैगुण्यम्? इत्यत आह–**प्रमहसी**त्यादि, प्रकृष्टं **महः** = तेजो यत्र। **पदे** = स्थाने, ब्रह्माभ्यो इतियावत्, इति।।30।।

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद! चरणयोस्ते वाक्यपुष्पोपहारम्।।31।।

वाङ्मनसयोरगोचरस्तुतिं धार्ष्ट्यमेव फलमिति, तन्निराकरणार्थमाह–**कृशपरिणति** इत्यादि[1]। हे वरद! **ते** = तव, चरणयोः **वाक्यपुष्पोपहारं** = वाक्यरूपम्, यत् पुष्पम्, तदेव **उपहारं** = उपायभूतम्, भक्तिस्त्वद्विषया, **आधात्** = समर्पितवती वरदचरणयोरिति, तुल्याधिकरणं वा। ननु तथापि वाङ्मनसयोरगो-चरत्वाद् वाक्यार्थज्ञानाभावेन कथं वाक्यमात्रेणैव वाक्यरचनम्? इत्यत आह–**पुष्प** इति। तथा च पुष्पार्पणे यथा न वाक्यार्थज्ञानापेक्षा, तथा अत्रापीतिभावः। भक्तिमात्रकारणषाड्गुण्येनैव शुकोदीरितवाक्यवन्मदीयं वाक्यं संभवत्येवेतिभावः। भक्त्यतिशयख्यापनाय आह–**उपहारे**ति, उपहारस्तु आराध्याय एव दीयते, इतिभावः। ननु तथापि स्वीयदोषदर्शनात् कथं स्तुतौ प्रवृत्ति? इत्यत आह–**अमन्दीकृत्य** इति, दोषादर्शिनं कृत्वा इत्यर्थः। तथा च भक्तिरेव दोषदर्शनविरोधिनी इतिभावः। ननु निर्भयस्य दोषदर्शने सत्यपि स्तुतौ प्रवृत्तिः सम्भवत्येव, इत्यत आह–**चकितमिति**, भीतमित्यर्थः। भीतिः कथम्? इत्यत आह–**इतीति**, इतिहेतोः

1. कृशपरिणति चेत्यादि, G.J.i

इत्यर्थः। **यद्वा चकितं** = भीतम्, **अमन्दीकृत्य** = निर्भयं कृत्वा। तथा च भक्तिरेव भयाभावहेतुः इतिभावः। हेतुमाह–**कृशे**त्यादि, इदं चेतः क्व तव ऋद्धिः? **क्व** कृत्यसाध्यता-ख्यापनाय? **क्व** द्वयम्। ननु एतच्चेतस-ऋद्धिग्राहकत्वे किं बाधकम्? इत्यत आह–**कृशे**त्यादि। **कृशं** = स्वल्पमात्रग्राहकत्वम्, तदेव **परिणतिः** = फलम्, यस्य। तथा च इदमेव बाधकमितिभावः। ननु चेतसः आयत्तत्वात् कथं न ऋद्धिग्राहकत्वम्? इत्यत आह–**क्लेशे**त्यादि, क्लिश्यते अनेन इति **क्लेशो** = विषयः, तस्य **वश्यं** = (वशीभूतम्) इत्यर्थः। चेतसः तद्ग्राहकत्वे हेतुमुपन्यस्यति–**गुणे**त्यादि, गुणसमाप्तिशून्येत्यर्थः। ननु अनित्या ऋद्धिः कथं गुणसीमोल्लङ्घिनी? इत्यत आह–**शश्वदि**ति, सर्वकालस्थायिनी इत्यर्थः।।31।।

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः।।32।।

लोकसंग्रहार्थं स्तवस्य महाजनाहृतत्वशङ्कां निराकुर्वन्नाह–[1]**कुसुमदशननामा**, इत्यादि। योगार्थमर्यादया पुष्पसदृशदन्तवतां बोधः स्यात्, इत्यत् आह–**नामे**ति। ननु दिग्गजः पुष्पदन्तः किं स्तवनमिदं अकार्षीत्? इत्यत आह–**सर्वगन्धर्वराज**, इति। यः कश्चिद् गन्धर्वश्चेत् स्तवनकर्त्ता, तदा तथैव अप्रामाण्यशङ्का स्यात्, इत्यत आह–**राजे**ति, **सर्व** इति च। ननु पुष्पकृतोऽप्येषः स्तवः कथं ईश्वरस्य ग्राह्यः? इत्यत आह–**शिशुशशधरमौलेर्दास**, इति। **शिशुशशधरो** = बालेन्दुगणेशस्यापि बालेन्दुशेखरत्वात् आह–**देवदेवस्य** इति। ननु ईश्वरस्य दासतां प्राप्तोऽपि किमर्थं स्तवनं अकार्षीत्? इत्यत आह–**अस्य रोषान्निजमहिम्नो भ्रष्ट** इति, दासरूपमहिमावधिकपतनाश्रय इत्यर्थः। उद्यानरक्षणार्थं नियुक्तस्य तस्य तत्कर्म्मणि शैथिल्यदर्शनात् ईश्वेण शप्त इति पौराणिकी कथा। ननु एतेन स्तवेन कथं ईश्वरस्य रोषो गतः? इत्यत आह–**दिव्यदिव्यमि**ति, दिव्येभ्योऽपि दिव्यम्, उत्कृष्टतममित्यर्थः।।32।।

---

1. कुसुमदशननामा सर्वेत्यादि, G. J. i

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम्।।३३।।

ननु फलार्थिनां मनुष्याणां फलज्ञानं विना कथं स्तवपाठे प्रवृत्तिः स्यात्? इत्यत आह–**सुरवरे**त्यादि।[1] अभिपूज्यपूजनानन्तरं स्वर्गापेक्षया उत्कर्षार्थमाह–**मोक्षे**ति, मनुष्योऽपीत्यर्थः। **प्राञ्जलि**, प्रकृष्टः, पुरो गतो अञ्जलिर्यस्य। तथा प्रशब्देन प्रत्युद्गता अञ्जलिर्यस्य। तथा प्रशब्देन प्रत्युद्गता अञ्जल्यादिव्युदासः। **नान्यचेताः** = तन्मात्रचित्तः। स्तवान्तरव्यावृत्यर्थमाह–**इदमि**ति, एतदानुपूर्विकमित्यर्थः। पूजोत्तरत्व-प्राञ्जलित्व-अन्यचित्तत्वाद्यङ्गभङ्गेऽपि फलं स्यादेवेति प्रतिपादयति–**अमोघ**मिति, **अमोघं** = अव्यर्थम्, फलाव्यभिचारीत्यर्थः। अन्यथा यावदङ्गसहकृतकारणसत्वे फलस्यावश्यकत्वादमोघमित्यस्य वैय्यर्थापत्तेः। असद्भावे तु वैलक्षण्यमिति भावः, शिवसमीपमित्यर्थः। तथा च सामीप्यमुक्तिरेतस्य फलमितिभावः। **शिवसमीपमि**ति स्तवनविशेषणम्। शिवः समीपस्थो यस्य, तत्तथा। अत एव स्ववनमिदं, शिवः सन्निधौ आगत्य श्रृणोति; इतिप्रसिद्धिरपि संगच्छते। न च व्रजति इत्यस्य अनन्वयः स्यात् इतिवाच्यम्, स्वर्ग-मोक्षैकहेतुमित्यनेनैव अन्वयसम्भवात्। तथा च स्वर्गम्, मोक्षासाधरणहेतुं तत्त्वज्ञानम्, **व्रजति** = प्राप्नोति, इत्याशयः। न च कुसुमदशननामा अकार्षीत्, इत्यनेनैव पुष्पदन्तप्रणीतत्वेन अब्जपुष्पदन्तप्रणीतमित्यस्य पौनरुक्त्यमिति। पुष्पदन्तः **प्रणीतः** = प्रेमास्पदो यस्मात्, तत्तथा प्रेमास्पदः शिवस्य इत्याशयः। प्रपूर्व-नीधातोः प्रणयार्थकत्वात् प्रणयश्च प्रेमरूपः।

'**प्रणयः प्रश्रये प्रेम्णि याच्ञ्या विश्राम्भयोरपी**'ति कोशः।।३३।।

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।

---

1. सुरगुरुमभिपूज्येत्यादि, G. J. i

लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश! पारं न याति॥34॥

पूर्वोक्तं सकलं '**महिम्न**' इत्याद्युक्तमप्युपसंहरति–[1]**असितगिरिसमेत्यादि**। **असितः** = कृष्णः, **कज्जलं** = मसी, **सिन्धुपात्रम्**, आधारो यस्य, तत्तथा। **सुरतरुवरः** = कल्पवृक्षः, **लेखनी** = लिखनसाधनीभूतकाष्ठिकां गृहीत्वा इत्यस्य 'असितगिरी'त्यादिवाक्यार्थः। **शारदा** = वाग्देवता। वाग्देवताया असाध्यत्वेन सुतरां देवतान्तरमतिदूरपाराहतमिति, **पारं** = समाप्तिम्, **न याति** = नैव प्राप्नोति, इति दिक्॥34॥

इति श्रीजगदीशपञ्चाननभट्टाचार्यविरचिता श्रीशिवमहिम्नस्तव-व्याख्या 'रहस्यप्रकाशा'ख्या सम्पूर्णा

॥ श्रीमद्गुरुचरणे मम भक्तिरस्तु ॥

॥ शुभं भूयात् ॥

□□

1. असितगिरीत्यादि, G. J. i

स्तोत्रेऽस्मिन् फलश्रुतिरूपेण कानिचिदन्यान्यपि प्रक्षिप्तपद्यानि मुद्रितपुस्तकेषु समुपलभ्यन्ते, तद्यथा–

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
ग्रंथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगुणवरिष्ठः 'पुष्पदन्ता'भिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार॥35॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान्यः।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान्कीर्त्तिमांश्च॥36॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्॥37॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः।
महिम्नस्तवपाठस्य कलां नार्हति षोडशीम्॥38॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम्।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम्॥39॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः॥40॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर!।
यादृशोऽसि महादेव! तादृशाय नमो नमः॥41॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः।
सर्वपापविनिमुर्क्तः शिवलोके महीयते॥42॥

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्विषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः[1]॥43॥

॥ इति श्रीपुष्पदन्तविरचितं शिवमहिम्नः स्तोत्रं सम्पूर्णम् ॥

□□

अन्ते च प्राणिनां कृते प्रेरणास्पदं पद्यद्वयमुपस्थाप्यते—

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे,
सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे,
मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्म्मभिः॥

किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं,
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।
ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे! त्याज्यं मनो दूरतः,
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम्॥

□□

---

1. महिम्नः स्तोत्रम्, 'मधसूदनी' व्याख्यासमलङ्कृतम् (तृतीयं संस्करणम्), चौखम्भा-संस्कृतसिरीज, वाराणसी, पृ0सं0 48-तः सङ्कलितानि प्रक्षिप्तपद्यजातानि।



राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

गङ्गानाथझापरिसरः

चन्द्रशेखर-आजादोद्यानम्,

प्रयागः - 211002

ISBN : 978-93-85791-30-7

9789385791307





राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

गङ्गानाथझापरिसरः

चन्द्रशेखर-आजादोद्यानम्,

प्रयागः - 211002

ISBN : 978-93-85791-30-7